Shree Raghunath Sanskrit Research Institute Library, Jammu

No. ८४३ - घ

Title मुहूर्त्तमार्तण्डः मार्त्तण्डवल्लभाख्यटीका-सहितः

Author नारायण

Extent ८१ Age १८८५

Subject ज्योतिषम् पूर्ण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८४३ – घ

मुहूर्तमार्तण्डः (ज्योतिषम्)

मार्तण्डवल्लभाख्यटीकासहितः

पत्राणि – ८०

नं० ८४३ – घ

पत्राणि ८० (संपूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८४३-घ
मुहूर्त्तमार्तण्ड:
मार्त्तण्डवल्लभाख्यटीकासहित:
पत्राणि ८० (अशीति:) (ज्योतिषम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥जन्मलग्नं जन्मराशिश्च प्रश्नलग्नगते राज्ञो विजय एको योगः। वा जन्मलग्नजन्मराश्योरधिपौ प्रश्नलग्नगतौ तदा राज्ञो ज-
यो द्वितीयो योगः। वा जन्मलग्नं जन्मराशिश्च प्रश्नलग्नात् ३।६।१०।११ स्यात् राज्ञो जयः तृतीयो योगः। वा शत्रोर्जन्मलग्नं
जन्मराशिश्च प्रश्नलग्नात् ४।७ भवति तदा राज्ञो जयश्चतुर्थो योगः। वा शत्रुजन्मलग्नजन्मराश्योरधिपौ प्रश्नलग्नात्
४।७ भवतस्तदा राज्ञो जयः पंचमो योगः। राज्ञो जन्मलग्नं जन्मराशिरेव ३।६।१०।११ उपचयं चेत् प्रश्नलग्नात् हिबुके ४
द्यूने ७ च स्यात् तदा राज्ञो जयः षष्ठः। वा शुभग्रहा लग्नं षड्वर्गैः प्रश्नलग्ने स्यात्तदा राज्ञो जयः सप्तमः। वा शीर्षोदयाः रा-
शयः प्रश्नलग्ने गताश्चेत्तदा राज्ञो जयः अष्टमो योगः।

मुहूर्तमार्त्तण्डटीकाप-८२

नं० ८४४५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥ श्रीगणेशाय नमः ॥ मार्त्तंडोवतु वाचं नः पदैर्जाड्यतमोहरः । हंसवद्धतनुः सेव्योभीष्टदो विश्वलोचनः । १ । अर्थश्चायं वा
ची । प्रथमं सूर्यपद्ये । मार्त्तंडः श्रीसूर्यः नोऽस्माकं वाचं अवतु रक्षतु । किं लक्षणो मार्त्तंडः । हंसवद्धतनुः हंसे मंडले बद्धः त
नुर्येन सः तथा । तथा च स्मृतौ । सहस्रचक्रं रविमंडलेस्थितं कुशेशयं कांतमनंतमच्युतमिति । स्मृतिरपि । यदेषमंडले तस्मि
न्पुरुषः सोऽग्निरित्यादि । पुनः किं लक्षणः पदैः किरणैर्जाड्यतमोहरः । जाड्यं पातकं शीतं वा तमोंधकारः तद्धरतीति तथा । पुनः
कथंभूतः सेव्यः सेवितुं योग्यः सेव्यः सेवाकरणं विशेषशारह । पुनः किं लक्षणः । अभीष्टदः सेवितः सन्नभीष्टार्थदायी सर्वथा ।
पुनः किं लक्षणः विश्वलोचनः प्रकाशकत्वाद्धि विश्वं लोच्यते येनेति स विश्वलोचनः लोकचक्षुर्ग्रहेश्वर इत्यादि । आदित्यहृद
ये उक्तत्वात् । अथ ग्रंथपद्ये । मार्त्तंडो मुहूर्त्तमार्त्तंडः नः वाचं अवतु । किं लक्षणः हंसवद्धतनुः हंसा निग्रहे बिलीशार्दूल
विक्रीडितादीनि तैर्निबद्धः तनुर्यस्य सः तथा । पुनः कथंभूतः । पदैः जाड्यतमोहरः । पदैर्हंसचरणैर्जाड्यं मूर्खत्वं हरतीति यस्य सः त
था । पुनः किं लक्षणः सेव्यः नितरां पठनीयः । पुनः किं लक्षणः अभीष्टदः । यतो मुहूर्त्तोक्तिकरणादभीष्टसिद्धिकारी सर्वथा । पु
नः किं लक्षणः । विश्वलोचनः समयप्रकाशकत्वात् । १ । कुर्वे मुहूर्त्तमार्त्तंडटीकां मार्त्तंडवल्लभां । इयमाकल्पमेतेन दिव्या हि प्रा
यवेस्मन्तु ॥ २ ॥ इह शास्त्रे तावत्संबंधाभिधेयप्रयोजनान्युच्यंते । आब्रह्मादिविनिःसृतत्वं वेदांतमिति संबंधः । उक्तं च नारद
मुनिना स्वसंहितायां वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमं । यस्य शास्त्रस्य संबंधो वेदांगमिति धातृतः इति । अत्राप्युक्तं । हर
विधावयमादाय ग्रंथो यं रचितो लघुरिति । त्याजनस्तावथ चतुर्गोचरगर्भाधानादिसंस्कारविवाहाग्न्याधानेवास्तुयात्रानिमि
नध्यायपल्लीग्रहगोचरसंक्रांतिकर्मनमभिधेयं । तथा च नारदः । अभिधेयं च जगतः शुभाशुभनिरूपणमिति । अस्य प्रयोजनं तु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मो हूर्तैर्विना कार्यसाधनं। अस्य सम्यक् ज्ञानं मोक्षप्राप्तिरिति वा। किमेभिः करिष्यत्य नोच्यते। न त्वेवं संबंधाभिधेयप्रयोजनकथनामंत
रेण शास्त्रे प्रवृत्तिर्जायते। उक्तं च। सिद्धिः श्रोतृप्रवृत्तीनां संबंधकथनाद्यतः। तस्मात् सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते। किमेवा
ति २ ऽभिधेयं स्यादिदं वस्तु केन चिंत्य। यदि न प्रोच्यते तस्मै फलं भूत्वा तु तद्वेत्ता। सर्वस्यैव हि शास्त्रस्य कर्मणो वा स्य कस्य चित्। यावत्
प्रयोजनं नोक्तं तावत्तत् केन गृह्यत इति। इह शास्त्रे कस्याधिकार इति प्रोच्यते। द्विजस्यैव वेदांगत्वात्। यतः षडंगो वेदः द्विजै
रेव। अध्ययनीयो ज्ञातव्यश्च। तथा चोक्तं भास्करीयसिद्धांतशिरोमणौ। तस्माद्द्विजैरध्ययनीयमेतत्पुण्यं रह
स्यं परमं च तत्त्वं। यो ज्योतिषं वेत्ति नरः स सम्यग्धर्मार्थमोक्षान् लभते यशश्चेति॥ शिष्टास्तावच्छास्त्रारंभे सर्वारंभा हि दोषे
ण धूमेनाग्निरिवावृता इति। शास्त्रे सर्वारंभे ध्वंतमायप्राप्तौ मत्सां धर्मेण पापमनुदत्तीति श्रुतिसिद्धं प्रयोजनमास्याय
स्वस्ति न इंद्रो वृद्धश्रवा इति लिंगाच्च ग्रंथस्यादिः प्रत्यूहप्रतिसमाप्त्यर्थं मंगलमाचरंति। तस्मान्माध्यंदिनीयो ब्राह्मणो ना
रायणो नारायणरूपावाप्तिमिति ज्योतिःशास्त्रसंहितास्कंधत्रिकीयु रशेषप्रत्यूहापहरणं तयेऽभिमतदेवतानमस्कारल
क्षणमंगलपूर्वकं ग्रंथकरणप्रतिज्ञां प्रदर्शयन्नाह॥ ॥सिंदूरोल्लसितमिभेन्द्रवक्त्रमंबां श्रीविष्णुविपश्चितवरान्गुरूंस्तत्प्र
णम्य। वक्ष्ये विबुधमुदे लघुं मुहूर्त्तमार्तंडं सुगममहं तनोमि सिद्ध्यै॥१॥ सिंदूरेणोल्लसितं शोभायमानं इभेन्द्रवक्त्रं ग
जाननं अंबां सरस्वतीं विष्णुप्रसिद्धां विपश्चितवरान् महान् गुरून् वा निजगुरून् शास्त्रोपदेष्टॄन् प्रणम्य नमस्कृत्वाऽ
हं नारायणो मुहूर्त्तमार्तंडनामग्रंथं तनोमि विस्तारयामि। किमर्थं सिद्ध्यै कार्यसाधनाय। पुनः किमर्थं विबुधमुदे पंडितहर्षाय
हर्षकारणं विशेषणद्वारेणाह॥ किं मुहूर्त्तमार्तंडं लघुं अतिशयेनाल्पं। अल्पे वक्ष्यमाणभावदोषं कापरिहरति। पुनः किं। वक्ष्येऽर्थ
र्थबहुलं। अल्पग्रंथे वक्ष्यत्येकैकदोषेशं कापरिहरति। पुनः किं। सुगमं प्रकटार्थं॥ ॥अयनानाम मुहूर्त्तानि विवस्तावच्छुभे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सूर्यचंद्रयोः क्रांतिसाम्यं = २   = रात्र्यर्द्धदिनार्द्धयोः दशाहर्वं दश परतश्च पलानि वज्यानि २   मातुः रजस्वलत्वं = २

मासप्रभृति जन्मतिथि जन्मनक्षत्र जन्मवार = २

कर्मणि त्याज्यं त्रिभिः शार्दूलविक्रीडितेनाह । ।यामार्द्धं कुलिकं दिनत्रय विष्टी पारिघं प्राग्दलं ।। विष्टिं वैधृति पातसंक्रमणकं गंडां
तमेकार्गलं । कृष्णानंगचतुर्दिनं रविशशि क्रांत्योः समत्वं खलं होरां रात्रिदिनार्द्धके च यदि नं पित्रोर्जनन्याश्च वै ।। मासाद्यं
जनिसंभवं ग्रहणभं चंडायुधं कुत्सितं ज्येष्ठे ज्येष्ठभवस्य पापयुतिभेद्यां त्वां तिथिं च भं । ऊनात्याधिकमासकौ युतिषु वि व्याश्
वगंडातिशूले कार्यं कर सत्तु सर्वं घटिका भानां विशात्याघटी ।। ५ ।। लत्ता पंचक पापवर्गमशुभं चंद्र दशारिष्टकं जन्मे
ज्यासिताः स्तमंगणाणि नोः क्रूरे ग्रहवाकर्त्तरी । खिलं गोचर संभवं ग्रहज निप्रांत्यो द्भवं सूतकं दुःस्वप्नं म्लानिमनो विभंगम
च व्याधिं शुभे संत्यजेत् ।। ६ ।। यामार्द्धादिकं शुभे कर्मणि संत्यजेदिति संबन्धो केनान्वयः । किं तत् यामार्द्धं स्यादि । यामार्द्धकु
लिकौ वक्ष्यमाणलक्षणौ दिनत्रय वृद्धौ दिनस्य तिथिः त्रयो वमः विष्टिर्नाम यच्च सूर्योदयात् षष्टिघटिका भवंति । सेवा
न्यस्मिन् दिने दृश्यते सा दिनवृद्धिः । परिघं प्राग्दलं परिघयोगस्य पूर्वार्द्धं विष्टिर्भद्रा वक्ष्यमाणा । वैधृतिर्योगः । पातो व्यती
पातः संक्रमणं सूर्यादीनां राशिसंक्रमणं । सर्वेषां ग्रहाणां संक्रमणे त्याज्य घटिका अग्रे वक्ष्यमाणा । गंडांतं । त्रिविधं वक्ष्यमाणं ।
एकार्गलो वक्ष्यमाणः । कृष्णानंगचतुर्दिनं कृष्णपक्षत्रयोदश्यादि प्रतिपदंतं चंद्रस्य क्षीणत्वात् । केचित्तु दशम्यादि सार्द्धदि
नपंचकं त्याज्यं । कृष्णे वांतात्र केः केचित् । तत्रायं मध्यमपक्षो गीकृतः । कृष्णानंगचतुर्दिनमिति रविशशिक्रांत्योः सम
त्वं सूर्यचंद्रयोः क्रांतिसाम्यं गणितगम्यं तथापि तस्यावलोकनं अत्र कर्त्तव्यमिति तु पारस्परेण । असद्धोरां पापग्र
हहोरां । रात्रिदिनार्द्धके । दिनार्द्धं रात्र्यर्द्धं च मुहूर्तकाले निवसति महानिशायां च दिनदले यस्मात् । दशाहर्वं दश परतस्त
स्मात् वज्यानि पलानीति मध्यांतः लोकत्वात् । यदि नं पित्रोः माता च पिता च पितरौ तयोः पित्रोः मातापित्रोर्मृतदिनं । ज
नन्या मातुः रजस्वलत्वं । मासाद्यं जनिसंभवं ग्रहणं जनिरुत्पत्तिः तत्संभवो यस्य एवंविधं मासाद्यं । मासप्रभृति जन्मतिथिज

= १२ कृष्णत्रयोदश्यादि प्रतिपदंतं चतुर्दिनं । केचित् [illegible] दिनपंचकं त्याज्यं = ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

= द्र— तमुक्तं एष्यग्रग्र। स्थितेन स्वेऽं=२

ज्ये १२

म नक्षत्रादि। ग्रहणं नक्षत्रं चं आयुधं वक्ष्यमाणं। दुःखलोद्भुमुहूर्तेर्ष्व हर्वभ वक्ष्य प्रथमजा तस्य वक्ष्यमाणं। ज्येष्ठा पत्यस्य ज्येष्ठं
मासं। पापयुगिते ष्युत्तोलि। पापाः पापग्रहाः वक्ष्यमाणास्तेषामन्य तमेन युक्तं युक्तं इतं मुक्तं एवं पुरःस्थितं। एतानि द्वा
लिनक्षत्राणि विद्धं च भं वक्ष्यमाणलक्षणं। ऊनाख्याधिकमासकौ क्षयमासाधिमासौ। वक्ष्यमाणलक्षणौ। युतिषु विष्वा भू
वगंडातिषु। व्यंद्रका ९ धौ पक्षकस्त्व द्वर्तुद हर्वघटिकाः विषा द्वेनविष्कुंभः। व्याघातः। शूलः। वज्रः। गंगंडः। अति
अतिगंडः। एषु योगेषु त्र्यं काधौकिरस्तेर्व घटिकाः क्रमेण। तद्यथा। विष्कुंभे तिस्रः ३। व्याघाते काः ९। शूलेऽर्धाः पंच ५। वज्रे
अंकाः नव ९। गंडे षट् ६। अतिगंडे रुतवः षट् ६। विषाख्या घटीः। नक्षत्राणां विषनाडिकाः वक्ष्यमाणाः। लत्ता पंचक पापवुर्गं
। एतद्वक्ष्यमाणं त्रयं। अशुभं चंद्रं। वक्ष्यमाणगोचरप्रकरणे वेधं। दशारिष्टं कं जातकशास्त्रगम्यं। जन्मेशोऽप्यस्तितास्तं। जन्मेशो
राशिस्वामी इज्यो गुरुः। सितः शुक्रः। एषां अस्तमनं रविलुप्तकिरणत्वं। अंगनाशिनोः क्रूरोद्भवांकर्तरी। अंगं लग्नं राशी चंद्रः त
योः क्रूरोद्भवो क्रूरग्रहजनितां कर्तरीं वक्ष्यमाणलक्षणां। रिष्टं गोचरसंभवं। गोचरे दुष्टग्रहाधिकं गोचरं अग्रे वक्ष्यामि। ग्रहज
निप्रांतोद्भवं सूतकं। ग्रहो ग्रहणं। जनिर्जन्म। प्रांतो मरणं। एभ्यः उद्भूतसूतकं। ग्रहणसूतकं मृतसूतकमिति। तेषु ग्रहणसूतकं
वक्ष्यमाणं। दुर्भिक्षहानिप्रारंभसमये सततदुर्वचनश्रवणादि। मनोभंगं। अंतःकरणस्य प्रवर्तनं। व्याधिं ज्वररोगः। पाप्माज्व
रो व्याधिविकारो दुःखमिति वाग्भटः ज्वरितस्य न मंगलं कुर्यादित्यर्थः। तथा चोक्तं ज्योतिःप्रकाशे। जन्माधिपतिर्लग्नेशः
चंद्र भार्गवमंत्रिणां। विरश्मित्वं जन्ममासो जन्मभं जन्मवासरः। दुर्निमित्तं मनोभंगः क्षयमासाधिमासकौ। मृतजातकयो
श्चैव सूतकं ग्रहणस्य च। ज्वरोत्पत्तिरजो मातुः पित्रोः क्षयदिनं तथा। गंडांत त्रितयं कालसंधिर्भस्य सितिश्चैत्तनोः। क्रांतिः पातो
व्यतीपातो वैधृतिः परिघादिकं। भानोः संक्रांतिभोगश्च कुलिकश्चार्धयामकः। क्रूरैर्मुक्तं युतं भोग्यं सग्रहं ग्रहं। विष्वधूमितं। धि
ष्ण्यं ग्रहणगं पापैर्विद्धं सौम्येश्च पादतः। विष्टिः क्रूरयुतं लग्नं लग्ने पादादिकं दुग्धं। जन्मतो दुःस्थितश्चंद्रो लग्नस्यापि निधनोपगः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

।जन्मभाज्जन्मलग्नाच्च लग्नलग्नांशकाष्टमौ।पापयोर्मध्यगं लग्नं स्त्रीलेंदुः कुनवांशकः।क्रूरवारे पापहोरा दुष्टयोगग्रहोद्भवाः।
तिथिवृद्धिक्षयौ भानां नाडिका विषसंज्ञिकाः।एते दोषाः समाख्याताः शुभकर्मणि गर्हिताः।दशाच्छिद्रोऽष्टवर्गश्चांसे गोचरे स्युस्त
३ पापरे।लत्तैकार्गलचंडास्त्र कालवेलाश्च पंचकं।मृत्युयोगो ग्रहाद्याः स्वे स्वे देशे तु निंदिताः।अथोपग्रहांतर्वर्त्तिदोषांतरं तत्र
किं कार्यं किं वर्ज्यं।मासादीनां सिद्धिसंज्ञांगीकरणं।पुनरुक्तिर्निर्दोषत्वं।एतत्त्रयं वृत्तेनैकेनाह।नो कुर्यादिति विभादगेंद्रध्वति
तो युग्मेषु ७।८।१४।१५।१८।१९ पंचाशयोः ५।८।स्वर्गात्पंचसु देवे।२२।२३।२४।२५ शोभनानि तनुयाद्धूमपाशास्त्रादिकं।मा
स त्वयिनवारयोगतिथिभादीनां च सिद्ध्यभिधा ज्ञातव्या पुनरुक्तिरत्र कुत्रचित्सा तत्समतिप्राप्तये।५।रविभादित्र्यीध
ष्ठितनक्षत्रादि अंगेंद्रध्वतिमितानि यानि नक्षत्राणि तेष्वयुग्मेषु एतदुक्तं भवति।सप्तमाष्टमयोः चतुर्दशपंचदशयोः अ
ष्टादशैकोनविंशयोः।तथा पंचाशयोः रविनक्षत्रात् पंचदशमयोः।तथा स्वर्गात्पंचसु एकविंशात्पंचसु नक्षत्रेषु शोभना
नि कर्माणि न कुर्यादित्यर्थः।एषु धूमपाशास्त्रादिकं घातादिकं तनुयाद्विस्तारयन्न कुर्यादित्यर्थः।उक्तं च।विद्युत्संचमभे स्थितेष्व
चलनं स्यात्सप्तमे सूर्यभाच्छूलमष्टमभे शनिश्चद्दशभे केतुस्तथाष्टादशे।दंडः पंचदशे चतुर्दशगृहे प्रोक्तो निपातो बुधै
रुकागोलविदा तथैव गदिता चैकोनविंशे कृभात्।देवज्ञवल्लभेपि।कंपणो माहनिघातभूकंपावज्र एव च।परिवेषश्च
विज्ञेयो नक्षत्रादेकविंशतेः।एतेष्विंदुसमेतेषु कुर्यात्कर्म न शोभनं।इह नास्ति विशेषः साध्यं यत्तत्सिद्धमुपेति च।इति।अ
न्यद्विदोषान्ग्रंथप्रसंगतः प्रवक्ष्यामि।अथास्मिन्ग्रंथे मासादीनां संज्ञा लौकिकी ज्ञेयेति पुनरुक्तिर्निर्दोषत्वं तदाह नवि
उना।मासश्चांद्रायनेति।मासश्चैत्रादयः।ऋतवो वसंतादयः।अयनए वायने दक्षिणोत्तरे।वाराः सूर्यादयः।योगा विष्कुंभादयः। ३
तिथयः प्रतिपदादयः।भान्यश्विन्यादीनि इत्यादीनां करणराशिभावानां सिद्धाभिधाः शास्त्रांतरसिद्धा ज्ञातव्या।तथा इहा
स्मिन्ग्रंथे कुत्र कुत्र पुनरुक्तिर्वर्त्तते स तत्समतिप्राप्त्यै स्मरणायेति न दोषः। ।इति श्रीकमलाकरसूनुमाधवटीकायां मार्तंड
वल्लभायां त्याज्यप्रकरणम्।।२।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥अथ साधारणं नक्षत्रप्रकरणं विवक्षुरादौ नक्षत्रदेवता वृत्तेनैकेनाह। अस्मिन् प्रकरणे सर्वाणि शार्दूलविक्रीडितानि। मेरा
दस्त्रयमाग्निकेंदुगिरिशादितिसंगिरः पन्नगाः क्रव्यान्नाः पितरो भगोर्यमरवीत्वष्टानिलेंद्राग्नि वा। मित्रेंद्रौ निरृतिर्जलं
प्रथमभाद्विश्वैकविष्णू वसूव्रातः पाशयऽजपादतः परमहिर्बुध्न्योथपूषाभिधाः। ।प्रथमात् अश्विन्याः सकाशात्क्रम
शो भेशा बुधैः प्रोक्ता इत्यन्वयः। भानां नक्षत्राणां ईशाः स्वामिनः। दस्रौ अश्विन्याः। यमो भरण्याः। अग्निः कृत्तिका
याः। को ब्रह्मा रोहिण्याः। इंदुर्मृगस्य। गिरिशो महादेवः। आर्द्रायाः अदितिः। पुनर्वसोः गिरांगुरुः। पुष्यस्य। पन्नगाः
सर्पाः। आश्लेषायाः। क्रव्यान्नाः पितरो मघायाः। भगः पूर्वाफाल्गुन्याः। अर्यमा उत्तराफाल्गुन्याः। रविर्हस्तस्य। त्व
ष्टा चित्रायाः। अनिलः स्वात्याः। इंद्राग्नी देवताद्वयं विशाखायाः। मित्रोनुराधायाः। इंद्रो ज्येष्ठायाः। निरृती राक्षसो
मूलस्य। जलं पूर्वाषाढायाः। विश्वे उत्तराषाढायाः। को ब्रह्मा अभिजितः। विष्णुः श्रवणस्य। वसुव्रातः वसूनां समूहो
धनिष्ठायाः। पाशी वरुणः शततारकायाः। अजपात् अजैकचरणः पूर्वाभाद्रपदायाः। अतः परं अहिर्बुध्न्यः उ
त्तराभाद्रपदायाः। अथानंतरं पूषा रेवत्याः देवता। प्रयोजनं नक्षत्रज्ञानार्थं प्रांतादौ च। अथ नक्षत्रगणानां च
स्थिरादिसंज्ञास्तत्प्रयोजनं श्लोकद्वयेनाह। ब्राह्मं त्र्युत्तरयुक् ध्रुवं स्थिरमथो पूर्वामघायाम्यभं क्रूरोग्रं श्रव
णत्रयादितियुता स्वाती चरं चापलं। दस्राकाभिजिदीज्यभं लघु तथा क्षिप्रं च मैत्रांतिमेंदुत्वाष्ट्रं मृदु मैत्रम
ग्निभविशाखं मिश्रं वसाधारणे। ८। मूलाहींद्रभवं च दारुणमदस्तीक्ष्णं मुनींद्रैः स्मृतं संज्ञातुल्यमिहाचरंति सु
धियः कार्यं हि संसिद्धये। सप्तधा स्थिरचंचलोग्रमिति ताः क्षिप्रा मृदुदारुणाः सीतं दर्कयमार राहुणा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

खिनः पापा बुधस्तैर्युतः॥२॥ ब्राह्मांरोहिणी। किंलक्षणं अत्र उत्तरत्रयुक्तिस्त्रणामुत्तराणां समाहारस्त्र्युत्तरं तेन युक्तायुक्तं
४ ध्रुवं स्थिरमिति स्थिरमिति अभिधानं मुनींद्रैः स्मृतमितिसन्वयः अथ पूर्वामिधायाम्यभं पूर्वात्रयमघायाम्यभं
५ भरणीति पंचकं क्रूरोग्रं चोक्तं। श्रवणत्रयादितियुता स्वाती चराख्या चला च स्यात्। श्रवणत्रयपुतादितियुता
स्वातीति पंचकं चरं चलं प्रोक्तमित्यर्थः। दस्राकाभिजित्दाभं दस्रमश्विनी अर्कोहस्तः अभिजित्तु वक्ष्यमाणल
क्षणं ईज्यो गुरुः तस्यभं पुष्य इति च तुष्टयं लघु क्षिप्रं प्रोक्तं। मैत्रांतिमेंदुत्वाष्ट्रं मैत्रं अनुराधा अंतिमं रेवती। इंदु
मृगः त्वाष्ट्रं चित्रा एतच्चतुष्टयं मृदु तथा मित्रं प्रोक्तं। अग्निभं विशाखा। अग्निभं कृत्तिका। विशाखेत्येतद्द्वयं मि
श्रं साधारणं प्रोक्तं। मूलाद्रींद्रशिवं तु मूलं प्रसिद्धं अहिः अश्लेषा इंद्रो ज्येष्ठा शिवो आर्द्रा इति तच्चतुष्टयं दारुणं इदमेव
तीक्ष्णं चोक्तं। एतेषु ध्रुवादिसंज्ञेषु नक्षत्रेषु संज्ञातुल्यं कार्यं सुधियः पंडिता आचरंति। किमर्थं संसिद्ध्यै। एतदुक्तं
भवति। स्थिरनक्षत्रे स्थिरं स्तंभप्रतिष्ठादिकं। चरे चरमिति स्पष्टं। अत्र समानार्थसंज्ञाद्वयं करणं कवित्वं वंधनार्थं
। अथ प्रसंगेन सूर्यादीनामपि सौम्यपापत्वं च वक्तुमाह। सूर्यादीति। सूर्यः स्थिरः चंद्रश्चलः भौमो उग्रः बुधो
मिलितो मिश्रः गुरुः क्षिप्रः शुक्रो मृदुः। शनिर्दारुणः। अथ पापसौम्यान्ग्रहानाह। क्षीणेति। जातकोक्तमेतत्। क्षीणे
न्दुर्कार्किभौमाः सूर्यः पापाः सौम्यापि तद्युतः। राहुकेतू पापतरौ पापाः पापयुतस्तथेति। कृष्णाष्टम्यूर्द्ध्वप्रतिपत्पर्यंतं क्षी ४
णश्चंद्रः। अर्कः सूर्यः यमः शनिः। आरो भौमः। राहुः प्रसिद्धः। शिखी केतुः। एते क्षीणेंद्वादयः पापाः क्रूराख्यैः पापैः संयु
तो बुधः पापः स्यात्। अपरोदन्याः सौम्याः क्रूरवारे क्रूरकर्म सौम्येषु शुभं कर्मेति। अथ प्रसंगेन नक्षत्रसमानना
यात् दिनरात्रिमुहूर्तानि नक्षत्रोक्तसाधकान्वक्तुं तैर्विकेनाह। अर्काः स्मुः। शिवसार्पमित्रपितरो वस्वंबुविश्वेभिजि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वकेंद्राग्निनिशाचराश्च विजलाधीशार्यमाख्यो भगः । रात्रेः स्युः स्मरहात्र प्रयोजचरणास्तुं चाश्विनौ तोतोदितिजीवो
विस्णुरिनाच्युयास्त्विषितवाः कमैर्बुभोक्तं स्मृतं ।४। एतेऽह्नो दिवसस्य तिथिलवाः पंचदशांशाः ५ मुहूर्ताः स्युर्भवंति
प्रथमः शिवः । द्वितीयः सर्पः । तृतीयः मित्रः । चतुर्थः पितरः । पंचमो वसुः । षष्ठोंबु । सप्तमो विश्वे । अष्टमो भिजित । नव
मो ब्रह्मा । दशम इंद्रः । एकादशः इशानुः । द्वादशः कोणपतिर्निर्ऋतिः । त्रयोदशो धीशो वरुणः । चतुर्दशो यमाख्यः । पंच
दशो भगः । अथ रात्रेः प्रथमः स्मरहा शिवः । अजचरणस्त्रयः । अजचरणाहिर्बुध्नपूषाकृयाः । क्रमेणा द्वितीयोज
चरणः । तृतीयो हिर्बुध्नः । चतुर्थः पूषा । पंचाश्विनौ । इति अश्विनौ । पंचदशस्तु यमाग्निकेंद्रवः । पंचमः दस्त्रः । षष्ठोय
मः । सप्तमोग्निः । अष्टमको ब्रह्मा । नवम इंदुः । दशमो अदितिः । एकादशो जीवः । द्वादशो विस्णुः । इनाच्युयः । रवित्वाष्ट्रा
निलाः । त्रयोदशो रविः । चतुर्दशो त्वष्टा । पंचदशो निलो वायुः । प्रयोजनमाह । कमैर्बुभोक्तं स्मृतं । एषु मुहूर्तेषु भो
क्तं नक्षत्रोक्तं कर्म स्मृतं । मुनींद्रैरिस्यर्थाहारः । एतदुक्तं भवति । शिवमुहूर्ते आर्द्रानक्षत्रोक्तं । सार्पमुहूर्ते अश्लेषोक्तं ।
। मित्रमुहूर्ते अनुराधोक्तं कर्म कुर्यादित्यर्थः । एतदुक्तं रत्नमालायां । यस्मिन् धिष्ण्ये यच्च कर्म प्रदिष्टं तद्दैवत्ये तन्मु
हूर्ते विकार्यमिति । लोकस्त्वामिदृष्टांसेवके प्रयुंजानादृश्यंते । अतो देवताशब्दस्तत्र तत्र तिथ्यादिषु प्रयुज्यते । तथा
विहरं प्रयोजनाख्य । नागो पञ्चदशनाडीभिर्दिक् पंचदशाभिस्तथा । भूतो ष्टादशनाडीभिर्दूषयंत्युत्तरां तिथिमिति ।
नागः पंचमी । दिक् दशमी । भूतश्चतुर्दशीवत । इति स्वोक्तमुहूर्त्तमार्तंडटीकायां मार्तंडवल्लभायां नक्षत्रप्रकरणं । ।
अथ गर्भाधानादिसंस्कारप्रकरणं विवक्षुस्तावद्गर्भाधानस्य तु संबंधित्वात्प्रथमं कालं स्रग्धरावृत्तेनाह । आद्य
तौ पौषपुंकोर्जमधुमुचिनिभस्याः कुयुक् पापवारा रिक्ता माकोक्षिष[illegible] ष्युः ४।९।१२।८।२ः।१२।८।०।६ कुकुप्परसद

कुयोगाः विष्कुंभाद्यः =२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेत्राख्यिसंध्यापराह्नाः। मिश्रोग्राम्यलतीत्थं विवरमनकलात्याधिकास्यंग। राज्ञो स्यात्तः पापस्यलग्नं सदृदृष्ट्वा सितुपी
ताम्यवर्णं विरं नाम। तत्रादौ मासफलमाह। आद्यास्तौ पौषशुक्रोर्जमधुशुचिनभस्याः स्ततौ न सुरिति पन्वयः। अर्थादि
५ भान्क्ति परिणामः। पौषः प्रसिद्धः। शुक्रो ज्येष्ठः। ऊर्जः कार्त्तिकः। मधुश्चैत्रः। शुचिराषाढः। एते षण्मासा नशुभा इत्यर्थः
5 । अर्थादन्येशुभाः। एतदुक्तं ज्योतिर्निबंधे। प्रथमर्त्तौ मिधो नारी विधवा भवति ध्रुवं। वैशाखे धनपुत्राद्या ज्येष्ठे
रोगान्विता भवेत्। आषाढे च मृता पत्या श्रावणे च धना॰न्विता। भाद्रपदे दुर्भगा च आश्विने च तपस्विनी।
ऊर्जे त्वायुष्मती नारी मार्गशीर्षे बहुप्रजा। पौषे तु पुंश्चली नारी माघे पुत्रसुखान्विता। फाल्गुने श्रीमती साध्वीक
मान्मासफलं स्मृतं। योगफलमाह। कुयुगिति। कुयोगो विष्कुंभादयः। योगेषु नव योगा दुष्टाः संति। विष्कुंभातिगं
ड व्याघात वज्र व्यतीपात परिघ वैधृताः। एते योगा न शुभा इत्यर्थः। अर्थादन्ये शुभाः। आद्यर्त्तौ दुर्भगा नारी विष्कुंभे
चेद्रजस्वला। वंध्या चैवातिगंडे च शूले शूलवती भवेत्। गंडे च पुंश्चली नारी व्याघाते चात्मघातिनी। वज्रे च स्वै
रिणी प्रोक्ता पाते च परिघातिनी। परिघे मृतवंध्या च वैधृते पतिमारिणी। शेषा शुभा न हा योगा यथा नामफ
लप्रदा इति। वारफलमाह। पापवारा इति। शौरीदर्कयमाराः पापाः एषां वारा न शुभाः। उक्तं च कारिकायां। आ
दित्ये विधवा नारी सोमे चैव मृतप्रजा। अंगारे श्वशुरं हंत्री बुधे कन्या प्रसूयते। वृद्धिली गुरुवारे च कन्यापुत्रव ५
ती भवेत्। शनौ च पुंश्चली नारी प्रथमार्त्तौ विदुर्बुधा इति। तथा च नारदः। रोगा पतिव्रता दुःखा पुत्रिणी भोगभागिनी
। पतिप्रिया क्लेशभागी सूर्यवारादिषु क्रमात्। इति कारिकायां सोमे फलं मृतप्रजेति। नरघां पतिध्रुवेति द्वयो
र्विरोधे मृतप्रजेति। कल्पस्य सोमवारविषयं। पतिव्रतेति पुत्रके सोमविषयमिति व्यवस्था। मार्त्तंड वचनं श्रेयः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पापवारा इति। तिथिफलमाह ॥ रिक्तामा कोष्ठ षष्ठीति रिक्ताश्च तुर्थी नवमी चतुर्दश्यः। अमा अमावास्या। अर्को
द्वादशी द्वादश्याः स्वामी अर्कः। अथवा अर्कसंख्यापि द्वादशवाचका संख्ययापि द्वादशी भवति। तिथेर्देवता रत्नमाला
यामुक्ताः॥ तिथिपाश्च तु मुख्वविधातृ विष्णवइत्यादयः। अष्ट अष्टमी षष्ठी प्रसिद्धा एताः सप्ततिथयः नशुभाः।
अथादिन्याः शुभाः। उक्तं च। आद्यतौ सुभगा नारी प्रतिपद्युरजस्वला॥ द्वितीयायां भाग्यवती तृतीयायां सुतान्विता
चतुर्थ्यां विधवा नारी पंचम्यां धनदायिनी। षष्ठ्यां च लक्ष्मीभाग्या नारी। एकादश्यां सुतान्विता। द्वादश्यां दुर्भगा नारी त्र
योदश्यां हिरण्यदा। चतुर्दश्यां पुंश्चली स्यात् पूर्णिमास्यां सुपुत्रिणी। यदि भद्रा न चेत्तस्यां दर्शे स्याच्चौरिका ध्रुवमि
ति। स्थानफलमाह। कुकुपरसदनेति। कुकुः कुभूमिः परसदनं परस्यगृहं भर्तृगृहादन्यत्र। एते उभे स्थाने निंद्ये।
अथादिन्यच्छुभं। उक्तं च। देवस्थाने पितृस्थाने निंद्यस्थाने न्यवेश्मनि। — नि। पुष्पवत्याः फलं न स्यान्मार्गे चांडाल
वेश्मनि। इति देवस्थानं देवालयं। पितृस्थानं श्मशानस्थानं। निंद्यस्थानं कुत्सितस्थानं। अन्यवेश्म भर्तृगृहा
दन्यवेश्म। अन्यत्सुगमं। ननु अत्र श्लोके बहूक्तं अत्र कथं कुकुपरसदने इत्येवोक्तं। सत्यं। यत्स्थानद्वयमुक्तं
तस्मिन्नेव सर्वश्लोकमधितिष्ठति। तद्यथा देवस्थानान्यवेश्मचांडालवेश्मेति पदत्रयं परवेश्म तस्मिन्नपद
धितिष्ठति। अन्यत् श्लोकोक्तं तत्कुकुपदे वर्त्तते। न तु मार्गः। कथं कुकुपदे स्ति मार्गः कुत्सितो न भवति। सतो
अस्ति मार्गे विदुष्टत्वं सर्वजनपदसंचारात् धर्मशास्त्रप्रसिद्धं। तर्हि पूर्वश्लोकोक्तं बहुभाषणं व्यर्थमेव। तद्बहुभा
षणं त्वनधिकाधिकदोषः। विवक्षयोक्तमिति न दोषः। वेलाफलमाह। रात्रिसंध्यापराह्ना इति। रात्रिः प्रसिद्धा। ५कोर
संध्या द्वे। अपराह्नस्त्रिधा विभक्तस्याह्नः स्मृतीया भागः एते चत्वारः काला नशुभाः। अथादिन्यो पूर्वाह्नमध्याह्नौ शु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मौ। उक्तं च। पूर्वाह्णे सुभगा पुण्या प्रवर्द्धिया रजस्वला। मध्याह्ने तु शुभप्राप्तिः स्वैरिणी चापराह्णके। संध्ययोरुभयोर्वे
श्या निशायां विधवा तथेति। नक्षत्रफलमाह। मिश्रोग्रा मूलतीक्ष्णमिति। मिश्रे कृत्तिका विशाखे। उग्राणि पूर्वत्रि
६ यभरणीमघाः। अमूलतीक्ष्णानि मूलरहितानि तीक्ष्णानि। अश्लेषाज्येष्ठार्द्राः इति तन्नक्षत्रदशकं न शुभं। अवशि
6 ष्टानि नक्षत्राणि शुभानि। तदुक्तं नारदीयसंहितायां। श्रीयुता सुभगा पुत्रवती सौख्यान्विता स्थिता कुलाधिका
मानवती अश्विन्यां प्रथमार्त्तवा। १। दुःशीला स्वैरिणी स्वसगर्भपातनतत्परा। परप्रेमा [illegible] काक वंध्या भरण्यां प्रथ
मार्त्तवा। २। अनर्था पुंश्चली वंध्या गर्भपातनतत्परा। प्रेष्या मत्तपूजा वापि वह्निभे प्रथमार्त्तवा। ३। सुशीला सुप्र
जा मान्या पतिभक्ता दृढव्रता। महार्चनरता नित्यं धातृभे प्रथमार्त्तवा। ४। गुणान्विता धर्मरता नारी सर्वसहा सती
। पतिप्रिया सुताढ्या च चंद्रभे प्रथमार्त्तवा। ५। कुत्सिता दुर्भगा कष्टा मृतपुत्रा खला वला। दुष्टा व्रतपरित्यक्ता रौद्रभे प्रथ
मार्त्तवा। ६। पतिभक्ता पुत्रवती परसंतानमोहिनी। कुलाचारानुरक्ताढ्या दितिभे प्रथमार्त्तवा। ७। पतिभक्ता सुपुत्राढ्या
नानाभोगवती सदा। स्वकर्मनिरता रक्ता पुष्यभे प्रथमार्त्तवा। ८। परभर्तृरता प्रेष्या कोपिनी निर्धला लसा। मृषावादा
च दुःपुत्रा भुजंगे प्रथमार्त्तवा। ९। निर्दैन्या रोगसंयुक्ता सर्वदाने च लोलुपा। पितृवेश्मरता मान्या पितृभे प्रथमार्त्तवा
। १०। परकार्यरता दीना दुःपुत्रा क्लेशभागिनी। मलिना कर्कशा क्रुद्धा भाग्यर्क्षे प्रथमार्त्तवा। ११। प्रजावती धर्मरता निर्वै ६
रामित्रहर्जिता। सती मातृगृहासक्ता अर्यमर्क्षे रजस्वला। १२। निर्द्विषा भूरिविभवा पुत्राढ्या भोगभागिनी। प्रधाना रा
न कुशला हस्तर्क्षे प्रथमार्त्तवा। १३। चित्रकर्मभोगिनी च कुशला क्रयविक्रये। विकीर्णिकामलक्षणाढ्या त्वाष्ट्रभे प्रथ
मार्त्तवा। १४। बहुवित्तवती नारी कुशला शिल्पकर्मसु। पुत्रपौत्रवती साध्वी वायुभे प्रथमार्त्तवा। १५। नीचकर्मरता

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दुष्टा पापासक्ता परप्रिया। विपुत्रा मलिना क्रुद्धा हि दैवे प्रथमार्त्तवा। स्वामिपदार्चिता स्वस्वपरगुणैः सम्यग्विभूषिता। सुभ
गा बहुपुत्राढ्या मित्रभे प्रथमार्त्तवा। १८। पुंश्चली चरता केशान्यनयपुंश्चली वा स्तुः। दुःसंतानवती ज्येष्ठा न तत्र प्रथ
मार्त्तवा। रजसंता नाथगुले नीलपे पुंश्चला नाकेशा मोचिनी। स्वकर्मनिरता नित्यं मूलन्ते प्रथमार्त्तवा। १९। प्रष्टा जपापा
दुःपुत्रा प्राणिहिंसनतत्परा। अजन्यं व्यसनासक्ता तोयभे प्रथमार्त्तवा। २०। कार्यकार्येषु कुशला सदा धर्मानुव
र्त्तिनी। ~~कुलानुमोदनीमान्या विपुत्रे प्रथमार्त्तवा~~ रम्यगुणाश्रया भाग्यवती। विश्वभे प्रथमार्त्तवा। २१। पुत्रपौत्रान्विता
भोगधनधान्यवती सती। कुलानुमोदनी मान्या विष्णुभे प्रथमार्त्तवा। २२। धनधान्यवती भोगी पुत्रपौत्रसम
न्विता। स्वकर्मनिरता साध्वी वसुभे प्रथमार्त्तवा। २३। बहुपुत्रा धनवती स्वकर्मनिरता सती। कुलानुमोदि
नी मान्या वरुणे प्रथमार्त्तवा। २४। चुंचुकी वंधुविद्वेष्या नित्यं दुष्टरता खला। शिल्पकार्येषु कुशला जांघ्रि
भे प्रथमार्त्तवा। २५। आद्या पुत्रवती मान्या सुप्रसन्ना पतिप्रिया। वंधुपूज्या धर्मवती अहिर्बुध्ने रजस्वला। २६। दृढ
व्रता धर्मवती पुत्रसौख्यार्थसंयुता। विख्याता गुणसंपन्ना पौष्णभे प्रथमार्त्तवा। २७। संधिफलमाह। विवरमिति।
तिथिभादीनां विवरसंधिः। न शुभं उक्तं च। दुर्भगा सर्वसंधिषु चेति। रक्तफलमाह। अनकलणाल्यास्त्रमिति। अन
कलणादन्यत्र अनकलणं अनकलणं च अल्पं च अधिकं च अनकलणाल्पाधिकं तत्र तत्र अस्त्रं च अनकलणाल्पाधिकास्त्रं
न सत्स्यात्। अनकलणं नाम यत्सुरंगमारक्तं न भवति। असंरक्तं अन्यत् सुगमं। अथ दिनस्य शुभं। उक्तं च। प्रथ
मार्त्तौ फलं स्त्रीणामुच्यते रजसो धुना। सुभगा पुत्रसंयुक्ता शुक्लवर्णे तथार्त्तवे। १। प्रापरोगालितसंकारोगवा

पि २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रत्नकसन्निभे। पुत्रकन्याप्रसूतिः स्यान्नीले तु स्यान्मृतप्रजा। २। कर्बुरे म्रियते साच पिंगले च मृतप्रजा। कृष्णे
तु विधवा नारी रजस्येवं विनिर्दिशेत्। ३। शोणिते विंदुमात्रे तु स्वैरिणी चाल्पशोणिता। वृशामधूम्रवा स्यात्तु दुर्भगा
७ वहुशोणिते। ४। गंधांतरे पुत्रं। रक्ते रक्ते भवेत् सुचः कृष्णे च मृतपुत्रिका। विच्छिन्ना भवेद्वंध्या काकवंध्या च पांडुरे
। ५। पीते च स्वैरिणी प्रोक्ता सुभगा गुंजवर्णके। सिंदूराभे भवेत् कन्या रजः शोणित लक्षणमिति। करणफलमाह।
गराद्विति। गरात् अर्थ गरादष्ट गरा घष्ठकरणानि ववपर्यंतानि नो संतिन शुभानि स्युः। अर्थादन्यानि शुभानि। उ
क्तंच। ववे पुष्पवती नारी वंध्या वा विधवा भवेत्। तैतिले सन्मतवती गरे नारी विनश्यति। नष्टप्रजा वणिक संज्ञे वि
ष्ट्यां वंध्या धनेप्सिता। शकुनौ च चतुष्पादे नारी वैधव्यमाप्नुयात्। नागे च रमते रामा ~~मभ्यन्तन सस माध्ये ध्यान~~
~~मृतप्रजा वापि व किंस्तुघ्ने प्रथमा रजसि~~ किंस्तुघ्ने विधवा भवेत्। उत्पातान्नि विधः सन्न नस्यात्। तथा च नारदः। संध्या
स्तू पप्लवे विष्ट्या मशुभं प्रथमार्त्तवमिति। अथ लग्नफलमाह। पापस्य लग्नमिति। पापस्य लग्नं पापग्रहलग्नं न
स्यात्। वीतैर्द्दर्कथ्यमानाः पापास्तेषामन्यतमस्य लग्नमित्यर्थः। पापग्रहलग्नानि मेषवृश्चिक मकर कुंभाः
एतानि लग्नानि न शुभानीत्यर्थः। अन्यानि शुभानि। कर्कलग्नं शुक्लपक्षे शुभं। कृष्णपक्षे अशुभं। स्वामिनो
वशात् तृतीयमानाः। उक्तंच। आत्मघ्नी भूणहा मेषे वृषे पुत्रवती भवेत्। द्वंद्वे कन्याप्रसूतिर्नारी मृतापत्या च कर्किणि ७
। सिंहे वैधव्यमाप्नोति कन्यायां स्त्रीप्रसूर्भवेत्। तुलायां बहुपुत्राद्या दुष्टकर्म रतालिनि। चापे पुत्रधनाढ्या स्यान्मकरे
दुःखिनी भवेत्। सत्प्रजावती कुंभे मीने चाल्पप्रजा भवेत्। इति। नारदोपि। कुलीरहयचापांत्यस्त्रयुक्कन्यातुलधराः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

।शशय: शुभदा ज्ञेया नारीणां प्रथमार्त्तव इति ।अत्रापि कर्कतनस्य दे धे चंद्रवतव्यवस्था ज्ञेया ।अथ वस्त्रफलमाह
।अदृष्टसितपीतवर्णं विरामिति नो सत्स्यात् ।अदृष्टं जीर्णं सितपीताभ्यां वर्णं भिन्ने तपीताभ्यामन्यद्वर्णं हि वंविधमंवरं वस्त्रं
नो सत्स्यात् ।नो शुभं स्यादित्यर्थः ।अर्थाद्दृष्टं शुभ्रं पीतं वस्त्रं शुभं ।उक्तं च ।शुभगा श्वेतवस्त्रा च रोगिणी रक्तवाससा
।नीलांवरधरा नारी विधवा प्रथमार्त्तवा ।भोगिनी पीतवस्त्रा च दृढवस्त्रा पतिव्रता ।दुर्भगा जीर्णवस्त्रा च सुभगा चार्क
वस्त्रणीति ।अत्रानुक्तमपि स्वाज्ञप्रकरणोक्तमन्यद्बहु विचारणीयं ।इति श्रीलग्नसूर्यमार्त्तंडटीकायां प्रथमार्त्तवप्रक
रणं । ।अथ साधारणलग्नबलं सामन्यराहतेमाह ।प्रायश्चंद्रं त्यजेत्स्वाष्टमरिपुतनुगं ।८।६।१। भांशकौ मूढ
नाथौ क्रूरैर्दृष्टौ खलांशं मतिगतिखचरं मृत्युतत्यौ तनुस्थौ ।सौम्याः केंद्रत्रिकोणे व्यरि भवसहजे चान्यखेटाः ।प्रश
स्ताः सर्वत्रैतत्प्रयोज्यं पृथगनुपठितानर्थं विविदित्वा विशेषात् ।इहवाल्यमाले गर्भाधानादिकृत्ये प्रायो वाहुल्ये
न चंद्रं स्वाष्टमरिपुतनुगं त्यजेदिति ।व्यष्टकं प्रतिदैवविज्वचनं ।कं स्वं वादशं अष्टमं प्रसिद्धं ।रिपुः षष्ठं ।तनुर्लग्नं
एतान् प्रतिगतं चंद्रं त्यजेत् ।तथा भांशकौ त्यज ।किंलक्षणौ भांशकौ मूढनाथौ यथोस्तौ ।तथा अस्तंगतस्वलग्ननवां
शाविपत्यर्थः ।पुनः किंलक्षणौ क्रूरैर्दृष्टौ क्रूरग्रहैश्चंद्रंद्रष्टमन्यतमयुक्तौ ।तथा खलांशं त्यज ।यत्र कुत्रापि लग्ने पाप
ग्रहनवांशं त्यज ।तथा मतिगतखेचरं त्यज ।लग्नादष्टमे ग्रहं त्यजेदित्यर्थः ।लग्नगोचरमाह ।सौम्याः केंद्रत्रिकोणेषु सौ
म्याः सौम्यग्रहाः केंद्राणि लग्नचतुर्थसप्तमदशमानि ।त्रिकोणे नवपंचमे ।एतेषु केंद्रत्रिकोणेषु सौम्याः प्रशस्ताः ।
तथा मृत्युतत्यौ तनुस्थौ त्यज ।मृत्युर्जन्मराशिजन्मलग्नाभ्यामष्टमं तत्पुस्तस्वामिः एतौ तनुस्थौ त्यजेदित्यर्थः ।अरि
भवसहजेषु अन्यखेटाः ।अरिः षष्ठं भवमेकादशं सहजं तृतीयं ।एषु स्थानेषु अन्यखेटाः ।सौम्येभ्यो अन्ये पापग्रहाः ।
प्रशस्ताः स्युः ।सर्वत्रैतत्प्रयोज्यमेतत् लग्नोक्तं सर्वत्र गर्भाधानादिकेषु प्रयोज्यं ।साधारणत्वात् ।किंकृत्वा पृथ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कृ॰ अनुपाठितान् विशेषान् असंविदित्वा पृथक्कृत्य अनुपाठितान् विशेषान् ज्ञात्वा। अथ गर्भाधानं स्त्रग्धराछन्दसेनाह। स्व
स्त्रीं प्राप्नुतिअन्तु षट्कसमदिनविवरम्आद्यतस्त्रादिनानि त्यक्त्वा मूलं मघां तपेवसुकतजनभाहानि पूर्वाणि चन्तौ। याही
ज्या केंद्र लग्ने विषमभलवगे कृद्दलैर्भोसुतार्थिन् मस्त्रैर्तेरिहेवीयु गहनि मुदितः कन्याकेस्थोः सुचंद्रे। भो सुतार्थिन्
हृतौ मुदितः सन् स्वस्त्रीं प्रतियाहि गच्छेत्यर्थः। सुतमर्थयतीति सुतार्थी तस्य संबोधने भो सुतार्थिन् हृतौ रजोदर्शना
१८ दारभ्य षोडशरात्रयो ऋतुः अस्मिन् सुतहर्षः साजाता अस्य समुदितः एवं विधः सन् स्वस्त्रियं प्रतिगच्छेत्यर्थः। अ
तौ त्रस्त्री गर्भधारणं करोति। अत्रे स्त्री रपिहर्षितीभामा। तथा च मनुः। ऋतुः स्वाभाविकी स्त्रीणां रात्रयः षोडश स्मृ
ताइति। किं कृत्वा प्राप्तुं ऋतुष्का समदिनविवरम् आद्यतस्त्रादिनानि त्यक्त्वा। प्राप्नुंप्राचतुष्कं सर्वरात्रिचतुष्कं।
असमदिनं विषमदिनं विवराल्लिदिनरात्रितिथिभादीनां संबंधयः आद्यं स्वपित्रोः आद्यदिनं तस्त्रादिनं तस्यत्र
हस्य षष्ठं दिनं तानि त्यक्त्वोत्यर्थः। एवं मूलं त्यक्त्वा तथा मघां त्यक्त्वा मघाप्र॰ अंत्यरेवती एते त्यक्त्वेत्यर्थः।
तथा च वसुकलिजनिभानि त्यक्त्वा। वसुरष्टमी। कलिश्चतुर्दशी। जनिभं जन्मनक्षत्रं अहोदिवा एतानि त्यक्त्वेत्यर्थः।
। तथा पर्वाणि त्यक्त्वा। पर्वाणि दर्शपौर्णमास्यौ। व्यतीपातवैधृतिसंक्रांतिमहापातादीनि त्यक्त्वा स्त्रियं प्रतिगच्छेत्
। तथा च नारदः। रजोदर्शनितो ऽस्य शयानार्यो दिनचतुष्टयं। ततः शुद्धिः क्रियास्वेताः सर्ववर्णेष्वयं विधिरिति।
वशिष्ठः। उपप्लवे वैधृतिपातयोश्च विष्ट्यादिवापारिघपूर्वभागे। संध्यासु सर्वासु च पित्रोर्मृते हि पत्नीगमनं ८
विवर्ज्यं। दिने षु युग्मेषु च वस्त्र मालायोगैः सुतार्थी स्वसतीमुपेयात। दिनेष्वयुग्मेषु च कन्यकार्थी हि त्वाचगेडा
तिथिलग्नभागान्। ज्योतिषार्के। हृतौ युग्मनिशि स्वस्त्रीं गच्छेत् पुत्राय सद्धिधीः। मघामूलांत्यपत्यांश्च निंद्यं भत्याष्टमी
स्त्यजेदिति। केः देवेज्या केंद्र लग्ने विषमभलवगेः। देवेज्यो गुरुः अर्कः अतिथि इंदुश्चंद्रः लग्नं प्रसिद्धं। एतौ विष

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मभलवर्गैः भंशाप्तिः लवो नवांशः। विषमराशिविषमनवांशास्थितैरित्यर्थः। न केवलं विषमभलवर्गैः। अपि तु त
इलैः। उत्कृष्टं बलं येषां तानि तथा तैः। अथ कन्याकामिनो विशेषमाह। भो कन्यके श्रोऽहैव अनंतरोक्तं दुर्व्वलत्वे
ण काले अयुक्गमे हन्नि विषमदिने मुहूर्त्तः सन् स्त्री प्रतियाहि कैः एतैर्व्यस्तैः। एतैर्देवेज्यार्केंदुलग्नैर्व्यस्तै
रिति समभलवर्गैः। तथा च बृहज्जातके। ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विंदुभिः। पुंजन्मप्र
वदेत्समांशकगतैर्युग्मेषु तैर्योषितः इति। कस्मिन्सति सुचंद्रे शोभने सति गोचरे चंद्रबले सतीत्यर्थः। सुचंद्र
इत्येतत्पदं ग्रंथसमाप्तिपर्यंतं मुहूर्त्तमात्रे योज्यं। एवं विलग्नबलं। अथ पुंसवनसीमंतोन्नयने स्रग्धरयाऽऽ
ह। शुभे केज्यारवारे विमिथुनविषमांशयोः पुंसकं सा त्सीमंतास्यं च सत्सु व्ययरंध्रसुतपग्रहयोः पर्वरि
क्तोनतिथ्यां। मासेद्वित्रिप्रसंख्ये प्रथमकमपरं तत्र यः षष्ठाष्टमेषु। प्रोक्तं पुंगर्भलग्ने ग्रहबलमनयोर्योज्य
माद्यमपत्यैः। १२। पुंभे पुंनक्षत्राणि चैतानि। पुष्यो हस्तः पुनर्वसुः। अभिजित्प्रोष्ठपाश्चैव अनुराधा
श्विपुरुषयेति। प्रोष्ठपादा एव भाद्रपदा तु पामन्यतमे। अर्केज्यारवारे रविगुरुभौमवारे विमिथुनविषमांशयोः
अंगश्च अंशश्च अंगांशौ विगतं मिथुनं याभ्यां तौ विमिथुनौ तौ च तौ अंगांशौ च तथा तयोः मिथुनरहिते विषम
लग्ने विषमनवांशे इत्यर्थः। पुंसवनं सीमंतास्यं च सीमंतोन्नयनमपि सत्स्यात्। नामैकदेशग्रहणे नामग्रह
णं। कयोः सतोः सु व्ययसुतग्रहयोः पापग्रहरहितयोः व्ययरंध्रसुतभवनयोः सतोः पर्वरिक्तोनतिथ्यां इत्थं मा
रिक्तातिथिरहितायां तिथ्यां। मासेद्वित्रिप्रसंख्ये प्रथमकं पुंसवनं गर्भाधानाद्द्वित्रिप्रसंख्ये मासि तत् तीये वा मासे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यात्। अपरं सीमंतोन्नयनं तुर्ये ४ षष्ठाष्टमे ८ षु मासेषु स्यात्। यत्पुंसवनगर्भाधि। तन्न ग्रहबलमुक्तं तदेवेज्या
कैंदुलग्नेरित्यादिकं तदनयोः पुंसवनसीमंतोन्नयनयोः शुभं स्यात्। शुक्लपक्षः शुभः स्यात्। न कृष्णपक्षः। अत्र
गर्भाधानाद्यष्टानां तेषु गुरुशुक्रास्तादिकं न चिंत्यमित्यग्रे वक्ष्यति। लग्नबलं सर्वत्र जातकर्ण्यः। द्वितीये वा तृ
तीये वा मासि पुंसवनं भवेत्। व्यक्ते गर्भे भवेत् कार्यं सीमंतेन सहाथवा। नृसिंहः। रिक्तां च पर्व नवमीं त्यक्त्वा पुंस
वने शुभाः। हस्तपातः। सीमंतोन्नयनं बुधास्तु हि मगो पुंनामधिष्ण्ये। स्थिते कुर्यात् पुंसवनं च तत्र यद्दिवसे भौम
स्य जीवस्य चेति। बृहस्पतिः। कुलीरमिथुनं कन्यां हित्वाथ वा शुभावहा इति। नारदः। चतुर्थे मासि षष्ठे वाप्य
ष्टमे वा तदीश्वरे। बलोपपन्ने दंपत्योश्चंद्रताराबलान्विते। अरिक्तापर्वदिवसे कुजजीवार्कवासरे। तीक्ष्णमिश्रो
ग्रवर्जेषु पुंलग्ने पुंनवांशके। शुद्धेष्टमे जन्मलग्नात्तयोर्लग्नेन नैधने। शुभग्रहयुते दृष्टे पापखेटयुते स्थिते। पंच
ष्टके च तुर्मे वाष्टे केंद्रीज्यपूर्वकैः। स्त्रीणां तु प्रथमे गर्भे सीमंतोन्नयनं शुभं। शुभग्रहेषु धीधर्मकेंद्रेष्वरिभ
वत्रिषु। पापेषु सत्सु चंद्रे च निधनापारवर्जिते। कृष्णग्रहाणामेकोपि लग्नाद्दंत्यात्मजाष्टगः। सीमंतिनीं वा ते
ऽर्भं विलीहंतीति न संशयः। । अथ जातकर्माभिधेयेत्यध्यायाह। सूतो जातं विदध्यादिह न पितुरशौचांतरं वा
तदंते तिथ्यैः वृद्धिं पूर्तरामिश्वरमसुमिरघो नाम वर्णान् विदध्युः। सूतेः स्तर्याख्यविंशाह्ले तिः २। १६। २०। २२ मित
दिवसे जातमेवाचरांगं रिक्ताष्टम्यारमंदान्वयगतरवचायां प्रोद्यातां त्रिपराह्णं। सूतौ प्रसूतौ जातायां जातं जात
कर्म विदध्यात् कुर्यात्। इहास्मिन् जातकर्मणि विषये पितुः अशौचांतरं सूतकांतरं न। अयमर्थः। कदाचि
ज्जातमृतस्तातिभवति तदास्मिन् जातकर्मविषये सूतकांतरदोषो नास्तीति भावः। सूतकांतरे सत्यपि जाते पुत्रे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पितासचैलं स्नानं कुर्यादिति। स्वस्वगृह्योक्तं कर्म कुर्यादिति। पितुरिति कर्तृरूपलक्षणं। वा अथवा सर्वशौचांते एतस्यां वेवाश्रि
प्रादिनक्षत्रैः कुर्यादिति। क्षिप्राणि अश्विनी हस्ताभिजित्पुष्याः। ब्राह्मं रोहिणी उत्तरात्रितयं स्थिराः। चराणि श्रवणत्रय पुनर्वसुस्वा
त्यः। मृदूनि अनुराधा रेवती मृगः। लभिरित्यर्थः। लग्नबलं सर्ववित्। उक्तं च। तस्मिन् जन्ममुहूर्तेपि सूतकांते अथवा शिशोः।
जातकर्म च कर्तव्यं पितृसज्जनपूर्वकं। क्षिप्रेष्वरे ध्रुवे वैभे श्रवे दिवसे प्रथमे हि वा केंद्रे गुरौ शुभे गो कार्यं जातकर्म स्नातनमि
ति। प्रजापतिः। सूतके तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति। संवर्त्तः। जाते पु
त्रे पितुः स्नानं सचैलं तु विधीयते। तत्र शीतोदकेन कार्यं। तत्र जाबालिः। कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च। एतच्च
रात्रावपि कार्यं। तत्र वसिष्ठः। पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशीति। तच्चोत्त
राभिमुखं कार्यं। एतदुक्तं तत्रैव। श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत्। उत्तराभिमुखो भूत्वा नद्यां वा देवखातके। रात्रावुदक्का मिट
द्विगमना रात्रौ विशेषमाह। सांख्यायनः। द्विवायराहतं तोयं कृत्वा स्वर्णमयं च तत्। रात्रिस्नाने तु संप्राप्ते स्नायादनलसन्नि
धौ इति। अथ नामक[illegible]र्माह। अथो नामकर्म विदधुः। सूतेः सूर्या१२ब्धि१६विंशाकृति२२मितदिवसे इति। अथानंतरं वर्णाः
ब्राह्मणादयः। क्रमेण सूते प्रसूतेः सकाशात्सूर्याब्धिविंशाकृतिमितदिवसे। द्वादशषोडशविंशद्वाविंशमितदिवसे नाम वि
दध्युः कुर्युरित्यर्थः। अयमर्थः। ब्राह्मणो द्वादशे दिवसे। क्षत्रियः षोडशे। वैश्यो विंशतिमे दिवसे। शूद्रो द्वाविंशतिमे दिवसे
नाम कुर्यादित्यर्थः। तथा चोक्तं बृहस्पतिना। द्वादशे दिवसे वापि जन्मतो दिवसे शुभे। षोडशे विंशतौ चैव द्वाविंशे वर्णतः क्रमा
त्। इति। अत्रान्येपि विकल्पाः संति। तत्र व्यासः। नामधेयं दशम्यां तु केचिदिच्छंति सूरयः। द्वादश्यामाहुरन्ये तु मासे पूर्णे त
थापरे। अष्टादशेहनि तथा वदंत्यन्ये मनीषिणः। इति। अप्राप्तकालेपि विशेषमाह। [illegible]ः। व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि
अमावास्यां विना शुभे प्राप्तकालेपि संत्यजेत्। [illegible]ः। अमा संक्रांति विष्ट्यादौ प्राप्तकालेपि नाचरेत्। यत्र कालनिरोधस्तत्र दोषो नास्ति
यस्यां क्रियायां सर्वोक्तः कालो मासदिनेष्वपि। तस्मान्न दोषो मूढत्वे च केवाजी वृष्क्रयोरिति। अथ कालातिक्रमे नक्षत्राण्या
ह। जातं भे वर्तिते। जातभे जातकर्मोक्तनक्षत्रैः। क्षिप्रैः स्थिरैः [illegible] नारदेन। इष्टकालोपधानाद्यैः का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लातिक्रमणं यदि। अनस्तगे मृगाजीज्ये तत्कार्यं चोत्तरायणे चरहितस्थिरमृदुनक्षत्रे शुभवासरे। चंद्रताराबलोपेते दिवसे च शिशोः पितुरिति अ
था तत्राप्यविशेषमाह। चरांगमिति।। चरलग्नं रिक्ताष्टम्यारमंदान्। रिक्ताश्चतुर्थीनवमीचतुर्दश्यः। अष्टमीप्रसिद्धा। आरो भौमवारः। मंदः शनि
१० वारः। तान्व्ययगतखचरं व्ययभावगतं खगं ग्रहं। सौम्यमसौम्यं वा। रात्रिः प्रसिद्धा। अपराह्णो दिनस्य तृतीयो शः। एतान्त्यजेत्पत्यक्। लग्नबलं सर्वबल्यं
10 तथा च बृहस्पतिः। पूर्वाह्णः श्रेष्ठ उक्तो मध्याह्नो मध्यमः स्मृतः। अपराह्णं चरात्रिं च वर्जयेन्नामकर्मणीति। नारदः। सायाह्ने दुष्टयोगे च शनिभौमजवारयोः
रिक्तापर्वाष्टमी विष्टिं किंस्तुघ्नं च विशेषतः। एतैर्दोषैर्युते काले रात्रावपि न कारयेत्। रतिः। बृहस्पतिः। शुभे वारे च ... वडुर्गेशुभानां नामसंपदे। राशा
यश्चास्थिराः श्रेष्ठा द्विस्वभावाः शुभे युताः। नारदः। लग्नाद्व्ययाष्टमे सर्वे नष्टा नामकर्मणि इति। केषां नामकार्यमिति संग्रहे उक्तं। देवालयागजाश्वानां
हृदारामं वापि कूपयोः। सर्वोपकाराणां च चिह्नानां योषितां नृणां। काव्यादीनां कवीनां च पश्वादीनां विशेषतः। राजप्रसादसंस्तानां नामकर्म वि
धीयत इति।। अथ पालनकारोपणं। भूम्युपवेशनं दुग्धपाननिष्क्रमणं चेति चतुष्टयं रत्नैनैकेनाह। जन्मा द्वादशे ह्नि ध्रुवमृदुलघुमैर्वा त्रिसे त्सालके हो
र्भ सौम्यार्कीज्यध्रुवे ... डै र्भुवि शुभदिवसे पंचमे मासि दद्यात्। एकत्रिंशे दिने वाशनविगदितमे कं तु नायोज्यमर्भे त्विग्वा प्रांसे प्रवायो यास्यगमव
द्युदितो निःक्रमो मासि तूर्ये।। ४।। प्रसूतेः सकाशात् द्वादशे दिवसे पालके षष्ठायां अर्भकं बालं न्यसेत्। उक्तकालातिक्रमे ध्रुवमृदुलघुभैर्वा
नक्षत्रैर्निदध्यात्। लग्नबलं सर्वबलं। तथा चोक्तं बृहस्पतिना। खट्वारोहस्तु कर्तव्यो दशमे द्वादशे पि वा। षोडशे दिवसे वा पि द्वाविंशे दिवसे पि चेति
भविष्योत्तरे। अष्टमीदिवसे पुण्ये चंद्रताराबलान्विते। मृदुध्रुवदिते भे तु माता वा कुलयोषितः। शेषशायिनमाचिंत्य प्राक्शीर्षं विन्यसेच्छिशुमिति। भूम्युपवेशनमाह। सौम्येति। सौम्यं मृगः अश्विनी प्रसिद्धा ईज्यः पुष्यः ध्रुवाणि पूर्वोत्तराणि अनुराधा ... दिति ५। प्रोज्झेष्टरामितं ते तेषु
भदिवसे रिक्तारवर्जितो जन्मतः पंचमे मासि भुवि भूम्यां अर्भकं निदध्यात्। उपवेशयेदित्यर्थः। तथा चोक्तं पुराणे। पंचमे च तथा मासि भूमौ तमुपवेशयेत्। रामः १०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तत्र सर्वे ग्रहाः शस्ता मासो मासे पवित्रविशेषतः तिथिं विवर्जयेद्रिक्तां शस्तान्याद्र शुभानि च । उत्तरात्रितयं सौम्यं पुष्यर्क्षं शक्रदैवतं । प्राजाप
त्ये च हस्तश्रवणे स्तम्भाश्विनमित्रभं । वाराहस्त जयेद्देवं पृथिवीं च तथा द्विजान् । भूम्यां मां गमुपलिप्याथ तत्र कृत्वा तु मण्डलं । वाद्यघुष्णा
ह शब्देन भूमौ तमुपवेशयेदिति । उपवेशनमंत्रस्तत्रैवोक्तः । इदं तेनं वसुधे देवि सदा सर्वगतं मम । आयुः प्रमाणं च सकलं रक्षस्व त्वं हरिप्रि
य इति । दुग्धपानमाह ॥ एकत्रिंशद्दिन इति । एकत्रिंशद्दिने प्रथमे बालके कुनाशंखेन पयो दुग्धं यो जं पाययेत्सर्थः । अन्यत्र त्विहः । ए
कत्रिंशद्दिने एव पयः शंखेन योजयेत् । प्रथमातुः स्वल्पपयस्त्वेच [illegible] क्रपक्षान्तरमाह । प्राशननिगदितभैरिति । अन्नप्राशननक्षत्रैर्वा
यो ज्यं भौरितु पलक्षणं । अन्नप्राशनोक्तं । अन्य [illegible] दपि विचार्य । किं लक्षणे प्रथमेऽयिग्वाधात्येत्विगतः आगुः साचासौ त्रा शा च तत्सं पा
सौ सम्मुखं च यस्य स तथा । स्मिन् राहु वर्जित दिग्मुखरत्यर्थः । लग्नबले सर्वे वत् । व्यग्वा शास्त्रस्तु पलक्षणं । तेन रुद्रयोगिन्यादिकमपि व
र्ज्यं । तथा चोक्तं ज्योतिर्निबंधे । योगिनी राहु रुद्रादिमुखं चैव विवर्जयेत् इति । लक्षणं नर्वा । रुद्रं वायौ यमे रुद्रे तौ याग्नि राशिरात्रसौ । यामाद्धमुदयाद्रा
[illegible] दुर्भमतेवं दिग्भ्रमकमिति । उदयात्सूर्योदयात् । रुद्रलक्षणं । हरिसौ मवह्निरात्रसयमवारुणानिलरालये चैव । उदयादिभ्रमति सदाघटिकां रुद्रोमहाप्र
लय इति । हरिरिंद्रः । अथ निष्क्रमणमाह । अथास्य गमवद्वदितो निष्क्रमो मासि तुर्ये । अथ चतुर्थे मासि अस्यार्भकस्य निष्क्रमो निष्क्रमणं गणमेवत् गमनव
त् । यात्रावदितियावत् । यात्रावदितियावत् । उदितः उक्तः स्वैः । अन्वयोत्थाप्रकरणोक्तं योज्यमित्यर्थः । निष्क्रमणं हरस्यतिनोक्तं । अथ निष्क्रमणं नामगृहात्प्रथम [illegible] प० ०
निर्गमः । अकृतायां तु स्यादायुः श्रीनाशनं च पित्रोरिति । यमः । उपनिष्क्रमणं कुर्याच्चतुर्थे मासि सावने इति । कारिकायां च तुर्येमासि तु एवर्क्षे शुक्ले निष्क्रमणं
भवेत् । स्नानं स्वलंकृतं सम्यक् कृतस्वस्त्ययनं शिशुं । आदाय गेहान्निष्क्रम्य गच्छेयुर्देवतालयं । अभ्यर्च्य देवतां सम्यगाशिषो वाचयेदथ । कृत्वा प्रदक्षिणं गेहमा
नयं तितः स्वकं । मातुः स्वसृगृहं गत्वा मातुलादेर्गृहं नयेत् । तदा शीर्वचनाद्यैः स्याद्दीर्घायुर [illegible] मिनंदितः । जयंतस्य मते नायं लिखितः शिशुनि [illegible] क्रमइति ।
स्वगृ [illegible] ह्यानुसारं योजयेत् । अथ कर्णवेधं मंदाक्रांतया [illegible] चैकापोफे द्विनशानिकुजन्दीशवासरान पास्यारिक्तोप

CC-0. Dharmartha Trust J&K. An eGangotri-Sarayu Sanskritik Initiative.

मु.मा.टी. वैश्वरवसुतिथीन्दुरात्रिसंध्ये सुभ्रूमौ सूनोः कर्णौ गुरुयुततनौ वेधयेत्स्वर्णसूच्या। भित्रै रिति। मित्रैः अनुराधारेवतीमृगचित्राभिः। द्विदैवत्याकीभिजिदीज्यभैः अदि
तिवरुणाभ्यां पुनर्वसुपुष्यतारकाभ्यां। अयुग्मे वर्षे जन्मतो विषमे वर्षे अष्टमतः तीयादौ चैकापौकेषु। चै चैत्रः। का कार्तिकः। पौ पौषः। फा फाल्गुनः। एते चैकापौकेः
तेषु सूनोः पुत्रस्य कर्णौ स्वर्णसूच्या वेधयेत्। पुंस्त्रीकर्णविद्विपादे पुरुषस्त्रियोः कर्णौ पटुना कुशलेन सविधि यथा स्यात्तथा दक्षवामादि यथा स्यात्तथा वेध्यौ
१२ पुरुषस्य दक्षकर्णादि। स्त्रियः वामकर्णादि विधिना सह वर्तमानं सविधिः तस्य विधिः गृह्यपरिशिष्टे उक्तः। अथ कर्णवेधो वर्षतः तृतीये पंचमे वा पुष्ये हुचि..त्रा ह
११ रिरेवतीषु। स्वाहूयाङ्कं स्व उपविश्य दक्षिणकर्णमभिमंत्रयते भद्रं कर्णेभिरिति सव्यं वक्ष्यतीवेदिति कुमारस्य मधुरं दत्त्वाथ भिंद्यात्ततो ब्राह्मणभोजनं।
इति। कसुभ्रूमौ समार्जनरंगमालिकाद्यलंकृतायां गुरुयुतेनौ गुरुयुतलग्ने। किं कृत्वा इनशनिकुजदर्शवारानपास्य। विशयरविशनिकुजानां दृष्टाणिल
ग्नानि। त्र्यंशनवांशाः। वाराः प्रसिद्धाः। तान्विहाय तत्त्वा। पुनः किं विहाय रिक्ता पर्वेश्वरवसुतिथीन्दु विहाय रिक्ताश्चतुर्दशी नवमी चतुर्थी। प्रसिद्धाः। ईश्वरति
थिरेकादशी वसुतिथिरष्टमी एतास्तिथीन्विहाय। पुनः किं विहाय रात्रिसंध्ये विहाय स्पष्टं लग्नबलं सर्वत्र। अत्र नृसिंहः। वेध्यौ कर्णौ व..दं तस्य विषमेऽह्नि
विवाशिशोः। शुक्लेपक्षे शुभे वारे चैत्रपौषोर्जफाल्गुने। एकादश्यष्टमी पर्वरिक्ता वर्ज्याः शुभावहाः। शिष्टाश्च तिथयः सर्वाः क्रमेणोत्तमिकं विना। कर्णद्वयादिति त्रिप्र
भ दुर्गे स्त्रायायगैः शुभैः। गुरौ लग्नेऽपि कंप्याहुरुत्तराः सुकृति व्याध इति। अगस्त्यः। द्वयोश्च संध्ययोर्लग्नेन कुर्यात्कर्णवेधनं। रात्रावर्द्धे कीर्तांशवा..राः सुर्वर्ज्याः क
र्णस्य वेधने। गुरुशुक्रेन्दुजे दूनांशज्यावा ..राशाकोदय इति। संग्रहे शातकुंभमयाः सूची वेधने तु शुभप्रदाः। राजती वायसी वापि यथाविभवतः शुभाः। सुभ्रूमौ प्रांग
ले रम्ये शुचौ देशे वरे रवौ। संस्थिते वेधयेत्कर्णौ स्त्रीपुंसोर्वामदक्षिणौ। शुक्लसूत्रसमायुक्तां तामयस्स्फ्यांच्याय वेधयेत्। विधात्सतीयेन स्वत्रे चालयेदुत्तवारि ११
णा। इतिदेवलः। कर्णरंध्रे रवेश्छाया न विशेदग्रजन्मनः। तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः॥ अथान्नप्राशनं हृत्ते नैकेनाह। प्रोक्तं षष्ठेऽष्टमे मासि नु हे
रशातं पंचमे सप्तमे वा भीरोरु संतिमे वावमहरिवसुरिक्ता शुक्रस्तु जन्मर्क्षे मेके। सह कोणशत्रुसंचां ..द्ध्रुवमृदुचरभत्स्य प्रमे जालिनी नोनांगे केंद्रत्रिकोणांत्यम
तिषु विमलास्विंदुरिहास्विलोंगे॥ जन्मतः षष्ठे मासि त्वष्टमे वा मासे नृणां नरस्य अहः दिवा अशनं अन्नप्राशनं प्रोक्तं। भीरोः कन्यकायाः पंचमे सप्तमे वा मासे अशनं राम:
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative
...तथा लग्नेन तत्रांशे ... कर्णवेधं न कुर्वीत कुर्याच्चिद्वेदने भवेन्मृत्यु ... हस्पतिः। मं ६

प्रोक्तं। अत्र नंदा[व]र्ग्गहरिवसुरिक्ताः उसंति त्यजंति। मुनय इति विशेषः। नंदा प्रतिपत्षष्ठ्येकादश्यः अष्टमं दिनत्रयः। हरिर्द्वादशी वसुरष्टमी रिक्ताश्चतुर्थी नवमी चतुर्दश्यः एके जन्म-
म्वर्जं जन्मनक्षत्रं उसंति। कस्मिन्सद्दक्कोशाह्नि। दृक्कोद्रेष्काणः अंशेन नवांशः आहो दिनं एषां समाहारः दृक्कोशाहाः सतो ग्रहस्य दृक्कोशाहः सदृक्कोशाहस्तस्मिन्। कथं-
भूते सदृक्कोशाह्नि। अचांद्रेन विद्यते चांद्रं दृक्कोशाहो यस्मिन् तद्विचांद्रस्तस्मिन्। कथंभूते। सदृक्कोशाह्नि। चंद्रस्य दृक्काणनवांशाहानि विद्यान्ते येषां ते शुभग्रहाणां शु-
भग्रहाणां शुभानीत्यर्थः। पुनः कस्मिन् ध्रुवमृदुचरमक्षिप्रभे [illegible] दृष्टे वोक्ते। पुनः कस्मिन् अजालिमीनान्यांगे अजो मेषः अलिर्वृश्चिकः मीनः प्रसिद्धः एभ्योन्यलग्ने।
मेषवृश्चिकमीनान्यन्नप्राशनेन शुभानीत्यर्थः॥ कासु सत्सु। केंद्रत्रिकोणत्यमृतिषु विमलासु सत्सु। केंद्राणि प्रथमसप्तमचतुर्थदशमानि। नवपंचमे त्र्यंत्ये द्वादशं मृति केंद्रे
रष्टमं परवल्लिंगं ह्य तत्सुरूषयोः अंगे लग्ने इष्टः अन्नप्राशने हर्त्तीचंद्रेत्यर्थः इंदुश्चंद्रः अविलः पूर्णः एतासु विमलासु पापग्रहैर्रहितासु सतीषु अन्यलग्नवलेः सर्व-
वत्। अत्र नारदः। षष्ठे मास्यष्टमे वापि पुंसां स्त्रीणां तु पंचमे। सप्तमे मासि वा कार्यं नवान्नप्राशनं शिशोः। रिक्तां दिनत्रयं नंदां द्वादशीमष्टमीममां। त्यक्त्वान्यतिथयः श्रेष्ठा प्रा-
शने शुभवासराः इति। वृद्धनारदः॥ १ हृद्वं धनचौलान्नप्राशने चोपनायने। शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणीति। जीवसौम्यसितानां तु द्रेष्काण दिवसांशकाः। बालान्न-
प्राशने शस्ता नेष्टा कीर्त्यसृजामिति। अलिचोगोष्वो कुंभतुला कन्यासिंहः कर्किमृगोद्यमाः। एताश्च राशयः शस्तान मेषमीनवृश्चिकाः इति। नारदः। चरस्थिरमृदुक्षि-
प्रनक्षत्रे शुभनैधन इति। श्रीपतिः। रवौ लग्ने कुर्यात् इत्यादि। अथ येषु गुरु[illegible]शुक्रकास्तामावः येषु दोषः। बालत्ववृद्धत्वशमालां शास्य मौढ्ये किं न कार्यमिति
चतुष्टयं वृत्तेनैकेनाह। गर्भाद्यन्नप्राशनांतेषु न गुरुसितमौढ्यं त्यजेत्कालरोधाद्बाल्यं वार्द्धक्यं च याम्यायनमपि मलमासादि सिंहे गुरौ जं। एतच्चौलादिषु ज्ञेयं दयगुरुसित
योर्बाल्यवार्द्धं न गाहेद्यो शास्वेशस्य मौढ्ये व्रतमपि निजमासं न माघौ न कुर्यात्॥७॥ गर्भाद्यन्नप्राशनांतेषु गर्भाधानादि अन्नप्राशनांतेषु कर्मसु गुरुसितमौढ्यं गुरुशु-
क्रमौढ्यं लग्नस्यत्वं न त्यजेत्। कस्माद्धेतोः कालनिरोधात्। यतः शास्त्रे गर्भाधानादीनां अन्नप्राशनांतानां कर्मणां कालरोधः कृतोस्ति। कस्माद्धेतोः कालरोधतः। बाल्यवा-
ब२ र्द्धं च [illegible] न त्यजेत्। तयोः गुरुशुक्रयोः बाल्यं वार्द्धं वालवृद्धत्वे न त्यजेदित्यर्थः। याम्यायनमपि दक्षिणायनमपि न त्यजेत्। मलमासादि [illegible] अधिमासादि न त्यजे-
त्। आदिशब्देन क्षयमासो गृह्यते। सिंहे गुरौ जन्म सिंहस्थ प्रसिद्धः एणो मकरः तौ प्रतिगते ईज्ये न त्यजेत्। कालरोधादिस्येतत्पदं बुधानां गोनवां। नद्यपा। प्रसूतिसमयएव जी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तकर्मविहितं। तन्नातिकालरेखातः। किमप्यस्तादिकं न चिंतयेत्। अन्नप्राशनं मासे षष्ठेष्टमे वे ... तिमासद्वये विहितो। तत्रयस्मिन्मासे मौढ्यादिकं नस्यात्तत्र कर्त्तव्यं॥
कालस्य सावकाशयोरपि ~~कोसस्वोस्य~~ मासयोर्यदि ... लितस्य गुर्वादि निरोधः। येन स्यात्सो प्यत्र न चिंतनीयः। एवं गर्भाधानादिके ष्वन्नप्राशनांतेषु विचार णीयं॥
अनन्यगतिकं कुर्यान्नित्यं नैमित्तिकं तथेति स्मरणात्। संस्कारक्रमः कात्यायनगृह्यकारिकायामुक्तः। गर्भाधानं पुंसवनं सीमंतोन्नयनं ततः। जातकर्माभिधानं च निष्क्र
मप्राशने क्रमात्। चूडोपनयने वेदव्रतानां च चतुष्टयं। गोदानं मेखलामोक्षो विवाहः षोडश क्रिया इति। अनेन क्रमेण गर्भाद्यन्नप्राशनांतेषु गुरुसितमौढ्यं बुध्याबलो कयेदित्य
र्थः। तथा च बृहस्पतिः। मासे तु युक्त कार्ये षु मूढत्वे गुरुशुक्रयोः। न दोष कृत्तदामासल सत्त्वो वलवानितीति। यमो पि। गर्भे वार्द्धुषिके भृत्ये श्रा... द्धकर्मणि मासिके। सपिंडीक
रणे नित्ये नाधिमासं विवर्जयेदिति। मनुः। सीमंत जातकादीनि प्राशनां... तानि च क्रमात्। कर्त्तव्यानि न दोषो स्ति पंचाननगते गुराविति। कात्यायनस्मृतौ। गर्भाधानादि
काग्नन्नप्राशनांतामलिम्लुचे। आकर्णवेधौ र्त्तव्या नानाइत्याह भास्करः। इत्यादि। अस्तादिकं चूडादिषु कर्मसु उद्भूतजेत्। अथ बालत्ववृद्धत्वप्रमाणमाह। अथ गुरुसितयो
रिति। गुरुसितयोः गुरुशुक्रयोः बाल्यवार्द्धे बालत्ववृद्धत्वे न गाहेत स्नाहे स स्नाहं बाल्ये स स्नाहं वार्द्धमित्यर्थः। बालत्वे वृद्धत्वे बहुविधमस्ति तत्र मध्यमपक्षमंगीकृतः।
अथ प्रश्नावेशस्यास्तवर्ज्जमाह। प्रश्नावेशस्य मौढ्य मिति। प्रश्नावेशो वेदपतिर्बृहस्पतिः। तस्य मौढ्ये आसीत् व्रतमौंजीवंधनं निगमारंभं वेदारंभमपि न्यार्यः। श्रेष्ठेन कुर्यात्। व्रतं वि
द्यां गत्वा द्वर्ज्ये तस्यास्ते व्रतादि कृते सति वटोर्मूर्खत्वं स्यात्। ननु वेदारंभे मूर्खत्वं घटते वेदपतित्वाद्गुरुः तेमूर्खत्वं किं उच्यते। व्रतबंधस्य वेदाध्ययनार्थं क्रियते। तस्मात्तत्रापि
मूर्खत्वं घटते। तथा च यात्त्व... ल्क्यः। उपनीय गुरुः शि... ष्यं महाव्याहृतिपूर्वकं। वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्। प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा। ग्रह
णांतिकमित्येके केशांतश्चैव षोडशे। यज्ञानां तपसां चैव व्रतानां चैव कर्मणां। वेद एव द्विजातीनां निःश्रेयसकरः परः। इति। तथा च कात्यायनगृह्यसूत्रे वेदः ... समाप्य
तपसा स्नायाद्ब्रह्मचर्यं च त्वारिंशकं ... द्वादशके प्येके गुरुप्रणासुस्नातइति। अथ चौलनिर्णयं वृत्तद्वयेनाह। चौलं मातापादि पंचस्य मधुसुगदि... तं द्वित्रिपंचाष्टके षु स्वाचाराद्वा
स गर्भायदि भवति जनन्यत्र नो कार्यमेतत्। सा कंयत्रोपनीत्या क्रियतइह तदायं निरोधो न हि स्यात्। जन्माद्यादं वार्त्त वेदोव्रतमुपनयनं चातिमद्रे सुभार्थी। कार्यं वर्णै रनार्कि
रा तिषु नि खिलै र्यज्ञ ये श्रुल्के सोमे द्यं ते द्यादि तस्याः केंदु भिरिनहरितस्त्रि त्रिभिश्चौलकर्म। चूने कीं राकि श्च क्राग तिक वि नि खिला मृतु गामृतु दां सुर्ष्यांसितों त्यः इत्य १२

रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्त्यजगुरुशाखिनौरात्रिसंध्येवरिक्ता।२। चौलं चूडाकरणं माघादिपंचसु मासेसु अमधुशुचैत्र रहितेषु गदितं उक्तं। तथा चोक्तं नारदेन। माघादिपंचके चौलं हित्वाद्वीणविधुं मधुरिति। द्वित्रिपंचाष्टकेषु द्वितीयत्रितीयपंचमवर्षेषु स्वाचाराद्वा स्वकुलाचारतो वा॥ उक्तं च कात्यायनगृह्ये। संवत्सरिकस्य चूडाकरणं तृतीये वाप्रतिहते षोडसे वर्षस्य
केप्यंतीयथा मंगलं वा सर्वेषामिति। संवत्सरिकस्यातिक्रांतवर्षस्येति हरिहरमिश्रैर्व्याख्यातं। तथा च षडुरुशिष्यः। आद्ये द्वे कुर्वते केचित्पंचमे न्ये तृतीयके। उपनीत्यासहैवेति विकल्पाः कुलधर्मत इति। सगर्भी यदि भवति जनन्यत्र नो कार्यमेतत् अत्र उक्तेषु वर्षेषु द्वित्रिपंचाष्टकेषु जननी कुमारस्य माता सगर्भी यदि भवति। तदा एतच्चौ
लं नो कार्यं पंचाब्दादूर्ध्वं गर्भवत्यां सत्यामपि कार्यमित्यर्थः। सिद्धं। अत्र नारदः। सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्। पंचाब्दात्प्राग्गथोर्ध्वं तु गर्भिण्यामपि कारयेत्। इ
ति। उपनयनेन सह क्रियते तदा दृष्टास्मिन् चौले अयमुक्तो निरोधो मातृगर्भलक्षणो न ह्येव स्यात्। तदुक्तं तेनैव। सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यत इति। अंवार्त्तवे
निषिद्धमाह। जह्यादंबार्त्तवे दोव्रतमुपयमनं चाविष्णुद्रेष्टुमार्थी। अंबार्त्तवे मातृरजसि। अदः अनंतरोक्तं चौलमित्यर्थः। व्रतं मौंजी। उपयमनं विवाहः। आविष्णुद्रेष्टुः अ
द्विपर्यंतं स्तुमार्थी एतत्त्रयं जह्यात्। त्यजेन्न कुर्यादित्यर्थः। तथा च मनुस्मृतौ। उद्वाहव्रतचूडासु माता यदि रजस्वला। तदा न मंगलं कार्यं शुद्धे कार्ये शुभे शुभिरिति। अन्य
चूर्॥ मुहूर्त्तलाभे कारिकानिबंधे शंतिकमुक्तं। अलाभे सुमुहूर्त्तस्य रजोदोषे तु संस्थिते। श्रियं संपूज्य तत्कुर्याद्वत्रहत्याभयंकरी। हेमं माषमितां पद्मां श्रीसूक्तविधिनाचरेत्।
प्रत्यृचं पायसं हुत्वाभिषिच्याभ्युदमाचरेत्। सूतिकोदक्ययोः शुद्धोगां दद्याद्धोमपूर्वकं। प्रारब्धे कर्मणि शुद्धा स्यादितरस्मिन्न शुध्यतीति। उदक्याको र्थः रजस्वला। अथ वर्ण
विशेषेण वारविशेषं नक्षत्राणि। लग्नवलेहत्तेनैके नाह। कार्यं न रौद्रे दिनारार्किशनिषु निर्विलैर्यत्र ये स्युर्जसौमेध्यांत्ये घ्यादित्यशाक्रे दुभिरिनदैत्यरितस्वित्रिसूक्ष्मे लकमीति॥ व २५
र्णैः ब्राह्मणादिभिश्चतुर्भिर्यथाक्रमेणइनाराकिंशनिषु चौलकर्म कार्यमित्यन्वयः। इनः सूर्यः। आरो भौमः। आर्किः शनिः। तेषुते एतदुक्तं भवति। विप्रेण रविवारे क्षत्रियेण भौमवा
रे वैश्येन शनिवारे शूद्राणामपि शनिवारे। चौलं कर्त्तव्यमित्यर्थः। शूद्रस्य द्वादशसंस्कारा उक्ताः। वेदव्रतोपनयनमहानाम्निमहाव्रतं। विनाद्वादशशूद्राणां संस्कारा नाममंत्रत इति।
निर्विलैश्चतुर्भिर्वर्णैः॥ अवशेषेस्तु ये स्युर्जसौमेष्ठ शुक्लपक्षगतसोमवारे कार्यं कृष्णपक्षगतसोमवारे गतिनिंदितः। अत्र पापयुतस्यापि बुधस्य वारः प्रशस्तः। अत्र नारदः। अपवीरितो
तिथिषु शुभाय क्रूरे सौम्ये द्वावासरे इति। बृहस्पतिः। सोमवारः सितेपक्षे कृष्णपक्षेतिगर्हितः। बुधवारः शुभः प्रोक्तः पापग्रहयुते बुधे। पापग्रहाणां वारा दोषी विप्राणां शुभदो रवेः। क्षत्रियाणां कुमारस्तो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु॰मा॰टी॰ विद्धूस्रवणं श्रवेः श्रुभइति केः द्धौ लघ्वादित्यश्विर्केंदुभिः। अश्वत्याद्ये इतिध्यांत्यं रेवत्यश्विनोद्ध्यादि संपुनर्वसु पुष्यो शाकं ज्येष्ठा॥ इंदुर्मृगस्तेः पुनः केः इनहरित त्रिभिः। इनो हस्तः हरिः
श्रवणः ताभ्यां ॥ त्रिभिस्त्रिभिः हस्तात्त्रिभिः श्रवणा त्रिभिरित्यर्थः। तथा च नारदः। दस्रादिती ज्यचंद्रेंद्र पूर्वभानि स्थिभान्यतः। चौलकर्मणि हस्तद्वीत्रीणि त्रीणि च विष्णुभादिति। द्यूनेऽर्कीराकि
१२ शुक्राः अत्र चौले सप्तसुदाः द्यूनेस . . न मेऽर्कीराकिशुक्राः अर्कः सूर्यः आरो भौमः अर्कस्यापत्यमार्किः शनिः। शुक्रः प्रसिद्धः। एते चत्वारः सप्तसु दा इति चतुर्णां सामान्य फलमुक्तं। विशिष्टेनात्र विशेषफ
13 लमुक्तं। जामित्रे भास्करे क्षौरे मृत्युः स्याद्भूमिजे तथा। शुक्रे सौख्यविनाशः स्यान्मंदभागं प्रशनैश्चर इति। अत्र चतुर्णामपि सामान्येन मृत्युफलमुक्तं। तद्धारिद्राम्ब . . रणं वरमिति न्यायेनेति न दोषः। भौत
कवित्रिखिलाम सप्तगाः सप्तसुदाः स्युः। अत्र बृहस्पतिः। अष्टमस्थानगाः सर्वे निंद्याः शुक्रविवर्जिताः। शुक्रस्तु निधने क्षौरे सर्वसंपत्प्रदः स्मृतो इति। . . व्यज्ञाः संतोत्स . . इष्टाः विगतः अ . . न्म्य
द्रोयेभ्यस्ते व्यज्ञाः एवं विधाः संतः सप्तसुक्ता इरहिताः सप्तसु हाः तेस्वादशो इष्टाः शोभनाः स्युः। नारदः। चौलान्नप्राशने शस्ताः सौम्यारंध्रव्ययोपगा इति। अन्यच्चान नैधने भे शीतांशौ . . ष
ष्ठांत्य विवर्जित इति। तस्यैव वचनं। अन्यच्च न्मबलं दृष्टदिवत्। गुरु शुक्रीति थिरिक्तान संध्यात्र न इष्टे संध्याप्रसिद्धा तत्परा रात्रिः। एते त्र न इष्टाः क्रूरवारं निशां रिक्तां षष्ठीं संध्यां च जन्मभे। वर्जयेदि . . तिना
रद वचनात्। अथ प्रसंगात्क्षौरनिर्णयं स्तारुद्धष्टे तेनाह। नत्वाद्यौक्षुरंगुनाह। भुक्ताभ्यक्तोपवासी श्वरजन युवति प्राग्वयस्कोऽथ योगी यात्रायुद्धोन्मुखाये कृतदिनविधयो स्त्येवकास्ते न मुंड्याः
सीमंतोर्द्ध्वं न पत्युर्नरवकचलवनं दूरदेशप्रयाणं इक्ष्वाछेदः समुत्थासुतिमृति हरणे वश्यकार्या हितेस्यात्। क्षौरं चौलेऽक्तभावो गदितमघर विद्येत्र गंगाध्वरान्याधानां नाव श्मशानेषु नियत
मइह जीवत्पत्युर्न पिवाधः। भुक्ताभ्यक्तेति। भुक्तः कृतभोजनः। अभ्यक्तः कृताभ्यंगः। उपवासी प्रसिद्धः। ईश्वरजनो राजसेवकः। समर्था वा युवतिः स्त्री सभर्तृका प्राग्वयस्कः प्रथमवय
स्कः पंचाशद्वर्षपर्यंतं पूर्ववयः। योगी राजयोगी यात्रायुद्धोन्मुखः। यात्रा प्रयाणं युद्धं प्रसिद्धं तो प्रति उन्मुखः। यात्रोन्मुखो युद्धोन्मुखश्चेत्यर्थः। अस्त्येवको जीवत्पितृकः। कृते दिन
कर्मश्राद्धिकं येनासो कृतदिनकर्मा एतेऽमुंड्याः मुंडनार्हा न भवंति। अवश्यकार्यादत इत्युत्तरश्लोकोक्तमत्रानुबंधेयं। यत्रावश्यं मुंडनकारणं भवति तत्रावश्यं मुंड्याः। अथ गुर्वि
णीपतेः क्षौरनिषिद्ध प्रसंगादपि निषिद्धं सापवादमाह। सीमंतोर्द्ध्वमित्यादि। सीमंतोर्द्ध्वं सीमंतोन्नयनादूर्द्ध्वं कृतसीमंतसंस्कारायाः। पत्युर्गर्भिणीपतेरित्यर्थः। अवश्यकार्यादितेस्यात्। १२
इत्यनेन आवश्यके न दोष इत्यर्थसिद्धं। यथा पितृमरणे क्षौरादिदेशांतरगमनं इत्यादि विचारणया आवश्यके न दोष इत्यर्थः। कृताग्न्याधानस्य मुंडनप्रयोगीकारो मुंडनमा
वश्यकं मासिमासि उपासनेन कस्य पक्षोपक्षे ग्निहोत्रिणः। अथ उक्तेभ्यो न्येषां क्षौरं धिनक्षत्रादिकमाह॥ क्षौरं चौलोक्तभादौ गदितं चौलार्थं उक्तः। चौलोक्तः। साद्यासौ भादि रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अतस्मिन्नुक्ततिथ्यादिकाले क्षौरं गदितं शोभनं। अथ चौलनिमित्तान्याह। रविक्षेत्रगं गाध्वरागन्याधानमौंजीवांधप्रणाशे शुभ्रनियमः। रविक्षेत्रे भास्करक्षेत्रे गंगा वसिष्ठः। अग्न्याधानं प्रसि
द्धं। गेवाजननीगर्भे वोजनकः अनयोः प्रणाशः मरणं। एषु अनियमः। क्षौरे नक्षत्रादिनियमो नास्तीति। इहा। अत्र रविक्षेत्रादिषु जीवत्पितुरपि न वाधः। जीवत्पितृकस्यापि क्षौरवाधो नास्ति॥
अन्येषां का कथा। उक्तं च बृहस्पतिना। मुक्त्वा भक्ष्यनिराशने रित्यादि। बृहस्पतिः। राजकार्ये नियुक्तानां नराणां भूपसेविनां। श्मश्रुलोमनखच्छेदो नास्ति कालविशोधनं। ज्योतिर्निबंधे। राजयो
गी गुरं श्रीच मातापित्रोरजीवतोः। मुंडनं सर्वतीर्थेषु न कुर्याद्गुर्विणीपतिः। स्मृत्यंतरे। सिंधुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनं। विदेशगमनं चैव न कुर्याद्गुर्विणीपतिः। क्षौरं निमित्तकं कु
र्यान्निषेधे सत्यपि ध्रुवं। पित्रोः प्रेतविधाने च न दोषस्तत्र विद्यते। गंगायां भास्करक्षेत्रे मातापित्रोर्मृते हनि। आधाने सोमपाने च षट्सु क्षौरं विधीयते। अंतर्वत्न्यां तु जायायां तीर्थे क्षौ
रं न कारयेत्। प्रेतवाहादिकं चैव सीमंतोन्नयनादनु। पंचाशत्प्रायनात्पूर्वं क्षौरं नैमित्तिकं विना। न कुर्यात्तत्तदूर्ध्वं तु स्वेच्छया वपनं चरेदिति। अथाक्षरारंभं वृत्तार्द्धेनाह। मित्रार्की
दिती श्रुतिमहरतुरगैः पंचमे देवतास्राक्षव्रतबंधनाख्यः। प्रथमतः विद्यारंभोक्तकाले वक्ष्यमाणलक्षणेऽक्षरविधिः प्रथमं अक्षरारंभः शुभः स्यादित्यध्याहारः। कस्मिन्नक्ष
पातस्मिन्कुंभरहिते उत्तरायणे इत्यर्थः। अयनलक्षणं कर्किमृगादिषट्के ते चायने दक्षिणसौम्ये लः इत्यादि। मित्रमनुराधा अर्को हस्तत्रयं। अदितिः पुनर्वसुः। इंद्रो ज्येष्ठा। अंत
मरेवती हरिः श्रवणः तुरगोऽश्विनी। एभिर्नक्षत्रैरक्षरस्वीकरणं शुभं स्यादित्यर्थः। मौंजीबंधनात्प्रथमतः चौलोपरि पंचमे वर्षे मौंज्यपि उक्ता भवति। अतो मौंज्या परिउर्वरि
तस्य पंचमवर्षस्य संदेहे व्रतान्मागित्युक्तं। द्वितीयजन्मतः सर्वमारंभेनाक्षरग्रहणं सुधारिति बृहस्पतिवचनात्। अनन्तसिंहः। अक्षरस्वीकृतिः प्रोक्ता प्राक्ते पंच मणायने। उत्तराय
णे गते सूर्ये कुंभमासं विवर्जयेत्। विश्वामित्रः। हस्तादित्यसमारमित्रपुरुजित्पौष्णाश्विचित्राच्युतेध्वाराकर्क्षिशादिनोदयादिरहिते रवौ स्थिते चोभये। पक्षे स्वर्णनिशाकरे प्र
तिपदं रिक्तां विहायाष्टमीं षष्ठीमष्टमपर्वभाजि भवनेशोकोऽक्षरस्वीकरइति। अथ पट्टसन्धानविशेषमुत्ववंगोर्णं च व्रतबंधकाले वृत्तेनाह। विप्रादेर्गर्भतो वृष्टप्रिवेरवेविमि
ते जन्मतो वा व्रतं स्यादत्रानिष्टे पिजीविरनिमिषरविमध्ये कार्यमष्टस्यदाद्यात्। स्वाष्टदूर्ध्वक्रमाद्वा गुणितशरदोर्निद्यमष्टक्रमेण पंचाष्टांकाष्टतो वा प्रपवनरु
चितः श्वस्त्वमेषां तदाहुः। गर्भतः गर्भाधानात् जन्मतो वा अष्ट्रिवरविमिति अष्टे विप्रादेर्व्रतं स्यात्। विप्रस्याष्टमे क्षत्रियस्यैकादशमिते एकादशे स्यात्। वैश्यस्य रविमिते द्वा
दशे वर्षे स्यात्। अत्र स्वस्ववर्षे जीवे गुरौ शुभे सति व्रतं कार्यं। कः। अनिमिषरविमध्ये। अनिमिषे रविः अनिमिषरविः अनिमिषस्य नरविणा विषशो मधुः अनिमिषर

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु·मा·टी·

ब्राह्मणस्य ॥ एकादशवर्षो द्वाविंशतिवर्षपर्यंतं क्षत्रियस्य । द्वादशवर्षाच्चतुर्विंशतिवर्षपर्यंतं ४ ५

विमधुस्तस्मिन्नग्निमिषो मीनः । मीने रवौ सति चैत्रे व्रतं कार्यमिति पर्यः । कुतः प्राष्टस्य दाद्यात् । वर्षस्य बलात् । तदुक्तं संग्रहे । शुद्धिर्न विद्यते यस्य वर्षे आष्टमे यदि चैत्रे मीन

गते भानौ तस्योपनयनं शुभं । जन्मभाद्दुष्टगे सिंहे नीचे वा शत्रुभे गुरौ । मौंजीबंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ । अष्टमे दुष्टग्रहाः सर्वे शुभगोचरगा [illegible] अपि । शांतसभावाष्टमं

२७ नैव यायात्सष्टः कालमस्तकवत् । इति त्रियोगेण कालमाह । ब्राह्मणादूर्ध्वं क्रमादिति । ब्राह्मणात्स्ववर्षादूर्ध्वं क्रमात् आद्विगुणितशरदः । द्विगुणिता यासौ शरच्च द्विगुणितश

रत् । वर्षं तामर्यादीकृत्येति तिष्ठात स्माः आष्टक्रमेण निंद्यं एतदुक्तं भवति । ब्राह्मणादूर्ध्वं द्विगुणितस्ववर्षपर्यंतमष्टक्रमेण निंद्यो । तद्यथा । ब्राह्मणस्याष्टमं वर्षमुक्तं तद्

14 द्विगुणितं षोडशवर्षं अष्टमवर्षात् षोडशवर्षपर्यंतं वैश्यस्य अष्टक्रमेण उत्तरोत्तरं निंद्यं । अर्थादत ऊर्ध्वमनधिकारिणो भवंति । उक्तं च संग्रहे । नृपाकृतिजनाष्टं तं नातिका

लसतः परं । पातित्यं स्यादनजादेः ब्रात्यस्तोमो विशोधनमिति । तथा च कात्यायनगृह्ये । आषोडशाद्वर्षाद्ब्राह्मणस्यानातीतः कालो भवत्याद्वाविंशात् क्षत्रियस्याचतुर्विं

शाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवंति । नैनानुपनयेयुर्नाध्यापयेयुर्न चैभिर्व्यवहरेयुः कालातिक्रमे नियतवत्त्रिपुरुषं पतितसावित्रिकाणामपत्ये संस्कारो

नाध्यापनं च तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवंति । अथ च स्वा [illegible] ष्ठात्त्रागपि प्रथमपनोत्कर्षात् । उपनयनकालमाह । पंचापष्टेन्द्रको

ए छतो वा पंच वाष्टमनवमवर्षेष्वपः स्वकाशादेषां ब्रह्मक्षत्रविशां क्रमेण प्रपवनरुचितः वेदादिपठनरुच्या तद्व्रतं प्रशस्तमाहुर्मुनयः । उक्तं च संग्रहे । ब्रह्मवर्चसकामस्य विद्यायुःश्रीयशः

सुखं । विप्रादेरुपनीतस्य पंचाष्टकैश्च तः फलमिति । अथात्र गुरुबलाबलं वृत्तेनाह । राशेरिति । एषोः षट्त्र्याद्यवस्थोद्दाः ३।७।१० गुरुरिह शुभदः स्वजयास्यात्पापिष्ठं

वैं बुस्यो ४।८।१२ मो नो यदि निजगृहगस्तुंगगो वापि प्रशस्तः । एवं कन्यार्कतः स्यादतितरगुणितो लब्धयेत्रातिकाले निषेपीह द्विजर्क्षे समभवनगतः शोभ

नः स्यात्त्रिरर्च्यः ॥ राशेः जन्मराशेः सकाशात् षट्त्र्याद्यवस्थो गुरुः । दशलग्निब्रतबंधे स्वजयाशुभदः स्यात् । अन्यथा नेत्यन्वयः । षट् षष्ठं त्रय स्तृतीयं आ २७

द्यं जन्मराशिः खं दशमं एषु तिष्ठतीति तथापि स्वपिरां सो ह्यादश । अंबुस्य चतुर्थः अष्टमः नो शुभदः स्यात् । स्वयोजे पित्र शुभः स्यादित्यर्थः । सय

दि निजगृहगः स्वगृहगतः धनुर्मीनस्थ इत्यर्थः । तुंगगो । वापि मवति । तदा इह दुष्टस्थानेषु वर्तमानः प्रशस्तः स्यात् । कन्यार्कतः कन्याराशेः सकाशात् । एवं

उक्तवत् शुभाशुभः स्यात् । अतितरगुणितो वरस्य लब्धये अतिकाले वा अनिषेपि गुरौ दशचतुर्थाष्टमः द्विरर्च्यः षट्त्र्याद्यवस्थस्य शुभस्यैव याहजो रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्मात्तमाणतो द्विरर्चाः। तेन द्विगुणार्चने न दोषो भवेत् स्यात्। अत्र बृहस्पतिः। झषचापकुलीरस्थो जीवोप्यशुभगोचरः। प्रतिश्लोभनतां दद्याद्विवाहोपनयादिषु। व्रते जन्मनि रवौ स्थिते जीवे
वोपि दोषो चेन्नास्ति कृतम्। शोभने तिथिकाले तुर्याष्टव्ययस्थोपि द्विगुणार्चनात्। उद्वाहव्रतयोः कन्यावटौ द्विसुतस्य तुर्नायने दशमेष्टमे दोषो गुरुः शस्तान्यथा। इज्यो शंतः १२ सुखे ४ तिकालदहनु प्राप्तो द्विरर्चाः
शुभः। रिष्टोद्युत्रिधनाष्टगेयदि खगैः श्रेष्ठो पिविद्धो ह्यसद्धामं विद्धः दहेद्दोनं निधने वेधस्थिरर्चाः शुभः। इतिअपगुरौ भवेधमाह। दीपिकायां गांक २।५।११।७। एषु संस्थो यदि शु
भदन २ तुर्या ४ ९ ८ व्ययगेनौ विद्धो नि दोषोपि वामं शुभद ६ खचरैर्वेधितो नाष्टमस्थः। दीपिकायां गांक संस्थो गुरुरिह शुभदः स्यात्तदा तदा कदापि दिन २ तुर्या ४ ९ ८ व
ययगैः १० खचरैर्नो विद्धः स्यात्। दोषी द्वितीयं द्युः पंचमं आयणं कादशं। तुर्यं चतुर्थं अष्टमं व्ययस्तृतीयं भं दशमं एतत्संस्थैः खेचरैर्यदि विद्धो न भवति तदा शुभः ।
स्पात्।त शुभः स्या श्रेदसौ शुभः स्यात्। अनिष्टोपि द्विजस्तु दोषवद्व्ययगो पिवामं विद्धः सन्। दीपिकायां संस्थैः खेचरैर्वेधितः सन् त्यर्चाः। इह स्मिन् व्रतबंधे विवाहेना
त्। जो ष्टमस्थः वेधितो पिन शुभः स्यादित्यर्चाः। सो तिकालादौ त्रिगुणं वंदनादेः शुभः स्यात्।तथाच बृहस्पतिः। रजस्वलायदा कन्या गुरुशुद्धिं

२	११	७	·९	·९
१२	·४	·३	१·	१०

न चिंतयेत्। अष्टमेपि प्रकर्त्तव्यो विवाहस्त्रिगुणार्चनात्। इति। अथोपनयने मासादीनाह। शुक्ले माघादि पंचस्विन शुभ दिवसे प्राग्दले द्वितो व्रतं सत्यक्तानध्यायरिक्तातिथिमुनिमद
नांश्चंद्रभागं प्रदोषं। शुक्ले माघादिपंचसु मासेषु शुक्ले पक्षेद्युः। इनः सूर्यः वर्द्धमानेंदुबुधगुरु शुक्राः एषां दिवसास्तस्मिन्प्राग्दले एवं हि
व्रतं उपनयनं सतं शुभं स्यात्। अनध्यायादीन्सत्यक्ता। अनध्यायाश्चाव प्रतिपमाणोरिक्ताः स्तिथयश्च तुर्थी नवमी चतुर्दश्यः
मुनिः सप्तमी मदन त्रयोदशी चंद्रभागं कर्कटांशं पापांशादिकं प्रथममेव निषे धितं प्रदोषोनध्याय प्रकरणे कथ्यते
अथ मौंजीनक्षत्राण्याह॥ यामाग्नेय द्विदैवेंद्र पितृभरहिते भैः शुभो मौंजिबंधो देवेशो त्वेव लोक गुरुसितकुजसौम्याः क्रमा
द्वेदपाः स्युः। सौम्याः स्वोच्चस्वभांशेऽक्रति पतिरपि चेत् केंद्रको णस्थितश्चेद्वर्णी वेदार्थवेत्ता गुरु पशुधनवान् अन्यदंतः सेवी॥
याम्यं भरणी। आग्नेयं कृत्तिका। द्विदैवं विशाखा। इंद्रो ज्येष्ठा। पित्र्यं मघा एभिः पंचभिर्भैः रहितैरखिलैर्मौंजीबंधः शुभः स्या
त्। उक्तं च॥ मघा च भरणी ज्येष्ठा विशाखा चैव कृत्तिका नक्षत्रपंचकं प्राज्ञैर्नग्राह्यं व्रतबंधने इति। कस्मिन्सति। देवेशो देव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वं·
मु.मा.टी. पत्नौ त्वे बुधे बलाद्वे सति स्थानादिबलसमन्वे सति। ते के। वेदेशा इत्यपेक्षायामाह। गुरुसितकुजसौम्याः क्रमाद्वेदपाः स्युः गुरुः ऋग्वेदस्य। शुक्रो यजुर्वेदस्य। कुजो भौमः सा
वं.२ मवेदस्य। सौम्यो बुधोऽथर्ववेदस्य पतिरित्यर्थः। अथ लग्नगोचरमाह। सौम्याद्विति। सौम्याः स्वोच्चस्वभांशे वर्त्तमानाः श्रुतिपतिरपि वेदपतिरपि स्वोच्चस्वभांशे वर्त्तमानः
मं च अंशाधिभांशे स्वस्य भांशे स्वभांशे स्वोच्चे च स्वभांशे च स्वोच्चस्वभांशे तस्मिन्वर्त्तमाना अथ यदि केंद्रत्रिकोणे स्थिताः स्युस्तदा वर्णी ब्रह्मचारी वेदार्थवेत्ता स्यात्।
२५ नकेवलं वेदार्थवेत्ता स्यात्। अपि तु गृहपशुधनवान्स्यात्। अत्र केंद्रत्रिकोणे मंदे शनौ सति अंत्यसेवी अंत्यजसेवकः स्यात्। न केवलं वेदार्थवेत्ता स्यात्। अपि तु गृहपशु
धनवान्स्यात्। तस्मात् केंद्रत्रिकोणे शनिर्न भवितव्यः। उक्तं च संग्रहे। केंद्रस्थिते रिनाद्यैर्न्त्यसेवी विट्क्रियास्त्रवृत्तिश्च। वेदाभ्यासी यज्वा क्रतुकर्त्ता हीनसेवको भवति। लग्न।
15 भंगोत्र इत्तार्द्धेनाह। चंद्रक्रूराविलग्नेशाश्रितसिततनुपाः षष्ठगेहे सितांशे सर्वे रंध्रे वटुघ्नाः कुचतनुगइनः श्रेष्ठउच्चे दुरेके। चंद्रक्रूराविलग्नेस्य षष्ठाश्रितसिततनुपाः षष्ठगे
हे सितः शुक्रः शेषं सुगमं॥ सितांशे स्पष्टं। सर्वे रंध्रे रंध्रमष्टमं स्थानं एते प्रत्येकं वटुघ्नाः वटुमारका भवंति। कुच कश्चिदन लग्नात्तनुगः लग्नगतः इनो रविः श्रेष्ठः स्यात्। त
दुक्तं मौंजीपटले। शुभदो वलवान्भानुर्लग्नगो दशमस्तथा। सर्वशाखाधिपो यस्मात्सर्वेषां व्रतबंधने। सर्वशाखाधिपो भानुः केचिदूचुर्महर्षयः। तस्मात्तत्तंत्र राभावे
लग्नस्थोऽर्कः प्रशस्यत इति। उच्चे दुरेके। एके मुनयः उच्चेंदुः उच्चस्थचंद्रो तनुगः श्रेष्ठ इति वदंति। तद्वाक्यं। चंद्रोदये भिशस्तः स्यात्क्षयरोगी सितेतरे। सिते पक्षे भवेद्य
ज्वा स्वमे तुंगे विशेषतः इति। अस्यार्थः। सितेतरे सितादितरः सितेतरः कृष्णपक्ष इत्यर्थः। तस्मिन् चंद्रोदये उदये चंद्रांशे चंद्रोदयं तस्मिन् कश्चिदमाद्यंतस्य परत्वं। उदयो
लग्नं लग्नस्थे चंद्र इत्यर्थः। व्रती अभिशस्तः स्यात् क्षयरोगी स्यात्। अभिशस्तो नाम मिथ्याभिशस्तः मिथ्याभिशंसी अनेनेदं पातकं कृतमिति लोके मिथ्या वदंति। स अ
भिशस्तः। एवंविधः स्यादित्यर्थः। क्षयरोगी च स्यादिति कृष्णपक्षे लग्नस्थे फलमुक्तं॥ सिते पक्षे भवेद्यज्वा इत्यादि। अयं श्लोकः पुनः संस्कार इव भाति। यतः कृष्णपक्षे २५
व्रतबंधे लग्नस्थचंद्र फलमुक्तं। तस्य दिवा असंभवात्। पुनः संस्कारार्हस्य तु कर्मलोपभयात्। रात्रावपि संस्कारो विहितो नान्यस्य। प्रथमव्रतबंधस्तु सर्वैर्ग्रंथिकारै
र्दिवैव विहितोऽस्ति हि॥ न रात्रौ अतः कारणादिदं वचनं पुनःसंस्कारविषयं प्रतिभाति। पुनःसंस्कारनिमित्तानि रासभारोहणादीनि धर्मशास्त्रप्रसिद्धानि। नाद्वरोवा
क्यं ग्रंथांतरे दृश्यते। दृषट् खगोर्कस्त्रिधनास्तकर्मगः श्चेंद्रस्त्रिषष्ठाः शनिराहुभौमाः। सर्वे चलामेद्धित्रिकोणकेंद्रगाः शुभाः शुभ स्युर्व्रतबंधकाले इति। अत्र तृतीयस्य राम:
भा:१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

षष्ठस्य सूर्यस्य राशिगतलग्ने संभवः। नारदेन तु लग्नस्य चंद्रो निंदित एव। तद्वाक्यमेवं। स्वोच्चसंस्थोपि शीतांशुस्त्रितीयो यदि लग्नगः। तं करोति द्विजं निःस्वं संततं व्याधिरोगिण
मिति। अन्यान्यलग्नबलं दृष्टव्यं। अथ विद्यारंभं वृत्तार्द्धेनाह। विद्यां मौंज्युक्तकाले स्थिरचरहरिजन्म्युत्तराद्रासहीने मौंज्या ऊर्द्ध्वं गणेशं गिरमपि विधिवत्पूजयित्वारभेत। मौंज्या ऊ
र्द्ध्वं मौंज्युक्तकाले विद्यामारभेत्। मौंज्यर्थमुक्तः समासो कालः तस्मिन् विद्यां वेदं शास्त्रं आरभेत्। मौंज्यास्तु कृत्यम् अनधिकारः सूचितः। किं कृत्वा। गणेशं गिरमपि सरस्वतीमपि वि
धिवत् विधियुक्तमार्गेण पूजयित्वा। कथंभूते मौंज्युक्तकाले स्थिरचरहरिजन्म्युत्तराद्रासहीने स्थिरं चरं हरिजं स्थिरं चरं लग्नं तिसृणामुत्तराणां समाहारस्त्र्युत्तरं द्रासः एते हि
णी एभिर्हीने रहिते मौंज्यर्थमेतानि गृहीतानि। विद्यारंभेन ग्राह्याणीत्यर्थः। द्व्यंगे लग्ने तु विद्याप्तिः स्थिरे जाड्यं चरे भ्रमः इति श्रवणात्। अथ केशांतमौंजीविमोचं च वृत्तार्द्धेनाह
केशांतं चौलवत्स्यान्नृपमितशरदी त्याहुराय व्रतोक्ते काले मौंजीविमोक्षं गुरुबलमनयोर्नो बलं चंद्रसुधीभिः। केशांतं कर्म नृपमितशरदि षोडशे वर्षे चौलवत्स्यादि
त्याहुः। सर्वं चौलोक्तमत्र ग्राह्यमित्यर्थः। व्रतोक्ते काले मौंजीविमोक्षमाहुः सुगमं। अ नयोः केशांतमौंजीविमोक्षयोः गुरुबलं सुधीभिः ना बलं चंद्रं। सर्वत्र त्याज्यम
करलोकं विलोक्यं।। अथ भूभृत्सुतस्य मौंज्यभावात् छुरिकाबंधं वृत्तार्द्धेनाह। क्षत्राणां मौंज्यभावात्तदुदिततिथिभे नक्तभौमेज्यशुक्रैर्वारे वारे लवे मासुपयमविहि
ते छुरिकाबंधमाहुः।। क्षत्राणां मौंज्यभावात् तदुदिततिथिभे मौंज्युक्ततिथिनक्षत्रे। नक्तभौमेज्यशुक्रैः। उदितैर्भौमगुरुशुक्रैः। वारे वारेशांशे भौमसूर्यक्रोदिते वा
रे। लवे नवांशे यज्ञेऽपि लग्ने भौमनवांशवर्जित इत्यर्थः। उपयमनविहिते मासि विवाहोक्तमासे छुरिकाबंधनकर्मप्रदेशे छुरिकाबंधनं मुनयः। तथा च संग्र
हे। क्षत्राणां राजपुत्राणां मौंज्यभावे छुरिकाबंधनं। मौंजीबंधोक्ततिथ्यादौ कार्यं भौमदिनं विनेति। तथा च नारदः। छुरिकाबंधनं वक्ष्ये नृपाणां प्राक्करग्रहात्। विवा
होक्तमासे शुक्लपक्षे प्यनस्तगे। जीवे शुक्रे च भूपुत्रे चंद्रताराबलान्विते। मौंजीबंधर्क्षतिथिषु कुजवर्जितवासरे। तेषां नवांशके कर्तुरष्टमोदयवर्जिते। शुद्धे र
विधौ लग्नषडष्टांत्यविवर्जिते। धनत्रिकोणकेंद्रस्थैः शुभैस्त्र्यायारिगैः परैः। छुरिकाबंधनं कार्यमर्चयित्वा द्विजान्पितॄन्। अर्चयेच्छुरिकां सम्यग्देवतानां च स
न्निधौ। ततः सुलग्ने बध्नीयात्कट्यां लक्षणसंयुतां। तस्यास्तु लक्षणं वक्ष्ये ध्वजाये धनवान्भवेत्। धूम्राये मरणं सिंहे जयः श्वाये निरोगता। धनलाभो वृषे संततं दुःखी भवति
गर्द्दभे गजाये संततं प्रीतिर्ध्वांक्षे वित्तविनाशनमिति।। ।। ।। इति श्रीकृतमुहूर्तमार्तंडटीकायां गर्भाधानादिसंस्कारप्रकरणम्।। ।। अथ विवाहप्रकरणं विव।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

द्वक्त्यात तद्घटितं गुणविचारं चाददशत्तैराह। कस्मिन् करणे वर्णो योधोत्तरं विना सर्वाणि ग्रंथराहरन्तानि। अथ विवाहप्रकरणं। अथ गोत्र कुलादिभिर्गुणयुतां
कांतां वरश्चोद्वहेत्। वर्णो वश्यभयोनिखेचरगणाः कूटं च नाडी क्रमात्। वर्णाद्या वलिनो यथोत्तरमहो दूरं दिग्गुणे कंधुभं वली बिंबमुखो सषादिह वरो वर्णोत्तमः
२६ स्याच्छुभः। अतः परं ग्रंथे सर्वाणि शार्दूलविक्रीडितानि। वरं गोत्रकुलादिभिः। अथ कां तां कन्यां उद्वहेत् विवाहयेत्। चकाराद्वरो प्येवंविधो भाव्यः। गोत्रशुद्धिर्ग्रंथी
16 तराज्ज्ञातव्या। कुलमपि। सप्तमीपंचमी निर्णयमपि। एतत् द्वयं ग्रंथांतराज्ज्ञात्वा अन्यदत्रावलोकयेत्॥ अथ यथोत्तरवलिष्टं घटितक्रममाह। वर्ण इति। वर्णः १ वश्यं २ भं ३
योनि ४ खेचर ५ गण ६ भकूटं ७ नाडी ८ क्रमात्। वर्णाद्या यथोत्तरं वलिनः स्युः। अहो दूरं दिग्गुणे कंधुभं॥ अष्टादशाधिकं गुणे कं धुभं यथोत्तरं स्यात्। तत्रादौ वर्णमाह।
शेषास्तमीनात्सकोशात् ब्राह्मणाद्यो वर्णाः पुनः पुनः गणनया ज्ञेयाः। तद्यथा। मीनो ब्राह्मणः। मेषः क्षत्रियः। वृषो वैश्यः। मिथुनं शूद्रः पुनः कर्कः क्षत्रि इत्यादि। एत
स्मिन्वर्णे त्तमः वरः शुभः स्यात्। कन्यापि त्तया वर्णोत्तमः वरः शुभः स्यात्। नान्यथेत्यर्थः सिद्धं। अथ वश्यं वृत्तार्द्धेनाह। नृमत्स्याजलजा वश्या विहरयो वश्यं विकौ परिहि
रेरस्याली नश्च मानुरजहरयोनिश्च नुरन्यज्ञानात्। नुः नरस्य जलगाः जलचराः मत्स्याः तस्यैव विहरयः सर्वे वश्याः विगतो हरिः सिंहो येभ्यस्ते तथा सिंहरहिताः
सर्वे वश्या इत्यर्थः। हरेः सिंहस्य वश्याः कौर्प्यो वृश्चिकः विगतः कौर्प्यो येभ्यस्ते विकौर्प्याः सर्वे राशयः। सिंहवृश्चिकरहिताः सर्वे राशयो वश्या इत्यर्थः। अस्यानंत
रोक्तस्य हरेः अलिर्वृश्चिको न शुभः वैरी त्यर्थः। अन्यज्जनादन्यद्वश्य भक्ष्यादिकं ज्ञेयं। नुः मनुष्यराशेः अजहरयो ने ष्टाः स्युः। अजाजलजा हरिः सिंहः एते नेष्टाः
मेलनं न कर्त्तव्या इत्यर्थः। मनुष्यस्य गोर्वश्या भवति। अत्र परस्परं मित्रत्वं च दृश्यते। तस्माद्नयोर्मैत्री स्यात्। इदं म्लेछजातीयवधूवरयोरशुभं म्लेछानां गो
मेध्यमिति वं लोकप्रचारतोपि विचारणीयमित्यर्थः। राशिस्वरूपं जातकग्रंथादवगंतव्यं। तद् जातके। मत्स्यो घटी नृमिथुनं सगदं सवीणं चापी नरो ऽश्वज रा॰३
घनो मकरो मृगास्यः। तौली ससस्यदहना प्लवगा च कन्या शेषाः स्वनामसदृशाः कथितास्तु तज्ज्ञैः। इति। अथ भयोनी द्वावपि वृत्ताभ्यामेकेनाह। भे गरोपि कहस्ते भिय २६
स२ स्त्रगशरः श्रीपैत्र्य स्वाम्बिभादस्वेभाव्य हि मो गिनश्चंद्रवभुजगृषाखुमृक्यंधुरा। गोकालीयश्चमुखूर्नहि ष्वष्यश्च द्विट् द्विमृगो श्वाक विद्वैविरमूकपिसिंह
वाजिहरि गोनागाः क्रमाद्योनयः। भेगणे इति। मिथः परस्परं वधूवरयोर्भनक्षत्रेगणेपे। वधूनक्षत्रात् वरनक्षत्रं गण्यं। वरनक्षत्राद्धूनक्षत्रं गण्यं। रामः
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उभे अपि चेत्क हतेनवमाजितेकार्यीशो यंचेत्। अ गणाः त्रिसप्तपंचभवति। तदा असतनशोभनंस्यात्। अथ योनिमाह। अश्विभादितिः अश्विभाद्श्विनीसकाशा
त्स्नानांअश्वादयोयोनयोभवंति। द्रुनोहस्तीभरण्याः। आविर्मेषः कृत्तिकामाः। अहिः सर्पोरोहिण्याः। भोगीसर्पोमृगस्य। श्वा श्वानआर्द्रीयाः। हकभुकू उदुंदुरं
पुनरुक्तीतिहकभुक्मार्जारः पुनर्वसोर्मेषः अस्तिद्रुः पुष्यस्य। आखुभुक्मार्जारो अश्लेषायाः। द्वं दुरोद्वो उंदुरोमघापूर्वाफाल्गुण्योः। गोरुत्तराफाल्गुण्योः। काली
महिषीहस्तस्य। पशुभुक्व्याघ्रश्चित्रायाः। महिषीस्वात्याः। पशुद्विट्व्याघ्रोविशाखायाः। द्वौमृगोअनुराधाज्येष्ठयोः। श्वामूलस्य। कपिर्वानरः पूर्वाषाढायाः।
द्वौवभ्रूउत्तराषाढाभिजितोः। कपिर्वानरः श्रवणस्यसिंहः केसरीधनिष्ठायाः। वाजीअश्वःशततारकायाः। हरिः सिंहः पूर्वाभाद्रपदायाः। गोरुत्तराभाद्रपदा
याः। नागोहस्तीरेवत्याः। इति योनिमभिधा ...ययोनिवैरमाह॥ सिंहेभंमहिषाश्वमोतुखनकंश्वैणंतुकीशाविगोव्याघ्रंवभ्रूफणीतिभीरुवरयोश्चैव्यप
योश्वत्यजेत्॥ सिंहेभंसिंहगजंएवंमहिषाश्वं। ओतुखनकंमार्जारोंदुरं। श्वैणं श्वानमृगं। कीशाविवानरमेषं। गोव्याघ्रं। वभ्रुनकुलसर्पं॥ इतिवैरं॥ भीरुवरयोः
वधूवरयोः वश्यैशयोः वश्यः सेवकः ईशः स्वामीतयोअत्यजेद्वर्जयेत्। अथग्रहवैरावैरं विवक्षुस्ताविदाशिनाथानाह। मेशामसुबुचरबुसूमगुशाशोगुक्रि।
यात्सूरवेर्मित्राणीज्यकुजेंदवःशनिसितौशत्रूविधोर्नोरिपुः। मित्रेसूर्यबुधौकुजस्यविदरिः सूर्येंदुजीवाहिताज्ञस्यार्कसुजितौहितौविधुररिः सूरेः सितज्ञा
वरी। मित्राण्यर्ककुजेंदवोथभृगुजस्यारीरवींदूहितौमंदज्ञौचशनेः कुजेंदुरवयोनेष्टाः सितज्ञौहितौ। पूर्वोद्दीतककोत्तरंनरिपुरेकोत्यादितीज्य
४५ निलेंदुश्रुत्यश्विमित्रमन्यदसुरेंदेसौर्न्दणंस्यान्मतिः॥५॥ क्रियान्मेषात्सकाशाद्राज्ञोराशीनांईशाः ...मेशाः एतेक्रमेणस्युः। मंमंगलोमेषस्य॥ अथश्लो
वृषस्याइत्यादिस्पष्टं। रवेःसूर्यस्यईज्यकुजेंदवोमित्राणिईज्योगुरुःकुजोभौमः इंदुश्चंद्रः एतेमित्राणिसुहृदः। शनिसितौशत्रूवैरिणौ। अर्थादन्येउदा
सीनाः। विधोर्नोरिपुः विधोश्चंद्रस्यारिपुर्नास्तिसूर्यबुधौमित्रे। अन्येसर्वेउदासीनाः। कुजस्यभौमस्यवित्तनु...धोरिःवैरीसूर्येंदुजीवाःहिताःमित्राणि।
अन्योसमौ। ज्ञस्यबुधस्यअर्कसुजितौरविशुक्रौहितौमित्रेविधुश्चंद्रोरिःवैरीअन्येसमाः। सूरेःगुरोःसितज्ञौशुक्रबुधौअरीवैरिणौ। अर्ककुजेदवःर
विभौमचंद्राः मित्राणिअन्यःसमः। भृगुभुवःभृगोःभवतीतिभृगुभूस्तस्यभृगोःशुक्रस्यरवींदूसूर्यचंद्रौशत्रूवैरिणौ। मंदज्ञौशनिबुधौहितौमित्रे।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अन्यौ समौ शनेः कुजे दुरवयः वैरिणः सितज्ञौ मित्रे अन्यः समः। अथ गणमाह। रवेंति। रवी स्ति स्वः आर्द्रा च सिद्धा। अंतकं भरणी। कोरो हल्ली। उत्तरास्तिस्रः। एतन्नक्षत्रन
वकं नरि भवति नरगण इत्यर्थः। अर्को हस्तः। अंत्यं रेवती। अदितिः पुनर्वसुः। ईज्यः पुष्यः। अनिलः स्वाती। इंदुर्मृगः। श्रुतिः श्रवणः। अश्विनी प्रसिद्धा। मैत्रम् अनुराधा। एत
७ न्नक्षत्रनवकं सुरे देवे भवति देवगण इत्यर्थः। अन्यद्धुरितं नक्षत्रनवकं असुरे भवति दैत्यगण इत्यर्थः। दैत्ये नृणां मृतिर्भवति। देवासुरयोः देवदैत्ययोः
17 कलिः स्यात्। नरामरयोर्नृदेवयोः मध्यः स्यात्। स्वयोर्मेले सौहृदं स्यात्॥ अथ भकूटमाह। नैस्वं द्विव्ययके इति। द्विव्ययके द्विर्द्वादशे नैस्वं। निस्वस्य भावो नैस्वं निर्धनत्वं स्यात्
षडष्टके विपत् मरणं स्यात्। वै पुत्रमर्थांकके पंचमनवमे वैपुत्र्यं अनपत्यत्वं स्यात्। शेष उर्वरितत्रितीये एकादशे चतुर्थदशमे उभयसप्तमे एकद्वेऽपि विधार्थः धन
ऊतपश्चादयः स्युः। कथं मृतेरो थे विभैकचरणे विगतं भैकचरणं नक्षत्रैकचरणं यस्मात् तत्तथा तस्मिन्नक्षत्रैकचरणे कूटेऽनिष्टफलं स्मृत्यते। एकराशौ शुभो द्विहे
एकभांशे मृतिप्रद इति। एकर्क्षस्य चत्वारो भेदाः। एकराशि भिन्नर्क्षीण एकर्क्षभिन्नराशिकं। एकराशि नक्षत्रचरणं एकराशि नक्षत्रचरणं चेति। च भिन्न
त्वारो भेदास्तत्रैकराशि नक्षत्रचरणं निंदितं विभैकचरणमिति। अथ शुभे कूटे यद्भिन्नर्क्षराश्येकं यत्र भिन्नांशकं भं एतयोर्गणखगे न दूरे नाडिखेटौ चन
हि। अत्र किमपि नावलोक्यं शुभमित्यर्थः। नदूरवत् समानं भिन्नांशकं भमिति भेदद्वयमागतं भवति। एकर्क्षभिन्नराशिकं अपरं एकराशि नक्षत्रभिन्नचर
णं त्वस्त्कां त्रिशुभेदेषु गणादिकं न चिंतयेत्। तत्र गणादिदोषस्य सत्त्वेऽपि शुभं स्यादित्यर्थः। उक्तं च बृहस्पतिना। एकराशौ पृथग्धिष्ण्ये पृथग्राशौ तथैकभे।
गणनाडीनदूरत्वं ग्रहवैरं न चिंतयेत् इति। दंपत्योरेकनक्षत्रे भिन्नपादे शुभावहं। दंपत्योरेकपादे तु वर्षांते मरणं ध्रुवमिति। अथ पंचधा षडष्टकं द्विर्द्वाद
शं चाह। षडष्टके समभं च षष्टसहितं चेच्छोभनं स्यात् समं भं द्विर्द्वादशकं द्वितीयसहितं श्रेष्ठं स्त्रिया युक्तहरिः मूले प्राक्भपादेकचरणादित्या यमे ७
शाश्विभे यान्यदिवौ ज्यभभाग्यमित्र वसुभत्वाष्ट्रां तु हितं ध्रुवमेः॥७॥ षडष्टेति। समभं वृषककर्कन्यादौ चेद्यदि षष्टसहितं स्यात्तदा शोभनं स्यात्। ग्राह्यं स्या
दित्यर्थः। तद्यथा। वृषः समभं तस्मात् षष्ठस्तुलाधारणसहितं यदि भवति तदा न तत् ग्राह्यं स्यादित्यर्थः। तत्स्वामिनो मैत्रीभावात्। समभं अष्टमेन रामः
सह न ग्राह्यं। एवमेव ग्राह्यं विलोकयेत्। अथ पंचधा द्विर्द्वादशमाह। द्विर्द्वादशके समभं द्वितीयसहितं चेद्यदा भवति तदा श्रेष्ठं शोभनं स्यात्। विपरी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तमस्मान्न सत्। तत्र सिंहे विशेषमाह। स्त्रियायुग्धरि इति। विषमो विसिंहः। स्त्रियाकन्यायायुक्तयुक्तः श्रेष्ठः। अथ नाडीमाह। मूलेन्द्राकेभपाशजैक
चरणादित्यार्यमेशाश्विभेयाम्येंदीज्यभभाग्यमित्रवसुभत्वाष्ट्रांबहिर्बुध्न्यभैः। अन्येर्नाड्य इहैकनाडि नवकेस्यात्तां द्विभे चेन्नरतिर्गोदादक्षिणतः
कचिन्नपसुखानां पार्श्वनाड्यां हितं॥ मूलेति॥ अत्रश्लोके तृतीयांतैस्त्रिभिः पादैस्तिस्रो नाड्यः सूचिता मूलं प्रसिद्धं। इंद्रो ज्येष्ठा। अर्को हस्तः। पाशी शततारकः
। अजैकचरणः पूर्वभाद्रपदा। आदित्यः पुनर्वसुः। अर्यमा उत्तराफाल्गुनी। ईशः आर्द्रा। अश्विभं अश्विनी। एभिर्नवभिर्नक्षत्रैरेकनाडी भवति। याम्यं भरणी
इंदुर्मृगः। ईज्यभं पुष्यः। मित्र अनुराधा। भाग्यं पूर्वाफाल्गुनी। वसुभं धनिष्ठा। त्वाष्ट्रं चित्रा। अंबु पूर्वाषाढा। अहिर्बुध्न्यमुत्तराभाद्रपदा। एभिर्नवभिरेकनाडी भव
ति। अन्यैरुर्वरितैर्नवभिरेकनाडी भवति। एवं तिस्रो नाड्यो भवंति। इह विवाहविषये यदा एकनाडीनवनवके द्विभे द्वयोर्वधूवरयोर्भं नक्षत्रं चेत्स्यात्तां तर्न दाम
तिमरणं स्यात्। अथ गोत्तम्या दक्षिणदेशे। क्षत्रियादीनां अन्यवध्वाः अलाभे गतिमाह। गोदादक्षिणतः गोदा गोदावरी तस्या दक्षिणतः दक्षिणदेशे।
सर्ववर्णानां नृपमुखानां क्षत्रियादीनां सर्वदेशस्थानां कचिदन्यकन्यकायाः अलाभे सति पार्श्वनाड्यां हितं शुभं स्यात्। मध्यनाड्यां मरणमिति॥ उक्तं
चरत्नकोशे॥ अग्रनाडीव्यधे भर्त्ता मध्यनाडीव्यधेऽप्ययं। पृष्ठनाडीव्यधे कन्या म्रियते नात्र संशयः॥ समासन्ने व्यधे शीघ्रं दूरवेधे चिरेण तु॥ व्य
धांतरमानेन वर्षैर्दुःखं प्रजायते इति। ब्राह्मणविषये [illegible] जगरे निद्धिन लेचगमेमर
पदि ५ णमेव चापृष्ठदेशे भाग्यमाप्नोति यस्मात्तां परिवर्जयेत्। इति क्षत्रियविषये ज्योतिःप्रकाशे। निधनं मध्यमनाड्यां दंपत्योर्नैव पार्श्वयोर्नाड्योरिति। अस्य व्य
वस्था तत्रैवोक्ता। करग्रहे पृष्ठनाड्यो न निंद्ये इति पद्यचः। तत् क्षत्रियादिविषयं गोत्तमीयाम्यतस्त्वपेति॥ अथ पूर्वोक्तानां द्विर्द्वादशादीनां शुभत्व
माह। मैत्र्यां द्विद्वादशमर्थनंदं मपि सतषट्काष्टकं वश्यतः। षड्भिस्त्रीन्नगणाः व रोस्वपगणः सकूटमैत्रौ सदारदतः स्त्रीन्नपुमान्यदा वश्यमुखैः षड्भिर्युतं शोभा
नं स्त्रीभान्नानिकटे तन्दूरमशुभं खखेटौ तु मैत्र्यो शुभौ॥ अथ यदा रक्तः स्त्रीरक्षोगणः स्त्रीन्नपुमान् पुरुषः स्यात्तदा वश्यमुखैः षड्भिः वश्यभयोनिखेचरकूटनाडीभि
तैः षड्भिर्युतं शोभनं स्यात्॥ अथ नन्दूरं सापवादमाह। स्त्रीभादिति। स्त्रीनक्षत्रात् नृपनक्षत्रं यदि निकटे समीपे भवति तदा नन्दूरं स्यात्॥ कथंभूतं नन्दूरं त्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु.मा.टी.

ऽशुभं अशुभफलप्रदं द्वंद्वं न दूरं खेटेंदुमैत्र्योः सत्वोः शुभं स्यात्॥ उडुमैत्री नक्षत्रमैत्री योनिमैत्री तिथावत्॥ अथ संकटे दुष्टकूटादोषदानमाह॥ द्व्यर्के ताम्रसुवर्णमिष्टरिपु

केगोयुगमर्थिके कैरौप्यं कांस्यमथैकनाडियुजि गोस्वर्णादिदत्तो दहेत्॥ द्व्यर्के द्विर्द्वादशे ताम्रसुवर्णे दत्वा उद्वहेत्॥ अथ रिपुके षडष्टके गोयुग्मं गो मिथुनं॥ अर्थी

१९ कके पंचमनवमे रौप्यं कांस्यं दत्वा उद्वहेत्॥ अथैकनाड्यां दानमाह॥ एकनाडियुजि गोस्वर्णादि दत्तो द्वहेत्॥ एकनाडीयोगे गोस्वर्णान्नवस्त्राणि बहूनि दत्तो द्वहेत्॥

१८ तथा च राजमार्त्तंडे॥ षडष्टके गोमिथुनं प्रदद्यात्कांस्यं सरूप्यं नवपंचमे च॥ नाड्यां सुधेनून्नसुवर्णवस्त्रं द्विर्द्वादशे ब्राह्मणतर्पणं चेति॥ उद्वाहतत्त्वे॥ तारा संदेहे सधनव्य

येरजतयुक्तं स्पर्शरा केरवं गां दद्यात्षडष्टके द्विजभुक्तिं स्वर्णं च नाडीयुताविति॥ अथ गुणविचारं त्रिभिर्वृत्तैराह॥ तत्रादौ वर्णगुणमाह॥ भूर्वलेपैक्यवरोत्त विचार ५

मे पवश्यमद्यपे द्वंद्वं द्वयं मित्रयोः खं वैराशनके धरारिवश्यके योः सद्म्योरगयः भिन्नेतत्फलं तत्र्याति सुहृदोर्वेदाः त्र्यो मित्रयोरेकः स्याद्विषतोः स्वभावगु

णयोर्द्वैखं महावैरिणोः॥ एकेशे भयमित्रयोः शरमिता ऋक्षे समाराः तिके चत्वारः समिमित्रके रिपुहि तेभूः सिद्धुर्दाष्टेत्र यः॥ नादेवो मनुजा वधूरिह रसास्त

द्वैपरीत्ये शराः॥ षट्सामेस्त्रयहरुषः सुखधूर्त्तैककोल्लत्र खे॥ ११॥ दुःकूटेयदियोनिमैत्र सबलादूरं तदंशो धयोनेचेत्खं त्वनयोर्यदकमिह भूभद्यैक्य केखं

गुणः॥ सत्कूटे वरदूरकेयदि भवैरं षड्गुणा भिन्नराश्ये कर्दैवशराः पर्वमुनयो योनाडिभेदे गजाः॥ १२॥ भूरिति॥ वर्णैक्य वरोत्तमे भूरेको गुणो ज्ञेयः॥ व

र्णयोरैक्यं यस्मिन्नुघटितं तत् द्वर्णैक्यं वरः उत्तमेयस्मिन्तद्वरोत्तमं॥ वर्णैक्यं च वरोत्तमं च उभयत्रापि एकैको गुणः इत्यर्थः॥ अर्थात्तु हीने वरे गुणाभावः

उक्तं ज्योतिर्निबंधे॥ एको गुणः सदृग्वर्णे तथा वर्णोत्तमे नरे॥ हीने वरे गुणः शून्यं केप्याहुः सदृशे दलमिति॥ अथ वश्यगुणविचारमाह॥ वश्यभद्यपे द्वं

एकस्याद्वौ गुणः वश्यमद्यपं यथा मनुष्याणां जलजा वश्याः भक्ष्यं चात्र तत्र द्वौ गुणो ग्राह्यः॥ एतत्तु द्विजादौ ज्ञेयं॥ द्विजादयस्तु कदाचिच्छूद्रापा हीनजाति

भक्षकाः भवंति॥ न सर्वे बांतस्माद्वधूवरजातिं विचार्य योजनीयं॥ हीनजातौ शून्यमायतः खं वैराशनके इत्यस्मिन्नेव श्लोके उक्तत्वात्॥ एवमेव सिंहस्य १९

सर्वे वश्याः भक्ष्याश्च भवंति॥ तत्र मनुष्याः वैरी भक्ष्यं हस्ति च कस्तु वैरी॥ अन्ये च वश्यभक्ष्ये मिथमित्रयोः परस्परसुहृदोर्द्वयं गुणद्वयं ज्ञेयं अत्र विचा

रतः तत्र स्वभावजो मित्रत्वं प्रकटं मनुष्याणां मेषवृषभाश्वमृगोः सह मित्रत्वं॥ तत्र हीनजातीयानां पशवो वश्यभक्ष्यं तत्राद्वौ गुणः॥ अन्यत्र द्वयं॥ अरिव रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शकेधराएकोगुणः। अरिवर्गकं यथा। मनुष्याणां वृश्चिकः सिंहवृश्चिकयोर्नित्यवैरं। वृश्चिकदष्टः सिंहो मरणं प्राप्नोतीति लोके प्रसिद्धं। तस्मादत्र गुणाभावः।
प्रथमं वश्यलक्षणे अन्योन्यादिसुक्तं। तस्मात्सुबुद्धिभिर्विचार्य वक्तव्यं। ममात्र वश्यविचारे लोबुद्धिरेवं स्फुरिता।। अत्र यदुक्तं तद्बुधैः शोधनीयं। ननु वश्यलक्षणे
कौप्यं निवश्याहरेरित्येवोक्तं त्वया कथमुक्तं मनुष्या वैरीव भक्ष्यमिति। सत्यं तत्तु श्लोकोक्तलक्षणं सर्वसामान्यं। अत्र न एवोक्तं ग्रंथकर्त्रान्यजनादिति। सिंहः
सुनरगजादिप्रतापामरणेष्वसुत्सुकः। अनेषां मारणेऽप्युदासीनः असदृशत्वात्। उक्तं च वैरभक्ष्ये गुणाभावो द्वयोः सख्ये गुणद्वयं। वश्यवैरे गुणश्चैको वश्य
भक्ष्ये गुणार्द्धकमिति।। अथ ताराणां गुणविचारमाह।। सद्भयोः उभयतः सत्तारयोः सतोः अन्यस्त्रयोगुणा इत्यर्थः। एतदुक्तं भवति। भेगणपाकहृतेरस्तनेन
प्रकारेण उभयोरपि यदि सत्तारे भवतस्तदा त्रयो गुणा इत्यर्थः। मिश्रे तदर्द्धफलमिति एकतः शुभतारा एकतोऽशुभतारा एवं विमिश्रे सति तदर्द्धफलं ते
षां त्रयाणां शकलं तच्छकलं सार्द्धैको गुण इत्यर्थः। अन्यथा गुणाभावः सिद्धं। उक्तं च एकतो लभ्यते तारा शुभा चैवाशुभान्यतः। तदा सार्द्धो गुणश्चैको ता
राशुद्धौ मिथस्त्रयः। उभयोर्न शुभा तारा न तदा कल्प्य समादिशेत्। इति।। अथ योनिगुणविचारमाह।। अतिसुहृदो वेदाश्चत्वारो गुणाः मित्रयोस्त्रयः। द्विष
तोर्वैरिणोरेकः। स्वभावगुणयोर्द्वौ। महद्वैरिणोः स्वल्पं गुणः स्यात्। एवं पंचप्रकारेण योनिगुणाः। अस्य विवेकः। अष्टाविंशतिनक्षत्राणां अश्वादयः
सर्वाश्चतुर्दश योनयः। तत्र सिंहमं। महिषाश्वमित्यादि यदुक्तं तन्महद्वैरं। तत्रापि महद्वैरे महिषाश्ववानरमेषकं एतद्द्वयं उदासीनस्वभावगुणं द्यातामा
वात्। अथैकयोनिषु अतिमित्रत्वं ज्ञेयं। एकयोनिष्वपि तयोः श्वानमार्जारयोः व्याघ्रसिंहयोरेकयोनित्वेऽपि न मित्रत्वं परस्परं कलहकारणात्। एतद्युग्म
पंचकं स्वभावगुणं। एतद्युग्मपंचकं उत्तममहद्वैरस्थं। महिषाश्ववानरमेषकं। एतद्युग्मसप्तकं स्वभावगुणं।। व्याघ्रस्तु सर्वेषुरानुकूले उदासीनः। तथा तो
व्याघ्रसिंहो अन्येषां वैरिणौ। सर्पमार्जारयोर्वैरं। श्वमेषयोर्मैत्रं। गोमहिष्योर्मैत्रं। उंदुरसर्पयोर्वैरं। एवं शत्रुमित्रोदासीनादिकं विचार्य उक्तवत् गुणाः ज्ञा
तव्याः। उदासीनेष्वभावाद्गुणग्रहणं उदासीनानां गुणा यद्यपि नोक्तास्तथापि स्वभावगुणो महिषाश्वमेषवानरेष्वश्वोदासीन्यं दृश्यते। तस्मादेतदुदासीने गु
णग्रहणं कर्त्तव्यमित्यवगम्यते। उक्तं च महावैरे च स्वस्वभावे यथाक्रमं। मैत्रे चैवातिमैत्रे च खं० दु१ द्वि२ त्रि३ चतु४ गुणा इति। अथ षट्खेचरगुणविचार

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नू
माह॥ एकेशेति॥ एकः ईशो यस्मिंस्तदेकेशं उभये [stain] मित्रे यस्मिन् तदुभयमित्रं एकेशं च उभयमित्रं च एकेशोभयमित्रे तयोः शरमिताः पंच गुणा ग्राह्याः॥ उ
१९ भयत्रापि पंच ग्राह्याः स्वल्पार्थे॥ अर्द्धं समारातिकौ समउदासीनः अरातिः शत्रुः। एवं यस्मिन् मेलने तत्समारातिकं। तत्र अर्द्धं एकस्यार्द्धं गुणः। एवं सममि
१९ त्रके चत्वारो गुणाः सुः। रिपुहिते अरिसुहृदि त्वेकौ भूरेकः। उदासे त्रयः। द्वौ उदासीनौ यस्मिन् तत्र त्रयो गुणा ग्राह्याः॥ अनुक्ते गुणाभावः उक्तं च तत्रैका
धिपमित्रत्वे उभयो गुणाः पंचकं। चत्वारः सममित्रत्वे द्वयोः साम्ये त्रयो गुणाः। मित्रवैरे गुणश्चैकः समवैरे गुणार्द्धकं। परस्परं खेटवैरे गुणाभावं विनिर्दिशेदि
ति॥ अथ गणगुणविचारमाह॥ नादेवइति। यत्र नावरो देवगणः वधूर्मनुजा मनुष्यगणा भवति। इह रसाः षट् गुणाः ग्राह्याः॥ तद्विपरीत्ये तयोर्वैप
रीत्ये तस्मिन् शरमिताः पंच गुणाः ग्राह्याः॥ एतदुक्तं भवति॥ यत्र वरो मनुष्यगणः वधूर्देवगणा अत्र पंच गुणा ग्राह्याः स्वल्पार्थे॥ गणसाम्ये षड्गुणाः ग्रा
ह्याः। यत्रास्वपः पुरुषः दैत्यगणपुरुषः सुरवधूर्देवगणा स्त्री भवति। अत्रैकः एको गुणो ग्राह्यः। अन्यत्र उक्तान्यत्र खंस्यान्यगुणो ग्राह्यः। अथ भकूटगुण
विचारमाह। दुःकूटेति। दुःकूटे द्विर्द्वादशादौ सति यदि योनिमैत्रं अबला दूरं स्यात् तदा खंस्यान्यगुणाः। अनयोर्योनिमैत्रस्त्रीदूरयोर्मध्ये यत्र एकं स्यात् इ
हं भूरेको गुणः। भांशपैकके नक्षत्रैकचरणे खंस्यान्यो गुणो ग्राह्यः। अथ सत्कूटे सति यदि वरदूरं भवैरं योनिवैरं च स्यात् तदा षड्गुणा ग्राह्याः। यत्र
भिन्नराश्यैकर्क्षे भवतः। भिन्नराशिश्च एकर्क्षं च भिन्नराश्यैकर्क्षे। अत्र शराः पंच गुणा ग्राह्याः॥ परत्र उर्वरिते मुनयः सप्त गुणाः॥ अथ नाडीगुणविचा
रमाह॥ नाडिभेदे गजाः अष्टौ गुणा ग्राह्याः स्वल्पार्थे॥ अनुक्ते गुणाभावः। इति घटितं॥ अथ कन्यायाः विवाहकालमाह॥ स्त्रीणामष्टमवर्षतस्त्रिषु त्वेणां
तीर्णव्रतानामयुग्मेष्वब्देषु तुराधमाघयुगयोर्मार्गे विवाहः शुभः। ज्येष्ठे ह्यर्कविजयोस्त्यजेद्धिमरुचिश्चेज्ज्योन खेटान्वितं यन्मासादिजनुर्भवं प्रथमके गर्भेस्य १९
जेन्नानुजे॥ १२॥ स्त्रीणां अष्टमवर्षतः सकाशात् त्रिषु वर्षेषु विवाहः शुभः स्यात्। अष्टमे नवमे दशमेषु वर्षेषु विवाहः शुभः स्यात्। तथा च संवर्त्तः। अष्ट राम:
वर्षा भवेद्गौरी नववर्षा च रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं वृषली स्मृता॥ गौरीदानान्नागलोकं वैकुंठं रोहिणीं ददत्। कन्यादानाद् ब्रह्मलोकं रौर
वं तु रजस्वलेति॥ वृषलीति पर्यायः। तथा च कारिकायां॥ षडष्टमध्ये नो ह्यष्टाः कन्या वर्षद्वये ततः। सोमो भुंक्ते ततस्तद्वद् गंधर्वश्च ततोऽनलः। अस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वाक्यस्य प्रमाणार्थे श्रुतिः। सोमः प्रथमो विविदे इत्याद्युपक्रम्य सोमोददद्गंधर्वाय गंधर्वोदददग्नय इत्यंतः। अस्य विरोधो ब्रह्मपुराणे दृश्यते। गौत॰
मीमाहात्म्ये आनुतीर्थीसंवर्णने वसिष्ठानुसंवादे। वसिष्ठवाचा चतुर्थी इत्यारभ्य ऊर्ध्वं यावन्न दशमात्ययः। तावद्विवाहः कन्यायाः पित्रा कार्यः प्रयत्नत इति।
एवं विरोधे सति पुराणस्मृतिर्बलवत्तरा स्मृतेः श्रुतिर्बलवत्तरेति न्यायेन पुराणवाक्यं ब्रह्मादिविषयं। श्रौतस्मार्त्तब्राह्मणादिविषयमित्यविरोधः। सप्तमवर्षे स्त्री
णां नारदादिभिर्निंदितां। तस्मात् छात्रतत्त्ववेदिनाऽऽचार्येण सर्ववर्णानामविरुद्धमेवोक्तं॥ स्त्रीणामष्टमवर्षीत/त्रिषिपितिकथितवाक्याद् ऊर्ध्वं कदाचि
द्वरलाभनिमित्ताद् असमवर्षेषु द्वादशचतुर्दशषोडशेषु विवाहो ग्रंथांतरे उक्तः। कालनिर्णयदीपिकाविवरणे स्वयंवरार्थं कालद्वयमुक्तं। जीवत्पि
त्रादिकायाः प्रदातृदशवर्षकन्यायाः प्राप्ते ऋतौ वर्षद्वयानंतरं स्वयंवरकालः। अप्रदातृकायामपि ऋतौ वर्षत्रयानंतरं स्वयंवरकालः। प्रदातृकाया
इत्यनेन सर्ववर्णसाधारणाः कन्याप्रदातारः कालनिर्णयदीपिकायामुक्ताः। पिता पितामहो भ्राता माता बंधुर्यदा न हि। ऋतौ वर्षत्रयाद् ऊर्ध्वं कन्या कु
र्यात्स्वयंवरमिति। बौधायनोप्याह॥ वर्षाणि त्रीण्यृतुमती कांक्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिमिति। अथ पुंसो विवाहकालमाह॥
नृणां तीर्णव्रतानां च कृतव्रतविसर्गिणां। अयुग्मेष्वेव तेषु विषमवर्षेषु विवाहकालः शुभः स्यात्। ऋतुविशेषे तु उक्तवर्षेषु कर्त्तव्य इत्याह॥ राधमा
घयुगयोः। राधो वैशाखः। माघः प्रसिद्धः। अनयोर्युगले राधयुगं माघयुगं माघवैशाखज्येष्ठो माघफाल्गुणावित्यर्थः। मार्गे मार्गशीर्षे विवाहः शुभः
स्यात्। एते पंच मासाः बहुसंमताः। एतज्ज्येष्ठमासे पूर्वजयोः प्रथमजातयोर्द्वयोस्त्यजेत्। अथ यदि एकतरे ज्येष्ठे सति न त्यजेत्। तथा च नारदः। न ज्येष्ठे
ज्येष्ठयोः कार्यं नरनार्योः पाणिपीडनं। तयोरेकतरे ज्येष्ठे मासे पि कारयेत् इति। ग्रंथांतरमाह। हिमरुद्धे चंद्रमसं त्वज्योन खेटान्वितं बुधगुरू हि
तान्यग्रहयुक्तं पापग्रहस्य क्षणमन्यतमयुक्तं त्यजेत्। अनिष्टफलप्रबलात्॥ उक्तं च विवाहे वृंदावने। अशुभः शुक्रः सखः सखन त्यस्तु निति
सर्वशुभकर्मसाधारणो यं दोषः। अथ ज्येष्ठापत्यप्रकरणे मासाद्यं जनिसंभवमिति यदुक्तं तस्य विशेषनिर्णयमाह। जन्मासाद्विजनुर्भं चप्र २४
थमके गर्भे त्यजेन्न तु जोत्पन्नार्थी। अत्र नारदः। न जन्ममासे जन्मर्क्षे न जन्मदिवसेपि च। आद्यगर्भसुतस्याथ दुहितुर्वा करग्रहः। अथवि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु.मा.टी. वाहनस्तेत्रानुसवेधानाह ॥ मूलांत्यार्केति। मूले अश्विन्यंत्यं रेवती। अर्को हस्तः। मघाश्विन्यौ। स्थिरोत्र स्थिराणि रोहिणी उत्तरात्रयं। इंदुर्मृगः। अनिलः
२० स्वाती। एभिः सहितं मैत्रमनुराधा विवाहे शुभं शुभफलमिति। अथ वेधे विनिंद्यमाह॥ पापस्पृक्तं पापग्रहमुक्तं अनिंदुभुक्तं चंद्रभुक्तं न शुभं। एतदुक्तं
भवति। पापग्रहस्पृक्तं नक्षत्रं चंद्रभोगरहितं न शुभं स्यात्। उक्तं संहिताप्रदीपके। राहुमुक्तं त्रिभिर्भोगैः शुद्धं षड्भिर्ग्रहोपमं। चतुर्भिः शनिमुक्तं चक्रा
म्पांम्रुमिसितोसितं। खलयुतं पापग्रहयुतं। अथ वेधोत्र लिख्यते॥ मृगोत्तराषाढयोः भरण्यनुराधयोः। द्विकं भयोः कस्य मेकभेदे च तेकमे च द्विक
भेरोहिण्यभिजितोः मघाश्रवणयोः मिथः परस्परं अश्लेषार्यम्णोः रेवत्युत्तरफाल्गुन्योः। पुनः पुनर्वसुः अस्त्रपा राक्षसः। मूलमित्रयोः। मूलपुन
र्वस्वोः वरुणभस्वात्योः उभाहस्तयोः मिथः परस्परं वेधः स्यात्। इत्युत्तरश्लोकेन संबंधः॥ अथ कर्मविशेषेण वेधनिर्णयमाह॥ वेधोयं करपीडन इ
ति। २५। एतस्य व्याख्या। अयं उक्तो वेधः करपीडने विवाहे सर्वैर्मुनिभिर्निगदितः। अन्यत्र अन्ये पुनर्विवाहः अन्यस्मिन्कर्मणि सप्तशलाकके
निगदितः। किंभूते सप्तशलाकके शिवदिशः ईशान्याः सकाशात्कार्शानवाद्यैर्युते कृशानुदेवताया इति कार्शानवं कृत्तिकास।
काशादाद्यं येषां तानि तैर्युते ईशादिप्रदक्षिणं कृत्तिकादिनक्षत्रैर्युत इत्यर्थः। विवाह इतरे सर्वकर्मसु सप्तशलाकाचक्रे वेधो विलोकनीय इति॥ त
थाच लल्लः॥ चक्रे सप्तशलाकाख्ये भवेधः सर्वकर्मसु त्याज्य एव विवाहे च तथैव पंचरेखज इति। अथ पादवेधमाह॥ अंत्यादिमयोः ४।१ द्वि
तीययोः २।३ पादयोर्मिथो वेधः स्यात्। अस्य निर्णयमाह॥ सत्खगैर्वेधे चरणं पादं त्यजेत्। उक्तं च मांडव्येन। धिष्ण्ये सौम्यग्रहे विद्धे पादमात्रं प
रित्यजेत्। क्रूरैस्तु सकलं त्याज्यमिति वेधविनिश्चयः। अन्यच्च॥ सौम्यविद्धं पादमात्रं खलविद्धं त्विहाखिलमिति। अथ वेधापवादमाह॥ लग्ने शुभव
ग इति। लग्ने शुभलाभगे वेधस्य न दोषः एको भंगः। अथवा चंद्रे सद्दृष्टे सति द्वितीयो भंगः। वा शुभे चंद्रवर्जितलग्नगे सति तृतीयोपवादः। शुभस्य हो
रायां चेति चतुर्थः। एवं च मध्ये एकस्मिन्सति वेधभयं नास्तीति सर्वे जगुः। वैद्यनाथः द्वि धमाद्यंतयोरंघ्र्योरन्योन्यं द्वितीययोः। क्रूरैरपि त्यजे रामः
त्पादं केचिदूचुर्महर्षयः इति। वसिष्ठः। लग्नेश्वरः सौम्ययुतेक्षितो वा लग्नाधिनाथो भवगस्तथा वा। कालात्खहोराचयदा शुभस्य भवेद्दोषाय २०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भवेधदोषः इति दोषस्य भंगः ॥ अथ लत्तामाह ॥ भौमात्स्याकृतिषड्विति ॥ भौमात्सकाशात् खेटो राक्रांतः कुमात् । आकृत्यादिभं नक्षत्रं अग्रतो लत्तयाहंतीति त
त्र भौमस्तृतीयं । बुधो द्वाविंशमतितं गुरुः षष्ठं शुक्रस्तु जिन २४ मितं शनिरष्टमं राहुर्विंशं लत्तयाहंति । सूर्य अर्कमितं १२ शशी पूर्णेंदुः मुनिमितं ७ अग्र
तो लत्तयाहंति नक्षत्रं न क्षत्रे मगधे मागधदेशे न सतां नक्षभः स्यात् । तथा च सत्यसूरिः । लत्ता मागधके देशे पाते सौराष्ट्रके तथा । एकार्गलं तु काश्मी
रे वेधं सर्वत्र वर्जयेत् इति ॥ अथ दोषांतरमाह ॥ षण्मासमिति ॥ षण्मासपर्यंतं ग्रहणोडुग्रहणनक्षत्रं चंद्रं तनुगं चंद्रगते लग्नगते च त्याज्यं । चंद्रगत
मिति । यस्मिन् दिने चंद्रमसा युक्तं तच्चंद्रगतं । दिननक्षत्रमिति यावत् । तनुगं यथा । अश्विन्यां ग्रहणे जाते दशभागो तस्मिं लग्ने सत्यश्विनी लग्नस्या
स्यात् । एवं भरण्याद्यपि ग्रहणोडु इत्यनेन अश्विन्याद्युक्तात् दुष्टानि त्याज्यानि । विद्धर्क्षं विद्धनक्षत्रं एते उभे तनुगे त्याज्ये । भं च लग्नं च भलग्ने । भलग्ने जन्मनक्षत्रे ६
भ९ जन्मनि भलग्न जन्मलग्ने तत् एवं जन्मभलग्नके । जन्मराशि जन्मलग्ने तनुगते त्याज्ये । लग्नांतर्गत नक्षत्रस्त्रानार्थं सूत्रे । नवघ्नं तनु वेदाप्तं सैकं स्या
त्तारकं तनौ । सूर्यनक्षत्राज्जन्मनक्षत्रं च तुर्दशनक्षत्रे त्यजेत् ॥ अथ सूर्यादीनां राशिसंक्रमणे त्याज्या घटिका आह ॥ रवींदुकुजसौम्यानां संक्रमणे क्रमेण
रदद्व्यंक हस्त्राद्य त्याज्याः । तद्यथा । सूर्यसंक्रमणे द्वात्रिंशद्घटिका त्याज्या । तथा चंद्रसंक्रमणे द्वे नाड्यौ । भौमसंक्रमणे नव घटिकाः । बुधसंक्रमणे
द्वे घटिके त्याज्ये इत्यर्थः । गुरुसंक्रमणे ऽष्ट ८४ चतुराशीति घटिका त्याज्याः । शुक्रस्य षट् घटिकाः । शनेः खतिथयः खं च तिथयश्च १५० सा
र्द्धशत घटिकाः दिवसद्वयं सार्द्धं वर्ज्यं । अथ संधिदोषमाह ॥ षडिति । ऋतुसंधितः वसंतादि ऋतुप्रवृत्तौ षट्षष्टिः षड्भिरधिका षष्टिः षट्षष्टिं
घटीनां षट्षष्टिः ६६ त्याज्या इत्यर्थः । ऋतुप्रवृत्तिलक्षणं । रत्नमालायामुक्तं । मृगादिराशीति । तिथिभयुक्संधौ तिथिनक्षत्रयोगानां संधौ द्विनाड्यौ
घटिके द्वे द्वे घटिके त्याज्ये । अथ पूर्वमुक्तग्रहजनिशांतो द्रवं सूतकमिति ॥ तत्र ग्रहणसूतकलक्षणमाह ॥ ग्रहणादिति । ग्रहात् ग्रहणात् सकाशात् पू
र्वं उपरितचरणैः ग्रहणपादे त्रि रुद्र वेद ४ षडिद्भा ८ हं त्यजेत् । एतदुक्तं भवति । पादे कमात्र ग्रहणे त्रिदिवसां त्यजेत् । अर्द्धग्रासे च तुरो दिवसान् ।
त्रिपादे ग्रहणे षट् दिवसान् । सर्वग्रहणे ऽष्ट दिवसां त्यजेत् । प्राक् दर्द्धं ॥ ग्रहणात् पूर्वतः ॥ तदर्द्धं उत्तरस्यार्द्धं त्यजेत् । एतदुक्तं भवति । पादग्रहणे त्र ।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु॰मा॰टी॰ याम्याममर्द्धं तद्यथा। पादग्रहणात्स्पर्शात्पूर्वं सार्द्धैकं दिवसं अर्द्धग्रहणे तु हौ पादत्रयग्रहणे त्रीन् सर्वग्रहणे षष्ठं नाममर्द्धं चतुरो दिवसांस्त्यजेत्। तथा चोक्तं शास्त्र॰
२९ डीयविवाहपटले। सर्वग्रासे ... दिनान्यष्टौ शुभकार्ये विवर्जयेत्। त्रिभागजेषट्दिवसमर्द्धग्रासे चतुर्दिनं। चतुर्थांशे त्रिरात्रं स्यात् ग्रहणे चेद्र
सूर्ययोरिति। अत्राप्यंतराले ऽनुपातो ऽन्ते स्मः। तथा वशिष्ठेनापि। ग्रहणात्त्रिदिनेहर्षं परतो दिनसप्तकमिति। सर्वग्रहणविषयं ज्योतिःप्रकाशे। खग्रासस
र्वपादोनखंडांशमात्रेष्वपि तु वासरः। गजाश्वेष्वब्धिरामाग्नेने शास्त्रोक्तादर्ले ग्रहेति॥ अथ उत्पाते वर्ज्यकालमाह॥ उत्पाते त्र्यहमिति। उत्पाते भूकंपनिर्घा
तेमहोल्कापातनिपातादिकोऽग्र ... द्विमितानां अहां समाहारः त्र्यहं सप्ताहमित्यर्थः। त्यजेत् उत्पाते जाते सति सप्ताहं शुभे कर्मणि त्यजेदित्यर्थः। तथा
चाशिष्ठेनापि। परं सप्ताह उत्पाते त्यजेत्केतूदयं शुभ इति॥ भद्रालग्नमाह॥ राकाष्टमीप्राग्दले विद्धं स्यात्तारा कादशीमाश्र ष्टमी प्र॰ अनयोस्तिथ्योः अ
ग्दले स्वर्विद्धे विद्धं स्यात् विष्टिः स्यात्। प्रांते शुक्लतरुद्वयोः। कृतशस्त्रतुर्थी रुद्र एकादशी अनयोः प्रांत्यदले विद्धं स्यात्। एतन्न शाचतुर्थ्यं अवकुले शुक्ल
पदे स्यात्। कृष्णे निरेके विद्ध कृष्णेक पक्षे हृदये उक्ते स्वतिथिषु निरेके षु एकरहिते विद्धं स्यात्। भद्रापयोदः। शाडीयविवाहपटले दूषितः। अतः॰
कारणाद्वत्र नोक्तः। अथ गंडांतलक्षणमाह॥ सार्पेन्द्रांतिमभांतनन इति। सार्पम श्लेषा ऐंद्रं ज्येष्ठा अंतिमं रेवती। एषामंते तदग्रे तस्मात् स्यात् पूर्वपरं अश्वि
घटिकं गंडांतं स्यात्। अर्ध्यमस्रान्तस्त्र घटिकाः यस्मिन् ततत् चतुर्थ घटिकमित्यर्थः। एतदुक्तं भवति। उक्तनक्षत्रात् पूर्वतो घटिकाद्वयं परितो घटिका
द्वयं एवं घटिकाचतुष्टयं नक्षत्रगंडांतं। अथ तिथिगंडांतमाह। पूर्णानंतो ध्यार्द्धकं। पूर्णाः ५।१०।१५ एताः सामंतत ४ अर्ध्यर्द्धकं द्विघटिकं गंडांतं सर्वे
परतः स्यात्॥ अथ लग्नगंडांतमाह॥ कीटांत्यालिविरामतः कुघटिकौ कीटः कर्कटः अंत्यो मीनः। अलि वृश्चिकः एषां विरामो ऽवसानं तस्मात् कुघ
५२ टिकं लग्नगंडांतं स्यात्। अथ चंडायुधमुत्तरार्द्धेनाह॥ सार्द्धे स्त्र्यव्हजेति। साध्य वैधृतिश्च लव्यतीपात हर्षणगंडाः ए तेषां योगानां अवसानं तत्र यद्भ रामः
नक्षत्रं तस्मिन्नु चंडायुधं स्यात्। चंडमहदायुधमिव आयुधं घातकं स्यात्। तस्मान्नक्षत्रं वर्ज्यमित्यर्थः। अथैकार्गलमाह। कुयोगे इति। विष्कुंभातिगंडश्च
लगंडव्याघातवज्रव्यतीपातपरिघवैधृतिनामानः एते नव कुयोगाः। एषामन्यतमे सति दिनभादिसाभिजिदर्कः दिनमं २९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आदित्यस्यतत्दिनमादिः।अभिजितासहवर्त्तितेनतत्सामिजितत्त्वंततःअमुष्मिंतत्रार्कःसूर्येभिवतितदाएकार्गलः।शुभफलावरोधकःएकार्गला
शुभफलारोधिनीयस्मिन्सः।।अथवारदोषमाह।सूर्यायामदलमितिश्लोकेन।सूर्यात्सकाशात्वारेशुक्रमेणयुगादिकेयामदलंयामार्द्धउसं
तित्यजेति।मुनयइतिशेषः।युगमितंरवौ।सोमेसप्तमं।अब्धिनौदोतन्मितंभौमे।इषुमितंबुधे।नागमितंगुरौ।त्रिमितंशुक्रे।षण्मितंशनौ।एतत्यामद
लंदिवैवउसंतिनरात्रौ।।अथकुलिकानाह।।इनादौसूर्यादौवारेदिवाइंद्रादिकंषोडशांशंकुलिकंउसंति।तन्निशिरात्रौव्येकंएकरहितंइंद्रादिकं।
षोडशांशंउसेति।तद्यथा।रात्रौरवेस्त्रयोदशांतर्वदिवाचतुर्दशंसोमेदिवाद्वादशंरात्रौएकादशमिति।एवंसर्वेषां।अथतैरिंद्रादिमुहूर्त्तःअपरेश
मरेज्यशस्त्रकुजिह्मःसकाशात्कालकंटककंएतेनिघंटंइनस्यापतत्वात्।।यमस्ययमघंटमितिसर्वः।उसेति।गुरोःसकाशात्तरद्वैंद्रादिभिःकालंबुधा
त्तैःकंटकंशुक्राद्विंद्रादिभिर्यमघंटं।अथदुर्मुहूर्त्तानाह।।शुक्रेद्वौज्येतिश्लोकार्द्धेन।उत्तरार्द्धेपातमृत्युयोगौ।शुक्रचंद्रगुरुशनिबुधक्रमेणगोंक
रविमहतुल्यामुहूर्त्तादुःखदाः।दुरुपसर्गाः।सर्वेषांयेषांतेदुर्मुहूर्त्ताः।भौमेरात्रौअगःसप्तमः।अथयत्रेषोंतरे।अर्यमणेर्केतु[illegible]हिनकिरणेइत्यादिदुर्मु
हूर्त्ताउक्ताः।अत्रस्वल्पत्वात्स्पष्टउक्ताः।येइतरेदुर्मुहूर्त्ताःग्रंथांतरेपठिताः।सर्वेयामार्द्धयामादिषुसे[illegible]ति।अतोमयात्रनोक्ताः।यतोर्द्धयामा
दीनांपरित्यागेतेपित्यक्ताः।सुःकिमत्रविस्तारेणसूत्रेषुकिमन्यतदुर्गमं।।अथपातसंभवकालमाह।।पातइति।संप्रतिसांप्रतंहद्वितत्सूर्यचरणे
तथाब्रह्मद्वितीयेऽवलोक्यब्रह्मणोयोगस्यद्वितीयेप्रवलोक्यः।ब्रह्मसिद्धांतोक्तप्रकारेणविलोक्यः।अथमृत्युःसर्वत्रवर्जयेदितिमृत्युक्तत्वान्मृ
त्युयोगमाह।।अर्काद्याःसूर्यादयःअश्विन्यादिभिर्नक्षत्रैःसहमृत्युदाः।स्युः।अनुराधारवेः।विश्वेउत्तराषाढासोमे।पापीशतताराभौमे
।यमलौ।अश्विनीबुधे।इंदुर्मृगःगुरौ।अहिरश्लेषाशुक्रे।अर्कमंहस्तःशनौ।एतदुक्तंभवति।एतस्मिन्वारेएतेनक्षत्रयोगेमृत्युदःस्यादित्य
र्थः।अथविषघटिकामाह।पंचाशाजिनखाग्नयइति।अश्वितःअश्विन्याःसकाशान्नक्षत्रेषुइमाभ्यःपंचाशाजिनेत्यादिभ्योऽग्रेपरतोवि
नाड्यःचतुर्नाड्योपिविषंस्यात्।एतदुक्तंभवति।अश्विन्यांपंचाशद्घटिकाभ्योऽनंतरंचतुर्नाड्योविषं।एवमन्यत्।अत्रांकन्यासएवव्याख्यानं।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथैषां ध्रुवाणां स्पष्टीकरणमाह। नक्षत्रस्येति। नक्षत्रस्य गतैष्ययोगेन गुणितः स्वस्वध्रुवः पंचाशज्जिनाप्तिः वह्निहृत् स्पष्टः स्यात्। अतऊर्ध्वं स्पष्टध्रुवा
नंतरं अब्धिघटिका अनुर्नीड एवमुक्तप्रकारेण कृताः संतः स्पष्टाः कार्याः। ताः स्पष्टाः स्युः। ताः स्पष्टाः स्पष्टध्रुवानंतरं विषाख्या ज्ञेया इत्यर्थः॥ अथास्यां
विषघटीनामपवादः॥ चंद्र इति। चंद्रः सौम्यभगतः शुभग्रहराशिगः सन् विषभयं हंति। वा इत्यथवा कोणस्तस्वबंधुगोपि चंद्रः विषभयं हंतीत्यर्थः।
अत्रास्मिन्कोणादिस्थानसंयोगे सलग्ने वर्त्तमाने गपेलग्नपे विषभयं हंति। एवं पंचभंगाः संति। ननु सप्तमः खेटोपि वा हेमिं दितः कथमत्र चंद्रो गृहीतः
। सत्यं। इदं वाक्यं सर्वकर्मसाधारणं। तस्मिन्निंदितस्थाने वर्जयित्वा अन्यत्र ग्राह्यः। तथा च बृहस्पतिः। चंद्रो विषघटीदोषं हंति केंद्रत्रिकोणगः। ल
ग्नं विना शुभैर्दृष्टः केंद्रे वा लग्नपस्तथा। फलप्रदीपे। विषनाडीस्थितं दोषं हंति सौम्यर्क्षगः शशी। मित्रदृष्टोऽथवा स्वीयवर्गस्थो लग्नपोपि चे
ति॥ अथ विवाहलग्ने इष्टानि षड्ग्रहानाह॥ लग्नेचंद्र इति। लग्ने चंद्रखला अंत्येंद्रश्च खला श्च चंद्रखलाः चंद्रक्रू राः लग्ने वर्त्तमानाः अशुभे शोका
यभवंति। तथारिपो षष्ठे शशिसितौ चंद्रशुक्रौ तथा सर्वे द्यूने सर्वे क्रूरसौम्याः द्युने सप्तमे। तथा खेदशमे बुधः। तथा अंत्येंद्रौ से द्वादशे अगुः राहुः सु
खगतश्चतुर्थगः न विद्यते गावः किरणा यस्येति अगुः। राहुस्तमो गुरसुरश्चेति बृहज्जातके राहुनामानि॥ तथा अष्टमगाः कुजशुभाः शुक्रस्तृती
येस्यष्टार्थी। एते प्रत्येकमुक्तस्थानगाः अशुचे शोकाय भवंति॥ अथ इष्टानाह॥ लाभे सर्वे खगास्तथा शुभाः सौम्यग्रहाः अखिलगताः निंद्यं विनास
र्वस्थानगास्तथा खलाः क्रूराः त्र्यरिंगाः तृतीयाष्षष्ठगाः। तत्राष्टमे भौमो निंदितस्तं विना पापा अष्टमगा ग्राह्याः। चंद्रः अंबुधने तृतीये चतुर्थे
द्वितीये चंद्रः एते प्रत्येकं श्रियेलक्ष्म्यै भवंति। श्रीकारका इत्यर्थः॥ एवं शुभाशुभग्रहानुक्त्वा तत्र विशेषमाह। तत्र प्रथमं भृगुषष्टापवादमाह॥ कन्या
तोलिकेति। कन्या प्रसिद्धा शुक्रस्य नीचं तोलिको धनुर्द्धरः शत्रुगेहं सर्वेत्किं भृगुशत्रू रवीदू इति। लग्न गकरो न भवतीत्यर्थः। तथा च कश्यपः।
नीचगे तनुरये वा शत्रुक्षेत्रगतेपि वा। भृगुषष्ठकृयो दोषो नास्ति तत्र न संशयः॥ अथ कुजाष्टमदोषापवादमाह॥ भौमो मृत्युगतोपि अष्टमगतो
पि शत्रुप्राप्तिनो गेहस्थितो यदि भवति। वा इत्यर्थः अर्कगः। यदि अस्तंगतो भवति तदा नो भंगकृत्स्यात्। अस्य शत्रुर्बुधः। कुजस्यापि दरिरिति शा रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वर्गश्च द्वादशचवर्गदृशः शोभनानां वर्गदृशः सुवर्गदृशा इतः प्राप्तः सुवर्गदृग्गितः २

।गुरुः।तस्य गृहं मिथुनकन्या च शशिगृहं कर्कटः तस्य नीचे।एषामन्यतमस्थः अस्तंगतो वा अष्टमस्थोपि लग्नभंगकरो न भवतीत्यर्थः।अस्तगत इति।
पावेस एवार्थः।तथा च कश्यपः।।अस्तगे नीचगे सौम्ये शत्रुक्षेत्रगतेपि वा।कुजाष्टमोद्भवो दोषो न किंचिदपि विद्यत इति।अथ षड्द्वादशाष्टचंद्रापवाद
माह।।शुक्ले इति।शुक्ले शुक्लपक्षे अंसारि विधुः द्वादशाष्टो वा चंद्रः सुवर्गदृग्गितः शुभवर्गशुभदृष्टियुक्त इत्यर्थः।एवंविधो विधुः शुभदः स्यात्।कस्मि
न्सति।ईज्ये गुरौ शुक्रे वा तनौ लग्ने सति।कथंभूते गुरौ स्वोजो युजि।सुतरां ओजः स्वोजः।उत्कृष्टबलं तेन युनक्तीति स्वोजोयुक् तस्मिन् स्वोजोयुजि।अति
बलिष्ठे सति इत्यर्थः।शुक्रस्याप्येतद्विशेषणं।एतदुक्तं भवति।बलिष्ठेपि गुरौ शुक्रे वा लग्नस्थे सति शुक्लपक्षे चंद्रः शुभवर्गदृग्गितः दृष्टिसहितो यदि भ
वति।तदा द्वादशाष्टगोपि शुभ इति।लग्नभंगकरो न स्यात्।अन्यथाना।मुहूर्त्तदर्पणे। कवौ गुरौ वा बलिनि स्थिते तनौ शुभेन दृष्टः शुभवर्गगः
शशी।विवर्द्धमानः शुभकृत्स्वनाशुभं।करोति तिष्ठन्नपि वष्टरिःफयोरिति।अथ सग्रहचंद्रदोषापवादमाह।सग्रहः ग्रहेण ग्रस्तः मंगरहेवी सहव
र्त्तमानः सग्रहः बुधगुरुवर्ज्यअन्यग्रहयुक्त इत्यर्थः।यतः पूर्वमुक्तं त्तेज्यान खेटान्वितमिति।एवंविधः सग्रहो विधुः केंद्रनिजवर्गेज्येक्षितः सन् शुभ
दः स्यात्।केंद्र इति क्षिद्रं।निजवर्गे नि जांशः तत्र वर्त्तमान ईज्यः केंद्रनिजवर्गेज्यः तेन ईक्षितो वलोकितः सग्रहचंद्रः शुभद इति भंगकरो न स्यात् इत्य
र्थः।गुरुः स्वकीयवर्गस्थो बलवान्कंटकस्थितः।पश्यन्सग्रहशीतांशुं तद्दोषं विलयं नयेदिति।अथ सामान्यदोषापवादमाह।दोषाणामिति।कंटकको
णगः केंद्रत्रिकोणगः इंदुजो बुधो दोषाणां शतं घातयेत्।तत्रस्थः शुक्रो दो षाणां शतयुगं द्विशतं घातयेत्।तत्रस्थो गुरुर्दोषाणां लक्षं घातयेत्।।
२ अपवादांतरमाह।।अंगे लग्ने इनचंद्रौजस्विनि चंद्रयोः सूर्यचंद्रयोरोजो बलमस्यास्तीति इनचंद्रौजस्वि।एवंविधं लग्नं पातादिकं न घातयेत्।उक्तं च वसि
ष्ठेन।एकार्गलोपग्रहपातलत्ताजामित्रकर्त्तर्युदयादिदोषाः नश्यंति चंद्रार्कबलोपपन्ने लग्ने यथार्कोभ्युदयेंधकारः।। अथ दोषापवादभंगमाह।
भंगा ये इति।ये भंगाः दोषभंगाः विबलाः निर्बलास्तत्र दोषभंगविषये फलानभवंति दोषभंगसमर्था न भवंति।तस्माद्दोषभंगकृतां बलं विचार्य दोषभंग
मादिशेत्।तथा चोक्तमस्ति।सामान्येनोदिता दोषाः भंगास्तेषां तु विद्विषैः।यदि ते बलहीनाः स्युः प्रध्वंसाभावतां ययुरिति।।अथ भावशुद्धिमाह।।संध्यंशतुल्या

य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु·भा·टी· फलः स्यात्। संधिभागसमानः ग्रहः अफलः स्यात्। सदसत्फलदाता न भवति। भावांशतुल्यः अखिलफलः स्यात्। अर्थान्मध्येऽनुपातः। विशेषमाह॥ संध्यर्द्ध
केऽस्यान्तरः संधेरधिकः परः स्यात्। भावफलदो न भवतीत्यर्थः। अथ भावाः संधयस्तेषां साधनमाह॥ भागांस्तु नतनाडिकाऽऽइत्यादिना। नतनाडिकाः र
२३ सहताः भागाः स्युः नतसाधनं जातकादौ उक्तं। रात्रेः शेषमितमित्यादिना। एतदुक्तं भवति सूर्ये इष्टकालाभ्यामिति इष्टकालं साधयित्वाऽऽइष्टकालभवं नतंच नतेच साधयित्वा ३
23 द्युणं सत् भागाः स्युः। प्राक्पश्चिमे नते क्रमेण तेन युक्ऊनयुक् ऊर्ध्वं पश्चिमे नते सूर्यः कार्यः। स सूर्यः दशमभावः स्यात्। तत्खं स षड्भं सुखं चतुर्थभावः
कथितवल्लग्नं शोध्यं वल्लग्नं ज्ञेयं। तत्षड्भं मदः स्यात्। एवं भावचतुष्टयं साधयित्वांतर्भावसाधनमाह॥ व्यस्ताः त्रिलवस्ति। विगतः अस्तः अस्तभावो
यस्मात् नत व्यस्तं तच्च अप्रभं च व्यस्तांभोत स्यत्रिलवः व्यस्ताः त्रिलवः राश्यादिकः ग्राह्यः। अथ दक्कुयुतः खाम्बपतितः उभोषयकाः दकूर ङ्गोऽसंतो ह्य
ग्लग्ने त्रिबुनियोज्याः। अयमर्थः। लग्ने योजितः स द्वितीयभावो भवति। लग्ने योजितः स तृतीयभावो भवति। अथ दक्कुयुत त्रिलवः कुभ्रे चतुर्थे यो
जितः सन् पंचमभावो भवति। द्विघ्नो योजितः सन् षष्ठभावो भवति। सषड्भषड्भाः सहिताः ते न सप्तमाज्ञेयाः। लग्नं सषड्भं मद इति यावत्। तनुमुखाः
लग्नादयो भावाः। अथ संधेः साधनं। संधिर्द्वियोगार्द्धकं। द्वयोर्भावयोर्योगार्द्धं संधिः। एवं भाव संधिसाधनं कृत्वा संध्यंशतुल्यो फल इति। प्रागुक्तं ग्रह
बलं विचार्य अनुपातश्चांतरे। भावसंध्यंतरेण हंसंधिखेटांतरात्फलमिति। जातकपद्धतेः एतत्स्थूलमानानयनं सूक्ष्मं जातकादवगंतव्यं॥ अथ क
र्त्तरीदोषलक्षणं सापवादं वृत्तेनैकेनाह॥ ढंदो वहिरजादिति। ढंदोऽन्तर्जातः। अथवा हरिजात् लग्नात् सकोशात् व्ययद्विगतयोः क्रूरयोः कर्त्तरी स्यात्।
अयमत्र कर्त्तरीलक्षणं। स्ववक्रीति। द्वितीये स्थितः क्रूरो वक्रगः स्यात्। अंत्ये द्वादशे क्रूरो ऋजुमार्गगः स्यात्। तदा महती कर्त्तरी स्यात्। अथ तद्भंगमाह॥ गु
न ३ रौ प्राप्ते सति सा कर्त्तरी स्यात्। एको भंगः। अथवा शुभे ग्रहे तनौ लग्ने सति सा नैव। द्वितीयो भंगः। स्वे द्वितीये अ[illegible]ज्ञे सति सा नेति तृतीयो भंगः। अथ
वा सौम्यखगे द्वितीये सति सा नैव चतुर्थो भंगः। वा अथवा केंद्रकोणे शुभः गुविदीज्यः भट्टगुः प्रक्रः विबुधः ईज्यो गुरुः तैः सद्भिः कालान्वेति सप्तम्यर्थे
तृतीया सा कर्त्तरी न पंचमो भंगः। वा अथवा कर्त्तरिकारकौ क्रूरौ दिवि चरौ नीच स्थितौ यदा स्यातां तदा न स्यात् षष्ठो भंगः। हि अवधारणे कर्त्तरी रामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लक्षणमुक्त्वा पंचकदोषं सापवादं वृत्तेनैकेनाह। लग्नं सेततिथिग्रहैरित्यादि। लग्नं इष्टलग्ने सेततिथि इतश्च सौतिथिग्रहैः ततिथिः।ग।ततिथिः।त
यावर्त्तमानं सेततिथिं। तिथि १५ वि १२ ग्र १० र्नगा मो ष्टि ८। ४ युक्तं क्रमेण। नव हृतमिषुशेषे बाणसंज्ञः क्रमेण रुग अ नलन्नृपचौराः पंचमो मृत्युरु
क्तः। ग्रहैर्हृतं नवभक्तः कार्यः। इम एकेवेदर्त्तुभूशेषकैः इभाष्टौ ८ द्रवौ ढौ २ वेदाश्चत्वारः ४ ऋतुः षट् ६ भूरेकः १ एते पंचकाः स्युरित्यर्थः। एतदुक्तं भ
वति। लग्नं प्रतिपदादिगततिथियुतं कृत्वा नव भिर्हृत्वा अष्टशेषे रोगः। द्विशेषेऽग्निः चतुःशेषे राजा षट्शेषे चौरः। एकशेषे मृत्युः। अपतैः कुत्रवर्ज्या
नीत्याह। रात्र्यर्कमौंजीगुरुजे त्यज। रात्रौ अर्कं आदित्यवारे मौंज्यां रुचं त्यज। अग्निं अग्निपंचकं बुदिवा दिति जो भौमवारः ओकोगृहं अत्र त्यज।। शनि
सेवेंदुषु दुइनं। बु दिवा शनिः शनिवारः सेवा स्वामिसेवनं इंदुः सोमवारः इषु इनं राजानं राज पंचकं त्यज।। इज्यारेति षुहं चौरं त्यज इज्यो गुरुवारः
आरो भौमवारः। इति गतिः यात्रेति यावत्। अस्य चौरं त्यजेदित्यर्थः। विवाहसिते वित्संध्यासु अपरमृत्युर्वरितं मतिरित्यर्थः। विवाहः प्रसिद्धः सितः शु
क्रवारः वित बुधवारः संध्या संध्याकालः असुमृत्युं त्यजेत्। अस्यापवादमाह। हीने तनौ तनौ लग्ने हीनबले सति अतिबले सति। तत्रापि यत्र लग्ने
बलाढ्ये तच्च निष्फलमिति बलंजातकात्तेयं। लघुजातके। अधि १ युतो दशा बा बुधजीव निरीक्षितश्चयोराशिः। सभवति बलवानिति विष
यभनवांशयोः श्रुद्धिं तथा लग्नान्नपं वृत्तद्वयेनाह। जन्मर्त्तोदयतो मृतीति। नो वर्गो त्समतो विनां तिमलू मिति। जन्मर्त्तोदयतः जन्मलग्न
जन्मराशिभ्यांसकाशात् मृतीये ऽष्टमभवनेयो चतदधिपौ तयोर्मृत्युभवनयोः स्वामिनौ येचतऊः मृत्युभवनगताः स्युस्ते बांशे शोन बांशः २६
अंगगे लग्नगतयश्च अपरं ते बांभंराशिः अंगगं लग्नगं तेन समुत्। तदा खलु निश्चयेनांत कृन्मरणकृत्स्यात्। नदाकदाचेद्यदि तत्स्वामिमित्रे क
तानस्यात्। तयोर्जन्ममृत्युभवनयोः स्वामिनौ तत्स्वामिनो। तयोः। अथवा यमर्थः।। तयोर्जन्ममृत्युभयोः स्वामिनौ तत्स्वामिनौ तयोर्यदि मित्रैक
तानस्यात् मित्रंच एकश्च मित्रैकौ मित्रैकयोर्भावो मित्रैकता सा चेन्नस्यात्। अनेनन सर्वस्य सार्थकता भवति। यदि तयोर्मित्रता स्यात् अथवा एकता
स्यात्तदानायं दोषइत्यर्थः। सिद्धांवशिष्टः। यस्याष्टलग्ने तदधीश्वरे वा राशौ दि दीशे पविलग्नगे वा समृत्युमाप्नोति तदा मनूजस्त्रिनेत्रमालोव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कवह्निनैवेति। अन्यच्च। जन्मर्क्षजन्मलग्नाभ्यां रंध्रेशावष्टमौ च नो। विलग्नसंस्थितानेतांस्त्यजेच्छं शानपि त्यजेत्। चूडामणौ। लग्नं वा लिख्य
मु॰मा॰टी॰ षंत्याज्यमष्टमं सर्वकर्मसु। तत्राप्येके शतास्त्यवत तस्तत्रैव दोषकृत्। नदोषोऽष्टमलग्नस्य यदि जन्मेशरंध्रपौ। सुहृदौ चेत्तदा कार्यं मंगलं मुनयो
२४ विदुरिति। चतुर्थद्वादशभवनयोर्दीवनात्रोक्ताः। यतश्चतुर्थद्वादशे लग्नेऽस्तं यदि गुणान्वितं। इति सर्वाचार्यमतं। हृदि ध्वांसगुणमेवांगीकृतं। तत्सु
रत्नाबृहस्पति। नच तनुं पंचेष्टखेटोनितं मृत्युं तद्दिवर्गोनितं इति। सगुणत्वेऽप्यंगीकारः। किं यद्यविस्तरेणेति भावेन। अथ नवांशशुद्धिमाह। शस्तांशा
24 इति॥ धटयुग्मभीरुधनुषां शस्तोंऽशः स्यात् धटस्तुला युग्मं मिथुनं भीरुः कन्या धनुः प्रसिद्धः एषामंशो नवांशः शस्तः प्रशस्तः स्यात्। तत्रापि विशेषमाह।
विज्ञास्तमोंऽशाविति। विगतो बुधो येभ्यस्ते विज्ञाः ते च ते अस्ताश्च ते षां भांशौ राशि नवांशौ मृतिं वितनुतः। अर्थादस्तस्य विबुधस्य भांशौ दोषकरौ न भ
वतः। यथा चंद्रपापयुतौ चंद्रेण पापग्रहेण वा युतौ मृतिं मरणं वितनुतः कुरुतः। वधूवरयोरिति शेषः। हीनौजसौ निर्बलस्य भांशौ दैन्यं दीनतां वितनु
तः। विशेषांतरमाह। नोवर्गोत्तमइ[illegible]ति। वर्गोत्तमतः वर्गोत्तमे अजनक्रतौलिकुलीराद्या नवांशा वर्गोत्तमं विना अंतिमलवं चरमनवांशं न
दद्यात्। लग्ने स एव नवांशो वर्गोत्तमं। तथा चरद्वें चरलग्ने च चरं लवं चरनवांशं नो दद्यात्। कस्मिन्सति। चंद्रे तौलिमृगस्थगे सति। तुलामकरगे सति। एत
च्चरत्रयोगं नो दद्यात्। अत्र चैतच्चतुष्टयमध्ये चंद्रे तौलिमृगस्थगे तु[illegible]लामकरगे सति इत्येवोक्तं। तन्मेषकर्कटयोर्विवाहनक्षत्राभावात्। तथा तनुं लग्नं पंचे
ष्टखेटोनितं नो दद्यात्। यत्र लग्ने पंचइष्टग्रहा न भवंति। तल्लग्नं न देयमित्यर्थः। अथेष्टलग्ने नवांशाल्लग्नसाधनमाह। तत्र तावन्मेषादिषु च्याद्यंशाना
हा मेषादिष्विति। मेषेऽजाद्याः पुनः पुनः पुनर्गणनया क्रमेण उक्ताः। तद्यथा। मेषे मेषाद्याः वृषमे मकराद्याः। मिथुने तुलाद्याः। कर्के कर्काद्याः। एवं सिं
हे मेषाद्याः। कन्यायां मकराद्याः। तुलायां धटाद्याः। वृश्चिके कर्काद्याः। पुनर्धनुषो मेषाद्याः। मकरे मकराद्याः। कुंभे घटाद्याः। मीने कर्क[illegible]टाद्याः।
एवं नवांशा उक्ताः। इत्यर्थः। इष्टात्तदंशात् पूर्वनवांशका गतांशाः दशाहताः दश १० गुणिताः त्र्याप्ताः ३ भाजितात् त्रिहृतात् लब्धाद्यास्तनुर्लग्नं स्यात्। अत्रोदाहर राम:
णं। इष्टलग्नं मेषः तत्र मेषादिकांशाः प्रवर्तंते इष्टांशः कन्या मेषात्सकाशात् अष्टमः पूर्वं शकाः पंच ५ एते दशाहताः ५० २४

CC-0 Dharmartha Trust J&K. An eGangotri Vaidika Bharata initiative

५०ञान शालवादिलग्नं०।२६।४०।०० इष्टलग्नसहितं००।२६।४०।०० अथोदयास्तशुद्धिमाह। लग्नांशौ स्वपदृग्यु
तौ न सुखदौ वान्योन्यपाद्युतितौ ताभ्यां सप्तमकौ तथैव युवतेः नोचे तयोर्मृत्युदौ। छिद्रघ्ने कोर्नाविलग्नके रविसि
तज्ञेन्द्वार्किजीवासृजो होरेशा द्युपतेः खलेह्नि खलजा नेष्टाः शुभे मध्यमाः। लग्नांशाविति। लग्नांशौ लग्नन
वांशौ स्वपदृग्युतौ स्वपतिना दृष्टौ युतौ वा सन्तौ न सुखदौ वरस्य सुखदौ स्यातां। वा इत्यथ वा अन्योन्यपाद्युति पा०४
तौ अन्योन्यपतिना आद्यौ इति तौ न सुखदौ स्यातां। इत्युदयशुद्धिमुक्त्वा अस्तशुद्धिमाह। ताभ्यां सप्तकौ तथैवेति।
ताभ्यां लग्नांशाभ्यां सकाशात्सप्तमकौ सप्तमलग्नतदंशौ तथैवेति सर्ववत्। स्वपदृग्युतौ युवतेः कन्यायाः सुख
दौ स्यातां वा इत्यथ वा तौ सप्तमलग्नसप्तमनवांशौ अन्योन्यपाद्युतितौ युवतेः कन्यायाः सुखदौ स्यातां। एवं नो चेत्
न स्यात्तदा तयोर्मृत्युदौ स्यातां क्रमेण। अथेष्टकाले होरासाधनमाह। तच्छिद्रघ्न इति। अर्कोनाविलग्नके छिद्रघ्नेहृते
सति द्युपतेः सकाशात् होरेशा भवंति। तेषां गणनाक्रममाह। ते के होरेशाः। रविसितज्ञेन्द्वार्किजीवासृजः। र
विः प्रसिद्धः। सितः शुक्रः। ज्ञो बुधः। इंदुश्चंद्रः। आर्किः शनिः। जीवो गुरुः। असृक् मंगलः। खलेह्नि पापवारे खलजा
होरा नेष्टा। शुभे मध्यमा स्यात्। अर्थात् शुभा होरा शुभवारे शुभतारा। पापवारे मध्यमा स्यात्। अत्रोदाहरणं। गुरु
वारे इष्टार्कः ९।२।५ इष्टलग्नं ४।०।० इदमर्कोनं १।२७।५ इदं छिद्रघ्नं ४।८।२।४० अंकैकसमाना गता होरा अतस्तत्र ०
वर्तमाना पंचमी होरा सा गणनाक्रमेण द्युपतेः सकाशात् गुरोः सकाशात् गणनीया। जीवासृजा इति गणनया बुध
होरा वर्तमाना। अथ लग्नेंद्वोः परममित्रग्रहज्ञानार्थं उपायमाह। तावत्तस्य फलमाह। लग्नेंद्वोः स्मरगे शुभाशुभ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

= अत्रोक्तं ह्यद्भः अंगोलग्नं अत्र अंगश्च अंगोगोतयोर जांगयो रूनात् सप्तमस्य ग्रहस्य कात २ कृतं मौविंकात् कलिकाकरणात् = २

खगेस्तश्चाधिमत्सूतत्तो जांगोनात् कृतैर्मौविंकात् खखयमैः २०० र्लब्धं यदा ध्रीषवः ५४ सत्स्विष्टोऽत्र निजांशभेऽस्त

२५ मखिलं परस्परं त्रिआयगोद।२।२२ कै वा ख ७० जलाध घ ८ को ए ग ८।५ शुभो जांम एमोत्रेन्न तत्र।७। लग्ने ह्येति।

लग्ने ह्योः स्मरगे सप्तमगे शुभखगे सति तदाऽऽधिमत्सूतः शुभे सति अधिमं न तत्तापोऽस्ति। अशुभे सति मृत्यु

भवति। तदा कदा ततः स्मरगात् ग्रहात् अंजांगोनात् कृते कलिकात् खखयमैः २०० हृता या लब्धं अध्रीष

वः चतुः पंचाशत् स्यात् ५४ तदैवाधिमत्सूतः अन्यथा नेत्यर्थः। अत्रोदाहरणं। एवं कल्पितमिदं लग्नं १।१०।० तत्

सप्तमगोयं कश्चित्।०।१२।८। अयं लग्नोनः ८।२।७ अयं कृतमौविंकः ०।८८।७ अस्मात् खखयमै २०० र्लब्धं ५० अ

थास्य भंगमाह। सन्निति स खगः स्विष्टोऽत्र निजांशभे वर्तमानः अस्तं अस्तभवनं अखिलं हएं यदा परस्पं त

दा जामित्रं न स्यात्। शोभनश्चासौ खश्च स्विष्टः शुभमित्रं स्विष्टं च उच्चं च निजश्च स्विष्टोच्चनिजाः तेषा

भं चत्र प्रभं स्विष्टोच्चनिजांशभं तस्मिन् स्विष्टोच्चनिजांशभे स्विष्टस्य शुभमित्रस्य अंशे नवांशे भे राशौ

वा वर्तमानः। अथवा उच्चस्य अंशे भे वा वर्तमानः। अथवा निजस्य स्वस्य अंशे वा वर्तमानः। अस्तमखिलं प

श्यत्तदा तन्नेति षड्भंगाः। वा इत्थथवा अर्केंद्रवौ अरित्रिआयगे सति। षष्ठतृतीयैकादशगे सति तन्नेति त्रयो भं

गाः। वा इत्थथवा खेजलाद्यकोणः शुभः अजं चंद्रमसं हृष्ट्येयथा सा तथार्द्धतेषु पश्येत। तदा तन्न। खे दशमं जलं

चतुर्थं आद्यं लग्नं कोणं नवपंचमे एषामन्यतमम् गतोऽन्यतमः शुभग्रहः चंद्रमसं निखिलदृष्ट्या यदि पश्येत् तदा जामि २५

त्रं न स्यादित्यर्थः। एते पंच भंगाः सर्वे मिलिताश्चतुर्दश भंगाः संपद्यंते। अथ दृष्टिलक्षणमाह। अभं कोणं ब्वाय

रै नित्रुक् मुपुत्राः कमात् दृष्टियाह दृष्ट्यान्ये चरणो त्तरं च सकलाः पश्यंति दृष्ट्या घुनं अर्ध ... मिति त्र्यभं तृतीयदश

मं कोणं नवमपंचमं। अवं ... तद्यथा मं एत ... नयं क्रमेण एनिः ... स्य ... यस्या पस एनिः शनिः। एनिगु ...

शुभः शुभग
हः=२
दृष्टलिसं ...
ध्या=२
यामित्रं=२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भृगुत्वाः शनिगुरुभौमाः एकंदृष्ट्यापश्यंति। तद्यथा। शनिस्त्र्यभं ३।१० एकंया दृष्ट्यापश्यति। गुरुः कोणं ५।९ एकंयादृ
ष्ट्यापश्यति भृगुत्रः ४।८ बुधः ४।८ सलयादृष्ट्यापश्यति। सकलग्रहाः द्युनं सप्तमं एकंपश्यंति। अथ षड्वर्गसाधनं विवक्षु
स्तावत्तन्नामान्याह। भं होरा त्रिलवो नवांशकः ४ द्वादशांशः ५ त्रिंशदंशः ६ क्रमाद्वर्गाः सतशुभजः परैस्तु सुहृद्दाणं
नाख्यवर्गेनिकं। भं होरेति। भं गृहं होरा राश्यर्द्धं त्रिलवो द्रेष्काणः नवांशकः प्रसिद्धः द्वादशांशः त्रिंशदं
शः प्रसिद्धः। क्रमादेते वर्गाः प्रोक्ताः। शुभग्रहजो वर्गः सतशुभः प्रोक्तः। परैराचार्यैः सुहृदो मित्रवर्गः सतशुभदः
। आख्यवर्गेनिकं अंगं चतुर्थवर्गे निं अंगं लग्नं न सन्प्रोक्तं। अथैषां साधनमाह। प्रोक्तं पाकग्रहमोजभेऽर्के
=ईशा.७ शशिनोर्होरे समेऽर्कयोर्द्रेक्काणे प्राक्सुतधर्मपो नवलवाः प्रोक्तः स्वतोऽर्कपाकः। भुक्तेजस्य यमास्त्रांश
रमुनी ५।७।८ भाः स्वर्थेपवलवोप युग्मभे। त्रिंशांशा विषमे त एवगदितास्त्वस्ताश्च षड्वर्गतिः। प्रोक्तमिति। गृहं यस्य ग्रह
स्य यद्गृहं तत्पाकप्रोक्तं। भेशा मंषु वृच्चमित्यादि। अथ होरासाधनं। ओजभे विषमराशौ अर्कशशिनोर्होरे क्रमे
ण भवतः। अथ समराशौ अर्केन्द्वोर्होरे भवतः। प्रथमे पंचदशभागेषु अस्य चंद्रस्य होरा स्यात्। अपरपंचद
शभागेषु अर्कस्य होरा स्यात्। अथ द्रेष्काणसाधनं। द्रेकेति। द्रेकोद्रेष्काणस्त्रिविधो दशभागात्मकस्तस्य द्रेई प्राः
क्रमेण प्राक्सुतधर्मपाः ज्ञेयः। प्राग्लग्नं। सुतपंचमं। धर्मनवमं। तान्येतानि यथा। एतदुक्तं भवति। प्रथमद्रेष्का
णस्वामी लग्नपतिः। द्वितीयद्रेष्काणस्वामी पंचमपतिः। तृतीयद्रेष्काणस्वामी नवमपतिः स्यादिति। नवमलवः प्रो
क्तः प्रागेव शास्त्रोंशाइत्यादिना। अथ द्वादशांशसाधनं। स्वतोऽर्कांशकः स्वस्मादिति स्वतः लग्नेतद्रूपथः। अर्कां
शको द्वादशांशो ज्ञेयः। तद्यथा। त्रिंशद्भागास्त्रिंशत ३०। एते द्वादशभिर्विभाजिताः। लब्धं सार्द्धभागद्वयं।

अथ प्रथमपंचदशभागेषु अर्कस्य होरा। अपर पंचदश भागेषु चंद्रस्य ... होरा स्यात् २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२।२०। इदं द्वादशांशभागं। तदेव गणनीयं। सार्द्धभागद्वयं लग्नस्य द्वादशांशकः। तावदेव तत्तुरस्यस्येति। लग्नस्योत्प
न्नभागावसानपर्यंतं गणयेत्। यस्मिन् राशौ विश्रामस्तत्स्वामी द्वादशांशनाथः स्यात्। अथ त्रिंशांशसाधनं। शुक्रे
२६ ति। शुक्रः प्रसिद्धः। ज्ञो बुधः। इज्यो गुरुः। यमः शनिः। अस्त्रज्ञो मंगलः। एतेषां पंचानां क्रमेण शरमुनीभाष्टिवसुः स्युः। शै
26 राः पंच। मुनयः सप्त। इभाष्टौ। अष्टिः पंच। दश वसवः पंच। भागाः शुक्रादीनां स्युः। एतद्युग्मभे युग्मराशौ ज्ञेयं। तदुपि लग्
ग्नोत्पन्नभागावसानपर्यंतं गणयेत्। यत्र विश्रांतिः स त्रिंशांशनाथः। विषमराशौ तु एवं गदितग्रहाः भागाश्च व्य
स्ताः विलोमाः ज्ञेयाः। इति षड्वर्गी निरूपितः। अथेष्टकालसाधनं। विवस्वत्तावत्सूर्यसाधनविवस्वत्तावत्सू
र्यसाधनमाह। संक्रांत्यंतरहोद्धृताद्दिनगणाद्राशं भस्वर्वेरिरविमेषाद्यातभयुग्यतोयनलवैरत्रौ सषड्भुः सत्वात्
ष्ट्रोगयांशनिजोदयाहति स्वरसमाप्तं तथा लग्नतो भुक्तांशकलितेन युजि विरगैः कालः स्फुटो भोदयैः। संक्रांत्यंत
रहति। संक्रांत्योः अंतरालं तत्र अहानि दिनानि तैर्हृतैः भाजितैः। एवंविधाद्दिनगणात् संक्रांतेः सकाशात् दि
नदिनसमूहः तस्मात् यदाप्तं लब्धं भम् स्वर्वो राशिः स्वर्वैः त्रिंशत् भागकलादिको रविः स्यात्। किंभूतो रविः मेषात्
सकाशात् यातं भुक्तं गतराशिः सूर्यभुक्तराशियुक्तस्यार्थः। स तात्कालिको रविः स्यात् इत्यर्थः। अत्रोदाहरणं। तु
लावृश्चिकसंक्रांत्योरंतरदिनानि ८।१८।५६।०० तथा तुलासंक्रांतेरिष्टदिनगणः ५।१९।००। अस्माद्दिनगणात् संक्रां २६
त्यंतरहोभिर्लब्धराश्यादि ०।०५।१७।०।१६ इदं सूर्यभुक्तराशिद्युतं ६।०५।१७। अयं तात्कालिकः सूर्यः। सूर्ये अयनल
वैर्युतः कार्यः अयनांशाः मेषात्तरोरूः अत्र सिद्धाः। कृताब्धूनितेशाके षष्ठ्याप्ते अयनांशकाः इति। स अयनल ✓अप
वयुक्तो रविः रात्रौ रात्रीष्टकालसाधनविषये सषड्भः कार्यः। षड्राशियुक्तः कार्यः। तद्भोग्यांशानिजोदयाहतिः स्व
=संक्रांतिदिनगतसमूहः संक्रांत्योरंतरदिनैर्भाजितोयदि... लब्धं ...कोरविः स्यात् अर्थः... रविः मेषादिराशिगतयुक्तः सषड्सूर्यः=
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समाप्तः १ कालः स्यात्। तस्य सायनांशस्य खेर्भोग्यांशास्तद्भोग्यांशाः तद्भोग्यांशा निजोदयाश्च तेषां आहतिः गु
णनं तस्याः सकाशात् खरामाप्तं त्रिंशता लब्धं सूर्यस्य भोग्यकालः स्यात्। निजोदयास्स्वदेशीये राश्युदयास्तैर्व
हतं स्यादित्योऽवगंतव्यः कथंभूतः कालः तथैवागतो भुक्तांशाकलितेन युक्तः। तथैव सूर्यस्य भोग्यकालसा
धनवत्साह। अगतः लग्नभुक्तांशाकलितेन भुक्तराशिभुक्तभागैराकलितेन युक्तः युक्तः एतदुक्तं भवति।
इष्टलग्ने अयनलवयुक्तं कृत्वा तद्भुक्तांशो निजोदयागुणनीयाः त्रिंशताभाज्याः लब्धं लग्नभुक्तकालः। ते
न कालेन सूर्यविभोग्यकालो युक्तः कार्य इत्यर्थः। पुनः कथंभूतः। विवरगैर्भोदयैर्युक्तः। विवरं सूर्यलग्नांतरा
लं। तत्रगतैर्भोदयै राश्युदयैर्युक्तः युक्तः सपलमयः कालः स्फुटः स्पष्टः इष्टकालः स्यात्। षष्टिभक्तो घटी
स्यादित्यवगंतव्यं। अथेष्टकालसाधने विशेषमाह। लग्नार्कौ यदि चेदेकभेंशाविवरात्स्वोदयघ्नात्ख
रामाप्तिः कालइनात्तनुर्यदि तनुः सूर्योदयात्प्रागसौ। लग्नार्काविति। लग्नार्कौ लग्नसूर्यौ यदि एकभे
स्तः तदा त्र्यंशाविवरात् लग्नार्कयोर्भागांतरात्स्वोदयघ्नात् निजराश्युदयगुणितात् खरामा
प्तिस्त्रिंशता लब्धः स कालः इष्टकालः स्यात्। तत्रापि विशेषमाह। इनात्तनुरिति। इनात् सूर्यात् तनुर्ल
ग्नं यदि तनुः लघुः स्यात्तदासौ इष्टकालः सूर्योदयात् प्राक् पूर्वं स्यात्। सोपि षष्ट्या भक्तो घटिका लवैः स्या
दित्यवगंतव्यं। अथ ज्ञातं कालं यंत्रं विना साधितुं न शक्यते। अतो यंत्राणां मध्ये मु ख्यस्य घटीयंत्रस्य स्था
पनकालमाह। कुंड इति। अंभःपारस्थिते उदकपूर्णे कुंडपात्रे घटिकामज्जनसमये कुंडस्य महलं उत्तानपात्रं मुद्र
सार्थं तस्मात्कुंड रूपे पात्रे उदकपूरिते सुघटिकां षष्टिपलप्रमाणं न्यसेत्। क्षिपेत्। कस्मिन् सति। अर्के दि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३७
27
यास्तेजातेसतिसूर्यस्पत्र्ऋद्धेदियेऋद्धास्तेचजातेसति। किंकृत्वा। स्तुत्वाप्रार्थयित्वा। प्रार्थनागंथांतरेउक्ता
। यंत्राणंमुख्यरूपासिब्रह्मणानिर्मिते घटि। देवसोः शुभकालाप्तिहेतवेभवशोभनेति। अथप्रतिष्ठितायांघ
टिकायां तद्भूननफलमाह। साप्रतिष्ठिताघटी अग्नित्रयवायुगानशुभदास्यात्। अग्नित्रयंआग्नेयादिप्र
दक्षिणक्रमेणदिशांत्रयंवायुवीथ्यदिशारतिदिक्चतुष्टयंप्रतिगतानशुभदा। अथोदन्यदिग्गतातत्रैव
स्थितावाशुभदास्यात्। तथाचोक्तंगंथांतरे। संस्तुत्यैवंघटीतोयेयांदिशंप्रतिगच्छति। एवंविधादिकलंकुर्या
त्स्थितामध्येधनप्रदा। सौभाग्यंनिधनंनार्याः प्रथमस्तुरुजान्विता। भर्तुःप्रियाच्चवश्याचसान्याविंत्त
स्तुतान्वितेति। एवंगमनफलमुक्त्वाद्दर्णताफलमाह। द्दर्णाग्निपंचस्वथेति। अग्निपंचसुआग्नेयादिपंच
सुदिक्षुद्दर्णाघटीनशुभदा। दिक्षुशेषासुकन्यायामाग्नेवैधव्यदायिनीति। अथगोधूलिलग्नमाह। गो
धूलिंपरजादिकेशुभतरंप्रोक्तंस्तुपंचांगकेशस्ताप्याकेपरमर्द्धनाडिकामिहेदुंलग्नषष्ठाष्टगंद। सोगां
गंकुजमष्टमंगुरुमयमाहुः पातमर्कक्रमंजगाद्विप्रमुखानांतिसंकटदंसदोवंनाढ्यकचित्। गोधूलिमिति
। गोधूलिंलग्नंसायंकाललग्नंपदजाति गेहीनजातिकेशुभतरंप्रोक्तं। नम्रवर्णानां। कुत्रस्तुपंचांगके
पिच। उक्तपंचांगके। अत्रपंचांगशुद्धिर्मुख्या। तत्रकालप्रमाणंविशेषवदारेणाह। कथंभूतंगोधूलिंअर्द्धा
स्तात्सकाशात्प्राकपरतोर्द्धनाडिकं। प्राकपंचदशपलानि। परतःपंचदशपलानि। एवमर्द्धनाडिकामितसर्थः।
अत्रत्याज्यमाह। इहास्मिन्गोधूलेलग्नषष्ठाष्टगंइंदुंचंद्रमसंजह्यात्। त्यजेत्। पुनःकिंकिंमहापादिस्याह। सो
^अर्थादन्यदिक्षुद्दर्णाघटीशुभास्यात्। उक्तंच। उत्तरेशान्यरूर्वासुघटीद्दर्णाशुभप्रदा ^

उक्तंगंथां
तरेअग्न
लग्नेसति
तसोग्यां
३७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गं भं । उग्रग्रहसहितं लग्नं कुजं भौममष्टमं । गुरूदयमाह । गुरूदयानि दिनं । पातं महापातं । सिद्धांतगम्यं । अर्कसंक्रमं सू
र्यसंक्रांतिं जह्यात् । अन्ये दोषा न त्याज्या इत्यर्थः । अथ गुरूदयमाह स्यक्तं तद्दोषबलाभात् । गुरुदिने सूर्यास्ता आक्रया
मार्द्धं परतो यमघंटः । शनिदिने अस्तमया आक्क परतश्च कुलिको । मार्त्तंडोदयतः । स्मृता दिनपते यमार्द्धेनाथाग्र
हा मार्त्तंडात्मजभोगउत्तरलवस्तज्ञो अशुभे कर्मणि । त्याज्योसौ कुलिकस्यनेन न्यायेन शनौ अस्तात् आक्क कुलिको
भवति । इति कृतो गुरुदयानिवारो निर्दितो । अथ विशारी नामपि कंचित्कार्यविशेषेण गोरजे प्रशस्तिमाह । विप्रमुखे
तिसंकटे इदं सद्यौवनाढ्ये कांचिदिति यौवनाढ्ये अतिसंकटे प्राप्ते सति कंचिल्लग्न शुद्ध्यभावे इदं गोधूलं विप्रमुखे
विप्रप्रभृतिवर्णत्रये सतत शुभः स्यात् । अन्यथाने सार्थसिद्धं । एतदुक्तं ज्योतिर्निबंधे । घटी लग्नं यदा नास्ति तदा
गोधूलिकं स्मृतं । शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन । लग्नशुद्धिर्यदा नस्याद्यौवने समुपस्थिते । तदा वै स
र्ववर्णानां गोधूलं शुभदं स्मृतमिति । अथोद्वाहवेदिकालक्षणमाह । वेदी प्राक्प्रवणा चतुर्वरकरा हस्तोछ्रिती यस्य
स्य दोजादेर्द्वित्रिरुगांगुलैरपचितासौ त्वावह्निवामितः । वेदीति । प्राक्प्रवणा पूर्वनिम्ना । चतुर्वरकरा चतुर्भि
र्वरकरैः प्रमिता चतुर्वरकरा वरो वैवाह्यः हस्तोछ्रिता हस्तप्रमाणोन्नतो । अन्यस्य ब्राह्मणस्योक्ता । दोजादेः
क्षत्रियादेः सा विप्रवेदी क्रमेण द्वित्रियुगांगुलैरपचिता हीना कार्या । क्षत्रियस्य द्वाभ्यामंगुलाभ्यां हीना वै
श्यस्य त्रिभिरंगुलैर्हीना । शूद्रस्य चतुरंगुलैर्हीने त्यर्थः । साकं कार्ये त्याशंक्याह । वह्निवामितः इति । वह्निरिति
गृहाद्बहिः वामतो वामभागे । अथ नानाविधकर्मणां अंगं कस्मिन्न नक्षत्रे कर्त्तव्यमित्याह । यस्यांग यद्दोगिनो
गादितमेकुर्याद्दिहेद्दोर्बले नालोकयेत् । विवाहतस्तत्परि नवाद्भिः प्राज्ञ कुर्यादिदं । यस्यांगमिति । यस्य कर्मणः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यत्तु अंगं अग्रजनो मुख्यस्यागादित भेउक्तेन तत्रैव कुर्यात्। इहास्मिन्नंगभूते कर्मणि इदोर्वलं नालोक्यं न विचारणीयं
। यत्र विवाहे विशेषमाह। दलनं कंडनं मंडनं वेदिका गृहसमार्जनं निवारकमंडपाः। करतलग्राहमध्यगतागतं
२९ तदाखिलं विदधीत विवाहभे। तत्र विवाहे विशेषमाह। विवाहतः विवाहदिनात्प्राक् त्र्यहे न वा हि तृतीयष
२८ ष्ठनवमे हि इदं अंगं विवाहांगं न वर्ज्यमिति। विवाहांगान्नियथा। दलनं कंडनं चैव व्यंजनं सोदकानि वायुवा
र मंडपो वेदीकुंकुमं वर्णकं तथेति। अथ क्रमप्राप्तं वधूप्रवेशमाह। लग्नादाविह दिनांततः समसुनौ ७ घं ५
कं ८ घु पूर्व ई युग्मघस्रे मास्यपि हायनेष्वरं मिताद्वर्षात्परं त्वसमया वैशाखमार्गासिते जगुः श्रुतियुगो ह्याहस्ते
चित्राश्विनीज्यैष्ठे श्वानवमंदिरे निशि वधूसंवेशमंगे स्थिरे। लग्नादिति। लग्नाद्विवाहतः सकाशात् अष्टि १६
दिनांतः षोडशदिनमध्ये समसुनौ ७ घं ५ कं ८ षु घस्रेषु समाः समसंख्याकाः। सुनिः सप्तमः इषुः पंचमः।
अंको नवमः एषु घस्रेषु दिवसेषु अथो ऊर्ध्वं षोडशदिनादूर्ध्वं अयुग्मघस्रे विषमदिने मास्यपि विषमे हायने व
र्षे विषमे वधूसंवेशं प्रवेशं जगुरूचुः। एतदुक्तं भवति। षोडशदिनमध्ये समदिनेषु कर्तव्यः। षोडशदि
नातिक्रमे मासपर्यंतं विषमदिवसे वधूप्रवेशः कार्यः। प्रथममासातिक्रमे वर्षपर्यंतं विषमे मासि कर्तव्य २९
स्तदा विषमदिननियमो नास्ति। एवं प्रथमवर्षे अतिक्रांते पंचमवर्षपर्यंतं विषमे वर्षे कर्तव्यः। तदा विषममा
सनियमो नास्ति। पंचमाद्वर्षात्परं विषमवर्षनियमो नास्ति। अथ विलंबित वधूप्रवेशः कस्मिन्मासि पक्षे
कर्तव्य इत्याह। वैशाखमार्गसिते। वै वैशाखः। फा फाल्गुनः। मार्गो मार्गशीर्षः। एषां सित शुक्लपक्षस्तस्मिन्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

।कैः श्रुतियुग्मो द्वाहस्तचि त्राश्विनीभिः। श्रुतियुगं श्रवणधनिष्ठा। उद्वाहस्त्वाति पूर्वोक्तानि।। चित्राप्रसिद्धा।
अश्विनीप्रसिद्धा। इज्यः पुष्यः। एतैर्नक्षत्रैः अनवमंदिरे जीर्णगृहे नवसीनमंदिरे कन्यां नवोढां न प्रवेशयेदि
ति निषेधात् नवमंदिरे स्युक्तं भवति। उक्तं च। वधूप्रवेशनं कार्यं पंचमे सप्तमे दिने। नवमे च शुभे वारे सुलग्ने
शशिनो बले इति। नारदः। आरभ्योद्वाहदिवसात् षष्ठे वाप्यष्टमे दिने। वधूप्रवेशः संपत्त्यै दशमे प्यसमे दिन
इति। संग्रहे। विवाहमासे च वधूप्रवेशो युग्मे तथा षोडशवासरांतात्। तदूर्द्ध्वमब्दे ऽयुजि पंचमांतादतः
परस्तान्नियमोपि नास्ति। तद्द नारदः। समे वर्षे समे मासि यदि नारी गृहं विशेत्। आयुष्यं हरते भर्तुः
सा नारी मरणं व्रजेदिति। भास्करव्यवहारे। रात्रौ विवाहे भ शलेसन्मुहूर्त्ते स्थिरोदये। वधूप्रवेशनं
वात्र प्रतिष्ठ कार्य्यं विदुः। स्त्रीस्तेवि विवाह कैः शुद्धि दर्पणोश्च शुभप्रदः। वधूप्रवेशनं कार्यं पंचमे सप्तमे
तं यदि। मार्गफाल्गु। नवे शाखे शुक्लपक्षे शुभे दिने। मूलपुष्यमृदुस्वाती।। स्थिराश्विश्रुतिवासवे।। वि
हमे च रमे नारी प्रविष्टा पुत्रिणी भवेत्। अथ विवाहोपरि प्रथमवर्षे येषु मासेषु कन्यायाः पस्य गृहे नि
वासो निषिद्धस्तान् सफलानष्ट्ते नैकेनाह। उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका। हन्यात्तज्ज
ननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं। पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये।। तिष्ठंती पितरं
निहंति न भयं तेषामभावे भवेत्। उद्वाहादिति। उद्वाहात्सकाशात् प्रथमे प्राप्ते शुचौ आषाढे कन्यका
यदि भर्तुर्गृहे वसेत् तदा तज्जननीं भर्तुर्जननीं हन्यात्। क्षये क्षयमासे यदि भर्तुर्गृहे वसेत्तदा निजत

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मुं हन्यात्। प्रथमे इति सर्वत्र संबध्यते। ज्येष्ठे दिवसे तदा पति ज्येष्ठकं पत्युर्ज्येष्ठं भ्रातरं हन्यात्। यो वै
यदि भर्तुर्गृहे वसेत्तदा श्वशुरं भर्तुः पितरं हन्यात्। मलिने अधिमासे यदि भर्तृगृहे वसेत्तदा पतिं भर्तारं
२९ हन्यात्। चैत्रे चैत्रमासे प्रथमप्राप्ते स्वपित्रालये तिष्ठंती कन्या पितरं स्वजनकं निहंति। अथास्यापवादमा
२९ ह। न भवेमिति। तेषामभावे तेषामंतरेण तेषां भर्तृजनन्यादीनां अभावे सति भयं न भवेत्। भर्तृगृहे
वासे हि तेषां विभयं न भवेदित्यर्थः। अथ गांधर्वविवाहमाह। ऋक्षं तेषु पुनर्भवापरिणयप्रोक्तो विवाहो ल
ग्नैर्नालोक्यं तिथिमासवेधगुरुशुक्रास्तादि तत्रार्कभात्। त्रिंशदैर्दुमृतिर्धनं मृत्युर्मितिर्मृतः पुत्रो मृति
र्दुर्भगा श्रीरोगनस्व मणो ध. ती. १८।३१। २२ युग ४ तत्व २५ देवैर्यः सामिजित्। ऋक्षं तेषु इति। ऋक्षाः प्रसि
द्धाः अंत्यारजकाद्यः तेषु पुनर्भवापरिणयः प्रोक्तः। कैः विवाहो लग्नैः स्पष्टं। तत्र पुनर्भवापरिणये ति
थिमासवेधगुरुशुक्रास्तादीनां विलोक्यं। शेषं स्पष्टं। तथा चोक्तं ज्योतिर्निबंधे। न शुक्रास्तादिकं चिंत्यं
शुद्धिर्वेधादिकं तथा। पुनर्भूवासं वरणे न मासा तिथिशोधनमिति। अथ व्रतबंधपदेन तत्र शुद्धिमाह। वि
श्वे तेषु विषुवित्रिषु क्रमेण मृतिर्मरणं प्रथमे त्रिके। द्वितीये धनं। तृतीये मृतिः। चतुर्थे मितिः। पंचमे पुत्राः
बहुत्रिके मृतिः। सप्तमे दुर्भगा। अष्टमे श्रीर्लक्ष्मीः। नवमे त्रिके ऽपि नितांतं प्रोक्तं। अथ ऋक्षपदे शुद्धिमाह। अ २९
र्कभादृक्षमनुवर्तते। ध. ती. १८ युगतत्त्वदेवैः ध. तिरश्चाद्यर्णा १८ एकादशा ११ युगं चतुः ४। तत्त्वं पंचविंशं २५ ए
तस्मिन्निमित्ते अर्कभादेतान्मितस्यर्थः। सामिजिदृक्षेण याते चतुष्टये असयोमृत्युः स्यात्। यद्यादि न्ये
शुभं। अथ नानाविधशास्त्राण्याह। मुक्त्वाये वसुतामयोचितनरो दधात्र सावित्रिका। मारब्धोत्सव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

केयद्राजनिमृती स्यातां स्वगोत्रे कश्चित। सांगं तद्विदधीत वाजमितरे। अस्मादारभे तत्पूर्वतो यज्ञोद्वाहनचौ
लमौंजिकमहस्सु स्वर्गादिकान्त्रित्रिषु। भुक्तायैवेति। उपोषितनरः भुक्तायैव कृतभोजनायैव स्तुतां क
न्यां दद्यात्। चपरं उपोषितनरैः भुक्तायैव वटवे सावित्रीकां गायत्रीं दद्यात्। तदुक्तं ज्योतिर्निबंधे। भुक्तां समु
द्वहेत्कन्यां सावित्रीं ग्रहणं यथा। उपोषितः सुतां दद्यात् … संगताय वरायचेति। अर्चिताय वरायचेति वा पाठः। आरब्धोत्स
वके यदा जनिमृती स्वगोत्रे स्यातां आरब्धोत्सवके आरब्धे कार्ये स्वगोत्रे स्वगोत्रमध्ये यदा जनिमृती जन्ममरणे वृद्धि
सूतकं त्वयमृतके स्यातां तदा सांगं तद्विदधीत तदारब्धं कार्यं कुर्वीतेत्यर्थः। इतरे जनाः वाजं अन्नं अपरे असगो
त्रिणः विदधीरन्। वाजमन्नं गस्त्रह्राजो वाजं पीयूषमुच्यते। इत्यनेकार्थध्वनिमंजर्यां। शेषं सुगमं। उक्तं च। विवाहो
त्सवयज्ञादावारब्धे सूतकं यदि। सांगं तत्कर्म कुर्वीत अन्नदानादिकं परैरिति। अस्मान्निश्चितादिनात्पूर्वतः प्रथम
तः यज्ञोद्वाहनचौलमौंजिकमित्येतत्कर्मचतुष्टयं क्रमात्स्वर्ग२१ दिक१० त्रि३ त्रि३षु आरभेत। यज्ञे एकविंशति दिने
षु उद्वाहं विवाहं दशसु दिनेषु चौलं त्रिषु दिनेषु। मौंजिकं त्रिषु दिनेषु। उक्तं च। एकविंशत्यहं यज्ञे विवाहे दशवासराः
त्र्यहं चूडोपनयने नांदीश्राद्धं विधीयते। अथवा … रंभलक्षणं। आरंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीश्रा
द्धं विवाहादौ श्राद्धं पाके परिक्रिया। नो श्राद्धं त्वयदर्शे नैत्यकं मधीतिं शीतलाभ्यासप्लुति … मसीमसिंध्वातिपातमेकु
कुलजाः सव्यातिपातं कश्चित। उत्पापावधि मंडपस्य संशरागाहो विषवे समे घुडास्ये न गृहो हुहो सहजया
स्तुल्याक्रिया वा ततः। नो श्राद्धमिति। नयदर्शे नैत्यकं श्राद्धं अधीतिं पठनं शीतलाभ्यासप्लुतिं शीतोदकेषु आप्लुतिं
स्नानं। सीमासिंध्वतिपातनं। सीमा ग्रामसीमा मर्यादा इत्यर्थः। सिंधुर्महानदी। तयोरतिपातः उल्लंघनं। सव्या
तिपातं अपसव्यं। इत्येत एककुल … जा गोत्रिणः कश्चिन्नो कुर्युः। किमवधि मंडपस्य उत्पाद्यावधि।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

=विवाहमारभ्य चतुर्दिनेषु श्राद्धं दिनं दर्शादिनं यदि स्यात् । वैधव्यमाप्नोति तदा तु कन्या जीवत्पतिश्चेदनपत्यता स्यात् ।।। पाठांतरं स्मृतिसारे =
। यावन्मंडपोद्वासनं स्यात्तावत्कुर्युरित्यर्थः । उक्तं च । दर्शश्राद्धं त्रयश्राद्धं शीतादिः स्नानमेव च । प्राचीनावीतिक
रणं नदीसीमातिपातनं अन्यच्च नित्यश्राद्धमथीतिं च स्नानं च पिष्टपिष्टैस्तिलैः सपिंडा नैव कुर्वीरन्मंडपोत्थापनाव
२४ धि अथ मंडपोत्थापनं कदा कार्यमित्याह समाणागा इति शराः पंच अगाः सप्त मतान्मिताहोर्दिनयोः पंचसप्तमे समेष
३० ष्ठरहिते न समे हि समदिने उद्वासः उक्तं च मंडपोत्थापनं कार्यं समे च दिवसे बुधैः षष्ठं च विषमं नेष्टं हित्वा पंच च सप्तमौ वर्षो
इति अब्दांतः वर्षमध्ये गृहोद्वाहौ न कर्तव्यौ सहजयोः एकमातृजयोः पुरुषयोः स्त्रियोर्वा तुल्यक्रियासमानं कर्म न
कुर्यादित्यर्थः भिन्नमातृजयोर्न दोष इत्यर्थः तथा चोक्तं ग्रंथांतरे एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः न समान
क्रियां कुर्यान्मातृभेदे विधीयते समानक्रियेति द्वयोश्चौलं द्वयोर्व्रतबंधो द्वयोर्विवाहो वा सहजयोरित्यनेनैकमातृजत्वं
संभवति अब्दांतर्वर्षमध्ये गृहोद्वाहौ न कर्तव्यौ उक्तं च नैकस्मिन्वत्सरे कार्यौ गृहोद्वाहौ कथंचनेति उद्वाहेति उद्वाहव्रत
१० चूडके क्रमेण अष्टदलं तत्खंडं अष्टदलं च तत्खंडं च उद्वाहे विवाहे कृते सति तत्खंडं तस्य दलस्यापि खंडं अर्धं त्रिमा
सपर्यंतमित्यर्थः तिलैस्तर्पणं पिंडपूतं श्राद्धं नाचरेत् किंतु नाम महालयगयापित्र्यं विना महालयश्राद्धं यदापरपदं॰
गयाप्रसिद्धा पित्र्यं मातापित्रोर्यद्दिनं तत्र तच्छ्राद्धं क्रियते तन्महालयगयापित्र्यं तद्विना उक्तं च उद्वाहव्रतचूडासु वर्षं २०
--- मर्द्धं कांश्च तिलतर्पणं कुर्याच्छ्राद्धं कुर्यादपिंडकं महालये गयाश्राद्धे मातापित्रोः क्षयेहनि कृतोद्वाहेपि कुर्वीत पिंडदानं
यथाविधिरिति सर्वमिति सप्तपदीविधेः पूर्वं प्रथमतः दोषोत्पन्ने सूतकादिके अधिगते ज्ञाने सति वा अथवा वरस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लवत् नोद्वाहौ सहजातयोस्तत्पुत्रे नोद्वाहद्वयं तेनोक्तम् सद्वाहात् स्वगृहदहनं न मंगलविधेर्मूर्ध्नि त्रिषु भवेषु न एवं तावद्वदतेरिति ए
वं उक्तं न तत्र चरणजातो नान्तरः पुत्रवतेः स्त्रियाः गुर्वादीन् हन्ति तथा च गर्गः मूलजो श्वशुरं हन्ति मातृजा च तद्गतौ
ज्येष्ठजा तु पतिं ज्येष्ठं देवरं तद्द्वितीयजेति तथा च पटले मूलांत्यपादजो श्वशुरं हन्ति तथाश्लेषाद्यपादजो द्विपुंसं त्यपादजो ऽ
ष्टौ तथा ज्येष्ठान्त्यपादजाविति अस्यापवादः अभावे श्वशुरे नो दोषः स्यात् अभावे तेषां श्वशुरादीनां अभावे सति श्वशुर मूलादिजो
द्वहने नो दोषः केचिदाचार्याः एवं वदंति न्तः नवम्यमो ज्यर्द्ध मौंजीबंधनानंतरं एनत्फलं न उक्तं च नारदेन मूलव्याल
भवो दोषो विवाहे यउद्वाहतः स मौंजीबंधनादर्द्ध पुंसा नैवेति केचनेति पैत्र्यादेपि मघायाः अर्द्धचरणोपि मूलवत्फल
स्यादिति केचिद्वदंति तथा चोक्तं नारदेन पैत्र्यं रौद्रेंद्रवाकल्या श्वशुरं चेन्नेति केचनेति अथ तत्र यमध्ये किं किं न कर्तव्य
मित्याह नोद्वाहाविति सहजातयोरेकोदरसंभवयोः पुत्रयोः कन्ययोः कन्यापुत्रयोर्वा उद्वाहो विवाहो ऋतुत्रयस्य
ऋतवः न तेषु न कार्या षण्मासाभ्यंतरे न कार्या इत्यर्थः उक्तं च नारदेन विवाहस्त्वेकजन्यानां षण्मासाभ्यंतरे
यदि असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेदिति नोद्वाहाद्व्रतमिति उद्वाहात् ऋतुत्रयव्रतमौंजी न कार्याः तथोक्तं
नारदेन पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये न तयोर्व्रतं सद्वाहान्मंगलेवान्यमंगलमिति नो शुभसहद्वाहात् स्वगृहदहनमिति
शुभद्वाहात् सुहृद्विवाहात् ऋतुत्रयस्वगृहदहनं कन्याविवाहः नो कार्यः तथा च कात्यायनः पुत्रोद्वाहात्परं पुत्रीविवाहो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ नऋतुत्रयइति नमंगलविधेर्मुंडनमिति मंगलविधेर्विवाहात् अनन्तरं चौलव्रतं चानकार्यं अत्र कात्यायनः मंगलेतु
३२ त्रयादर्वाक्स्वरजान्न तु मुंडनमिति त्रिशुभ्येवेति पश्चऋतुत्रित्रिशुभीनकार्या त्रयाणां शुभानां समाहारस्त्रिशुभी मंगल
त्रयमितियावत् नकुर्यान्मंगलत्रयमितिकात्यायनवचनात्" नोज्येष्ठाल्लघुकालहृदनप्तातेपारस्करोनव्रतंचौलंमुंड
नमेवमौंज्युभयतःकार्याविवाहाज्जगोभेदेहृस्यच संकटेवितनयात्पूर्वादितंमंगलंवेदा ४ होतारिमेदिनांतरित.
केनयानरोनापिवा" नोज्येष्ठाल्लघ्वीति ज्येष्ठान्मंगलाद्विवादेरुत्तरं लघुमंगलंनोकार्यं यद्यद्वाहिःशालाया
मकंतत्रज्येष्ठमंगलं अन्यल्लघुमंगलंतन्नकार्यमित्यर्थः कस्मादृतेकालहृदनकृतेकालेनरुद्धंगर्भाधानपुंसवना
दितस्मादृतेतेनविनेत्यर्थः तथाचकात्यायनः मातृयज्ञक्रियापूर्वंज्येष्ठंकृत्वात्वमंगलं ऋतुत्रयेपुनर्यावंनकु
र्यील्लघुमंगलं लघुवागुरुवाकार्यंविनानैयामिकंत्रयत् इतिपारस्करश्चेति पारस्करः कात्यायनोस्मृतिः इतिज
गोरत्नीतिकं व्रतंमुंडनंतत् चौलमेवमुंडनं मौंजीविवाहादुभयतःकार्येति तथाचतद्वाक्यं मुंडनंचौलमित्युक्तं
व्रतोद्वाहोत्वमंगलंचौलमुंडनमेवोक्तंवर्जयेद्वत्सरात्पूर्वं मौंजीचोभयतःकार्यायतोमौंजीनमुंडनमिति अथसंक
टेप्रहृतिमाह भेदेहृस्येति संकटेदेशकालभयादौ अग्रहृस्यसंवत्सरस्यचभेदेपूर्वादितंमंगलंवितन्वयात् वि
स्तारयेत्कुर्यादित्यर्थः तथाचोक्तंसंहितासारावल्यां फाल्गुनेचैत्रमासेवाकृत्वोद्वाहोपनायने भेदेहृस्यचकु ३२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वीतनऋतुत्रयलंघनमितिअथवेदाहांतविते चतुर्दिनांतरितेकालेमंगलंवितनुयात् तथाचस्मृतिसारावल्यां तु
त्रीयरिणयाद्र्ध्वं यावद्दिनचतुष्टयं सुत्रंतरसंकुर्वीत नोद्वाहमिति स्मृत्यर्थ इति अथवादिनांतरितेके एकदिनां त
रितकेकालेमंगलंकुर्वीत तथाचोक्तं एकोदरप्रसूतानामेकस्मिन्वासरेनरः विवाहं नैव कुर्वीत मंडनोपरमंडन
मिति अथवाएकाहेनापितयोर्नगोपर्वतेष्वंतरितेदेशेमंगलंवितनुयात् ज्योतिर्विवरणे एकोदरयोर्वरयो
रेकदिनोद्वाहतोभवेन्नृपः नयांतरएकदिनेकेप्याहुः संकटेचशुभमिति प्राड्डुः परोपि नद्यंतरेपिशुभं दहेषु
फलरोथेप्यथवाएकाहेपिजनानां यांतरेमंडपांतरे मंगलंवितनुयात् मंडयोस्त्रीजनताश्रयरत्यमरः उक्तंच
ज्योतिर्विवरणे नप्रतिषिद्धंलग्नंसशुभंसंकटेमहति एकोदरसंभवयोरेकाहेभिन्नमंडपेकार्यमिति अथैषांव
मा गा ५ त्यंगणनिर्णयमाह इहेदमिति इहास्मिन्विवाहादिविषयेइदंभेदेहस्मृत्यासुतंबुधैः नारतम्यायोज्यं संकटान्व
त्रपयोज्यमित्यर्थः अथयमलयोर्विशेषमाह नोयमलयोरिति यमयोर्यमलयोः इदंनोनिषिद्धं अनयोर्य
मलयोर्मंगलंएकत्र एकवत्सरेएकमंडपेकार्यमितिमनयोजगुः उक्तंच एकस्मिन्वत्सरेचैकवासरेमंडपे
तथा कर्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोरिति अथप्रत्युद्वाह निषेधमाह नैकस्मैउद्दिहितद्वयंसहजयो
नैकोद्भवेकंन्यकेदद्यादुद्वहनंमिथोनतनुयात्कुर्यादसंपद्यतः नेकस्मैइति एकस्मैवरायदुहितद्वयंएकोद्भवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ कन्यकाद्वयं न दद्यात् सहजयोः एकोदरसंभवयोर्भ्रात्रोः एकोद्भवे कन्यके न दद्यात् तथा च मिथः परस्परं उद्वह-
३२ नं न तत्तनयात् अत्रापि संकटे प्रहर्तिमाह कुर्यादिति नैकस्मैरत्नाद्युक्तं अकृतेव संप्रसंयति अन्यवधूवरालाभे
33 सति कुर्यादित्यादि अथ प्रतिकूलनिर्णयमाह नोद्वाहं सति निश्चये पि जगदुः पित्रोः सपित्रोः स्त्रियः सृतो
भ्रातृ— न्नदिन स्वसृ(?) सङ्क्रान्तौ पितृव्यस्य च अन्येषां बान्धवजानां ये पि पितृमातृस्त्रीसुतानां तत्ये ह्यार्थार्थी द
त्वा न रविदधते हेरंवपूर्णात्या मङ्क्षु चित्" नोद्वाहमिति निश्चये पि सति बुधाः उद्वाहं न जगदुः कस्यां सत्यां पित्रोर
सङ्क्रान्तौ सत्यां माता च पिता च पितरौ तयोः अस्तंगतानां उत्क्रान्तिः उत्क्रमणं तस्यां सत्यामित्यर्थः क
थंभूतयोः सपित्रोः पितरौ च पितरौ च पितरः मातुः पितरौ पितुः पितरौ वित्यर्थः तैः सह वर्तमानौ सपितरौ त
योः सपित्रोः पुनः कस्यां सत्यां स्त्रियः असङ्क्रान्तौ सत्यां द्वितीयविवाहादौ रेतेयं एवं सतोः पुत्रस्य भ्रातृस-
जस्य अन्वदिन स्वसृपरिणीतस्य भगिन्याः पितृव्यस्य पितृभ्रातुः असङ्क्रान्तौ सत्यां रणतं उक्तं भवति पित्रादी-
नां सङ्क्रान्तौ मध्ये अन्यतमे मृते सति विवाहं न कुर्यादित्यर्थः तथा च वृद्धशौनकः वरवध्वोः पिता माता पितृव्य
श्च सहोदरः एतेषां प्रतिकूलं चेन्महाविघ्नप्रदं भवेत् अन्यच्च पितामाता महश्चैव माता चैव पितामही पितृ
व्यस्त्रीसुतो भ्रातुः भगिनी चाविवाहिता एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतं अन्यैरपि विपन्नैस्तु केचि ३२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रचुर्नेतद्भवेत्तइति अथान्येषांमतमाह अन्येइति अन्येतुधाः स्वान्वयजातयेपिस्वकुलज्ञानमर्त्यनाशेपितद्वाहं तत्
द्धुः तथाचस्मृतिः वाग्दानानंतरंयत्रकुलयोः कस्यचिन्मृतिः तदोद्वाहोनैवकार्यः स्यपलदयदोयतइति अथ
संकटेप्रवृत्तिमाह पितृमातृस्त्रीति पिताचमाताचस्त्रीचसुतश्च अन्यश्च अन्यत्कुलजश्चप्रतिकुलाधिकारी
एषामत्ययोनाशः मरणमितियावत् कस्मिन्नति अश्वार्द्धार्धादलांतरेहेरंवशांत्यागणेशपूजांत्वाकृवित् सं
कटेविदधतेबुधाइत्यध्याहारः एतदुक्तंभवति वरस्यवध्वावापितृनाशेअब्दांतेवर्षांतेमातृनाशे अर्धांतरेष
एमासांतरेस्त्रीनाशेअर्धांतरेत्रिमासांतरेएतत्द्वितीयादिविवाहादौज्ञेयं तथाचसुतनाशेअर्द्धांतरेसार्द्धमा
सांतरेअन्यनाशेपितृमातृस्त्रीसुतादिभ्योन्यवाकुलजनाशेदलांतरेसार्द्धमासस्यार्द्धेत्रयोविंशतिदिनांतरेवि
दधतइत्यर्थः अन्यमध्येभ्रातृविशेषमाह भ्रातृभ्रात्मभयेति भ्रातृनाशेपुत्रवत् पुत्रनाशेकवत्तेयं सा
र्द्धमासांतरेकर्तव्यमित्यर्थः तथाचस्मृतिरत्नावल्यांपितुरप्यमिहाशौचंतदर्द्धंभ्रातृपुत्रयोः अन्येषांतुसपिं
डानांस्रायतोमासमंमितं तदात्तुशांतिकंकृत्वाततोलग्नंविधीयते स्मृत्यंतरेप्युक्तं संकटेसमनुप्राप्तेयाज्ञ
वल्क्येनयोगिना शांतिहृत्वागणेशस्यकुर्वीतशुभमाचरेदिति अकृत्वाशांतिकंयस्यनिषेधमतिदाहणे
नकरोति। सुभंगावीद्विज्ञस्तस्यपदेपदेइति ज्योतिः प्रकाशे प्रतिकूलेपिकर्तव्योविवाहोमासमंतरे शांतिं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ विधायस्वनागां वाग्दानादि चरेत्सु नरिति एतत्सौढायां कन्यायां पित्रोर्मरणे विज्ञेयं प्रतिकूलेपि प्रतिकूलाभा
२८ वमाह भयइत्यादि भयेदुर्भिक्षराजभये प्रतिसमये प्रतिकालेपित्रोर्मातापित्रोः असोः प्राणसंशये सति अ
35 न्येषां मातापितृभ्यामन्येषां स्वनानां प्रतिकूलं नास्ति तथाचोक्तं ज्योतिःसागरे दुर्भिक्षे राष्ट्रभंगे च पित्रो
र्वा प्राणसंशये प्रौढायामपि कन्यायां नानुकूलं प्रतीक्ष्यते इति विशेषांतरमाह आमयिविरक्ताराद्गतानां
मपि प्रतिकूलं नास्ति आमयी रोगी दीर्घरोगीति यावत् विरक्तो गृहादिषूदासीनः आराद्गतो दूराद्गतः दे
शांतरगत इति यावत् आराद्दूरसमीपयोरित्यमरः एषां स्वनानामपि प्रतिकूलं नास्ति तथाचोक्तं स्मृत्यंत
रे दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च उदासवर्तिनश्चैव प्रतिकूलं न विद्यत इति अथान्यान्यपि प्रशस्ता
र्थान्याह आतुर्यादिति तुर्यश्चतुर्थः सहषः मलसुहृर्षश्च तथेरित्यर्थः तं मर्यादीकृत्य मृतस्य नरस्य क्रि
यायाश्च न भिभवेत्प्र भावे सति किंचित्कारणांतरात्क्रियायामकृतायां नांदीमुखं नाचरेत् एतत्सगोत्रवि
षयं तथाच मेधातिथिः प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां आचतुर्थं ततः पुंसि पंचमे त्वशुभं
भवेत् इति नोकुर्यादिति ज्वरितस्य मंगलं नो कुर्यात् तथाच गार्ग्यः ज्वरस्योत्पादनं यस्य लग्नं तत्तस्य तत्कारयेत्
दोषतिर्यामतास्यात्स्यान्त्वस्याधर्म समाचरेत् इति अतीति अतिव्याधभुजंगे वेकस्यापि तत्कुलेन तस्य पुरीरेअति २८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दारुणज्वरोत्यंतोऽनिश्चयं नो कुर्यात् प्रतिकूलभीत्या रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयमित्यमी वाग्भटे ज्वर
पर्यायनामानि तथा च वर्गः केचित् दुर्गेहस्य स्यकस्यचित् दारुणो ज्वरः तत्तावन्मंगलकार्यं न कार्यमिति निश्चयं
बुधैरिति अथ महत्संकटे सति हृद्ये सूतके कर्माह तामाह चेत्स्यात्सूतकमन्नाक्त सर्वसमये तारब्धकार्ये बुधः
कूष्मांडीसूक्तहोमतो जननिदशाहांतस्थरे त्संकटे सिंहेज्येन शुभं हि तं हरिलवो ईगो तमादाद्दिशोजात् हृदुत्तरतः
कांचिद्दितमजेर्के तो स्वमीत्यादिषु चेत्स्यादिति उक्तसर्वसमये यज्ञोद्वाहनचौलमौंजिकनित्ययात्राके सर्व ३
कालेप्यनारब्धकार्ये सति संकटे च प्राप्ते सति कूष्मांडीसूक्तहोमतः कूष्मांडादिभिर्यद्देवादेवहेळनमित्या
दिति सूक्तमिन्त्रऋग्भिर्घृतहोमः ते नजननिदशाहान्तजननदशाह मध्ये कर्माचरेत् कूष्मांडीसूक्तहोमं प्राक्स्वा
क्रमद्दक्षिणं कृत्वा कर्मकर्तव्यमित्यर्थः तदुक्तं स्मृत्यंतरे संकटे समनुप्राप्ते सूतके समुपागते कूष्मांडी
भिर्घृतं हुत्वा गां च दत्वा पयस्विनीं चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जु
६३ हुयाद्घृतं गां दद्यात्पंचगव्याशी ततः शुध्यति सूतकी अथ सिंहेज्ये सति मंगलनिषेधमाह सिंहेज्ये
ति सिंहे सिंहराशौ ईज्यः सिंहेज्यः तस्मिन्सति शुभं नित्यव्यतिरिक्तं न हि तं स्यात् इदं तु सर्वमेव प्रपंचेन तं
तथा च कालनिर्णये पूर्तिकपौष्टिकं यात्राप्रतिष्ठोद्वाहसर्वकं न कुर्यान्मर्वे मांगल्यं सिंहस्थे च हहस

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ तावित्ति तथाच मांडव्यः दृष्टे रवौ च चौलादिसंस्कारान्वास्तुकर्म च अन्यानि शुभकर्माणि कुर्यात्सिंहगे गु-
३५ रावित्ति अथ संकटे प्रहतिमाह हरिलवोर्ध्वमिति क्वचित्संकटे देशकालभयादौ सिंहेज्येपि हरिलवादूर्ध्वं
35 गोतमस्या दक्षिणतः जाह्नव्या भागीरथ्या उत्तरतः शुभकर्म हितं स्यात् तथाच ज्योतिर्निबंधे सिंहे गुरौ सिंहन-
वांशकोर्ध्वं गोदावरीदक्षिणमूलजातेः उद्वाहकालात्ययदोषभीतेः कार्यो विवाहस्त्व व नो व्रतानीति तथाच
गर्गः भागीरथ्युत्तरे देशे गोदावर्याश्च दक्षिणे व्रतोद्वाहादिकर्माणि सिंहस्थे च न दुष्यतीति अर्थाद्गोदावर्याः
उत्तरे भागीरथ्याः दक्षिणे एवं द्वयोर्गोदावरीजाह्नव्योर्मध्ये संकटेपि शुभं नाचरेत् तथाच वासिष्ठः गोदा
वर्युत्तरे तीरे भागीरथ्याश्च पश्चिमे विवाहादि न कुर्वीत सिंहस्थे च बृहस्पतावित्ति तत्राप्यतिसंकटे प्रहतिमा
ह अजेरित्ति अस्तभीत्यादिश्च रजोभयादिषु सत्स्वंतः गोदावरीजाह्नव्योर्मध्ये हरिलवादूर्ध्वं सिंहे ज्ये सति अ
जे मेषे रने सूर्ये सति शुभमाचरेत् ~~अजे मेषे रने सूर्ये सति शुभमाचरेत्~~ अजेरनेरित्यनेन द्विवाहविषयं अस्तभीत्या
दिष्वित्यनेन पदेन लक्ष्यते तथाच शौनकः मेषस्थे दिवसकरे सिंहस्थे वज्रयाणां मखचिचेचयस्याः परिण
यनमसौ माध्वीमाव संपदो येनेत्ति व्रतबंधस्त्व मीनगे सूर्ये सति चैत्रे कर्तव्य इति शार्ङ्गोवोक्तं अनिमिषरवि
मध्ये कार्यमिति तथाचोक्तं मौंजीपटले जन्मभाद्दुष्टगे सिंहे नीचे वा शत्रुगेहगे गुरौ मौंजीबंधः शुभः प्रोक्तः चै ३५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऽत्रैमीलनगनेरवौऽइति अथवाऽऽतेज्येऽत्येतत्पदं सर्वशुभधारणं तथा च शौनकः सिंहस्थे देवगुरौ मेषस्थे वा यदि भवेत्सहस्रांशुः मं
गलकार्यं कुर्यादिति नारदपराशरौ वदत इति अस्तभीत्यादिष्वित्यत्रादिशब्देन दृष्टपित्तृचरणः गंकार्यो कर्तेतराभावा
यति संकटे त्वेवं अथ नामराशिजन्मराशरूपोऽनिर्णीयमाह देशग्रामगृहज्वरव्यवहृतिद्यूतेषुदानेमनोसेवाकाकिणि
वर्गसंगरपुनर्भूमेलनेनामभंजन्मतः परतो वधूगृहयोर्जन्मभमेकस्य चेज्ज्ञातं शुद्धिमितो विलोकय ततयोर्नामर्क्षयो
र्मेलकः देशेति देशः प्रसिद्धः ग्रामः प्रसिद्धः गृहं प्रसिद्धं ज्वरः प्रसिद्धः इत्यादिषु नामभं नामराशिः प्रधानं स्यात्
एतदुक्तं भवति देशग्रामगृहेषु मेलने प्रवेशार्थं ज्वरे चंद्राद्यवलोकनार्थं व्यवहृतिर्व्यवहारः द्यूतं प्रसिद्धं दा
नेत्रलाभहृषादिषु चंद्रवलाद्यर्थं मनो मंत्रे मेलनार्थं चंद्रवलाद्यर्थं च सेवा राजसेवा तत्र मेलाद्यर्थं काकिणीका
किणीअवलोकनार्थं वर्गो वर्गमध्यार्थं संगरे संग्रामे चंद्रवलाद्यर्थं पुनर्भूमेलके भूमेलनाय नामराशिर्विलोकनीयेत्य
र्थः परतः एभ्योऽन्यत्र विवाहयात्रादौ जन्मतो जन्मराशिप्रधानं स्यात् तथा च ज्योतिर्निबंधे देशग्रामगृहयुद्धसेवा
यां व्यवहारके नामराशेः प्रधानत्वं जन्मराशिं न चिंतयेदिति अन्यच्च काकिण्यां वर्गशुद्धौ च दाने द्यूते ज्वरोदये मंत्रे
पुनर्भूवरणे नामराशेः प्रधानतेति विवाहे सर्वमांगल्ये यात्रादौ ग्रहगोचरे जन्मराशेः प्रधानत्वं नामराशिं न चिं
तयेदिति अथ वधूवरयोर्मध्ये एकं जन्मर्क्षं ज्ञातं एकस्य न ज्ञातं तदा शुद्धिमेलापकादिकं कथमवलोक्यमि

स्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उ॰ त्याह वधूवरयोर्मध्ये चेद्यदि एकस्य जन्मर्क्षं ज्ञातं एकस्य न ज्ञातं तदा इतः ज्ञाताजन्मर्क्षादेकस्य शुद्धिरेवेति दिश
३८ ङ्गि विलोकनयोर्वधूवरयोर्नामर्क्षयोर्मेलकोवर्णवश्यादिकः सर्वोको विलोक्य अर्थाद्द्वयोरप्यज्ञाते नाम
र्क्षादेव सर्वं विलोक्यं तथा च शार्ङ्गधरः विवाहघटनं चैव ग्रहजं ग्रहजं बलं नामभाच्चिंतयेत्सर्वं जन्म न
ज्ञायते यदि अथ मेलनार्थं नाम्नो नक्षत्रज्ञानमाह भं नामादिमवर्णतो वकहडा शुज्यादिवर्णाद्वोत्तल्या
चात्र प्राप्तौ स्वर्गो यदभिधा वह्नास्य नामांतिका भमिति नामादिवर्णो नामाद्यक्षरं तस्मात् अवकहडेत्यस्मात्पदच
क्रं यस्मात्तवक्रान्चुचे चोलापदेषाद्यैरित्यादयः श्लोकनिबद्धाः तस्मात्तच्चक्रं ज्ञेनं नक्षत्रं स्येयन यथा चूडामणीतिना
थ म्नः आद्यक्षरात् चकारात्चुचे चोला अश्विनी नक्षत्रं प्रंसंचरणाइति वन्नज्ञेयमित्यर्थः तथा च दीपिकायां जन्मन
क ज्ञायते येषां तेषां नाम्नो गवेष्यते चक्रे वहडे भांघ्रोतन्नाडीतस्यार्थः यदा नाम्नो नक्षत्रं गवेष्यते तदा अग्नि
भात् कृत्तिकानक्षत्रात् नाडी विलोक्येति केचिदुक्तं केचिदेतन्मतमग्राह्यं तस्मादश्विन्यादित्रिकं व्यस्तमिति त्या
ये न नाड्यवलोकनं वहुसंमतमिति भावः अथ नामादौ योगान्तरे सति किं कर्तव्यमित्यपेक्षायामाह शुज्या
दिवर्णादिति शुजिशुके त्वरे संयुक्तान्तरे प्रशुम्नेत्यादिके नामादौ युक्तान्तरे सति आदिवर्णात् प्रथमवर्णा
त् ज्ञेयं यथा प्रद्युम्नेति नाम्नि प्रथमवर्णः प्रक्षराप्याद्यः पकारः पतस्य भं ज्ञेयं प्रियवचन इत्यादौ पिकार एव ३८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ग्रासः द्रुपदइत्यादौ डकार एव ग्रासः तथा च स्वरशास्त्रे संयोगान्तरजेनात्रित्वेयं तत्रादिमाक्षरं
अथावकहडाचक्रे नामाद्याक्षराभावे शनि किं कर्तव्यमित्याह ववौ तुल्यौ अत्र शसौ खषौ णनौ तुल्यौ
वकारस्थाने वकारः तथा शसौ खषौ तुल्यावेवा अत्रोदाहरणेन दर्शयति शिव इति नाम्नि सति
अवकहडचक्रे शकारस्याभावात् षिकारस्थाने सिकारांगीकारान्निद्रेयं तथा एवं खषौ नथापरस्य
रसवर्णो ह्यत्वाभं ज्ञेयमित्यर्थः तथा च स्वरशास्त्रे खषौ शसौ ववौ चैव ते यावित्तियदुस्परं अन्यच्च
तथोक्ता उत्रणावर्णा नामादौ संति तेन हि चेद्भवंति तदा तेयाराजजाताते यथाक्रमं चक्रेशतपदं वद्येक्र-
लांशान्तरसंभवमित्यादि स्वरशास्त्रोक्तमवकहडचक्रं प्रसिद्धं अथ यस्य बहूनि नामानि तस्य कस्मान्नामा
तो भं ज्ञेयमित्याशंकाह यद्यभिधाः बहो यस्य नामानि समतियस्य अभिधानामानि बहूनि भवति अस्यातिम-
पश्चान्नामग्राह्यं तथा च स्वरशास्त्रे बहूनि यस्य नामानि तरस्य स्युः कथं च ना तस्य पश्चाद्भवं नाम रता ह्र
स्वरविशारदैः अथ जन्मनक्षत्रं ये येषु प्रशस्तं तानि वदति आचार्य इति उद्वाहेषु हषविवाहे नक्षत्रं भं ज-
न्म नक्षत्रं अमलं नितिर्हि षणां जगः तथा यदस्य वंधे यदवंधने गेहं गृहकरणप्रवेशने तथा ग्रामे ग्रामस्र
चत्प्रवेशने नृपाभिषेको राजाभिषेकः कृषिः प्रसिद्धा मौंजी प्रसिद्धा अन्नप्राशनं नवान्नप्राशनं भूषणाम्बे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ षणाधारणं षण्णां समाहारस्तस्मिन् तज्जन्मभं शुभदं जगुः तथा चोक्तं ज्योतिःप्रकाशे जन्मभं तु षिवन्दया-
३० भिषेचने स्वर्षणे नगरगेहकर्मणि आधिपत्यभजि मौंजिबंधने शुभं विवाहउदितं स्मृभं तु धैरिति राजमा-
37 र्तंडे वसंतसमये दयाद्दृष्टेग्नौ भीष्टमेष्टमे मेखलाजन्मभामेपि जन्मभे चाति यावपि नारदः षट्वधन
चौलान्नप्राशने चोपनायने शुभदं जन्मनक्षत्रमशुभं त्वेककर्मणीति श्रुतिस्वकृतमहूर्तमार्तंडटीकायां मा-
र्तंडवल्लभायां विवाहप्रकरणसमाप्तिमगमत् अथाग्न्याधानं एतेनैकेनाहुरग्न्याधानमवादिदार
समये दायांद्यकाले लग्नकेंद्रीष्वानि बुधशुक्रयोस्सम्मगश्चेर्लग्नताप्रयोः जीवेंद्वर्कभूजैः सत्तद्धिनव
केंद्रस्थैरनस्तंगतैः स्वोच्चस्थर्धर्तंगतैः परैरुपचयस्थैः स्वायसुहोवुधैः अग्न्याधानमिति अग्रेतराधानं व
हुभिर्बुधैः दारकाले अवादि कथितं चतुर्थीकर्मान्तं तरं दारकालः अलग्नकैः अलग्नैर्वा लग्नकैः दायाद्यका-
ले धनविभागकाले अवादि तथा च वृत्तश्लोके अग्न्याधानं दारकाले विधेयं केश्चिन्त्प्रोक्तं तच्च दायाद्य-
काले तथा च कात्यायनस्मृतौ आवसथ्याधानं दारकाले दायाद्यकाले एकेषामिति एतत्भाष्यकारैरेवं व्या-
वक्ष्यापितं अभ्रातृमतो दारकाले भ्रातृमतो दायाद्यकाले प्रोक्तमिति निमृतिशुकृतदारस्याग्निनाविनाव
हदोषोह श्रूयते तथा हि कृतदारो नैव तिष्ठेत् क्षणमप्यग्निना विना तिष्ठेन्न सचेत् द्विजो व्रात्यत्वमाचप ३८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नितो भवेत् पितृपाको यज्जीवी स्यात् भ्रातृपाको यज्जीवकः दानाध्ययननिष्ठो वा नष्टच्छेत्ताजिनाविनायोनाग्नि
मुपसेवेत दारात्कामाद्रत्नावपिपरदाराश्च विज्ञेयः स्वस्त्री स्वीकरणादपि ब्राह्मणस्य यथा संध्यावेदस्याध्ययनं
तथा तथैवोपासनं हृष्टं न स्थितिस्तव योगात त्रुत्पादितस्मात्स्त्रुवकारैः कात्यायनादिभिर्दारकाल एव वाहुल्येनो
क्तं अथ यागत्याधानं न दत्त्वाग्राएपाह द्वीशाग्निध्रुवपूर्णाक्र यो शमृगाश्लेषैः द्वीशां विशाखा अग्निः कृत्तिकाध्रुवा त्री
ण्युत्तरा रोहिणी पूर्णाकं ज्येष्ठा पौष्णं रेवती मृगाश्लेषा प्रसिद्धौ तैर्कयोः व्यज्जलगतां पूर्णयोः विगतां अज्ञायाम्भ्यां
नौ व्यज्ञौ चलगतां पूर्णो चततया तयोः अज्ञाः जलचरा पूर्णयः मकरस्य पश्चिमार्द्धं कुंभो मीनो जलचरा ह्री
यो याककर्कटश्च जलचरः चंद्रोपि जलजः पनैः रहितैर्लग्नांशयोर्लग्नतन वांशयोरित्यर्थः तथा चरूतशते
कर्कनक्रघटमीनविलग्ने चांशके तनुगते घतदीये लग्नगे कुशदिनीदपि ते वा नाशमेति जनितो यि कृता
शुः कैः जीवेंद्वर्कशुक्रैः जीवो गुरुः इंदुश्चंद्रः अर्कः सूर्यः कुजो भौमः तैः स्वनद्वीनवकेंद्रस्थैः स्तनपंचमद्भुदयः उ
पचयभवनानि त्रिषडेकादशमास्तुपचयभवनानि एतत्स्यान गैः कथंभूतैः अनस्तगतैः सूर्यकिरणै
रलुप्तैः पुनः कथंभूतैः स्वोच्चष्ट्वर्गगतैः स्वक्षउच्चानि चरष्ठाश्च एषां क्रमत्वाणि राशयः नजन्नैः स्वराशिमि
त्रराशिउच्चराशिगतैरित्यर्थः परे हते भ्रोन्यग्रहे हृपचयस्थैः त्रिषडेकादशभस्थैः कस्यांसत्यां स्वायपुरुद्वौ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उं सत्यांस्वंद्वितीयंस्याद्यंलग्नंतयोः शुद्धिः क्रूरग्रहितंतस्यांसत्यांशेषंपूर्ववत् प्रायश्चित्तंत्यजेत्पत्नोकम
३८ वलोकं तथाचवृहत्पराशरे केंद्रेत्रयचयत्रिकोणभगात् सूर्यारजीवैदकः शेषाश्चायचयस्थितायदितः ३८
38 दाग्न्याधानमुक्तंशुभंचेद्वैतेधनगोमियेतशुक्रनीभोमेशमानष्टमेशेषेस्वेत्सुगतेहनाचमहितोग्न्याधान
कर्ताभवेत् नोकुर्याद्गुरुतस्कुयरिरहमिद्दमास्यत्रजीवेडमिः नीचस्थैर्विजितैर्दिपोर्भवनगैरस्तंगतैर्वाद्वि
जश्नि तथाचसंहितांतरे अग्न्याधानंनकुर्वीतकर्किनक्रत्रयेविधौलग्नेगेचटगेयापेतयारंब्रग्रहान्वि
तेति इत्यग्न्याधानप्रकरणं अथगृहप्रकरणं विवक्षुस्तावद्ग्रामनियममाह नामर्क्षादिति नामर्क्षा
न्नामराशेः सकाशात् द्वि एवंभवेदिति एवंग्रामशुभममभिधायेदानींग्रामदिङ्नियमानाह तत्कोणइति
तत्कोणेतस्यग्रामस्यकोणेत्यस्यवानंत्यजकर्मकादीनांनिवसतांवसतिकुर्वतांशुभंस्यात् यतकश्चर्म
कश्चैवनटोवरुडएवचकैवर्तमेदभिल्लाश्चसप्तैतेचांत्यजाः स्मृताः इत्यादीनांग्रामकोणेशुभंस्यादित्य
र्थः तत्कोणेनिवसतांवसतिपरेषांवर्णानांमलंमत्यर्थदोषाः स्युः अशुभानिस्युरित्यर्थः तथाचज्यो
तिर्निबंधेभवनपुरग्रामाणांयेकोणास्तेषुनिवसतांदोषाश्चपंचादयोंत्यजर्यास्तिष्टेद्धिवृद्धिमायांति ए ३८
वंजातीनांशुभाशुभदिग्विभागमुक्त्वाशुश्रीपरत्वेनदिक्तवसतिमाह कंन्येति यमाशृणादिति दक्षिण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शानसकाशात्तत्कुंभेशात्ष्टस्मुदितकंन्याककिंधन्वराशयोराश्योर्नवसंतिअन्येत्वर्वैरितामध्येनवसंति एतदुक्तंभव
ति अभीष्टगतामं नवमभागायपरिकल्प्यमध्यमभागाद्दक्षिणभागेकन्यानवसंतिकन्याराशिनाददक्षिणभागेनरारहं
कार्यमित्यर्थः तथैवनैर्ऋत्येकर्कः पश्चिमेधनुः वायव्येतुलाउत्तरेअजोमेषः ईशान्यांचद्वौकुंभः पूर्वेकोपीवृश्चि
कः आग्नेयेग्नंत्यौमीनौनवसंतिअन्येवृषमिथुनसिंहमकराःमध्येमध्यभागेनवसंति एवंराशियरत्वेनदिक्श्रि
यमनुक्तारइदानींवर्गायरत्वेनदिक्श्रियमानाह अथेति इंद्रककुभःसकाशात् अष्टसुदिक्षुप्रसव्यात्वा अ
ष्टौवर्गाः अकचटतपयशावर्गाइत्येतेप्रसिद्धाः ओजस्विनोबलवंतः स्युरित्युत्तरस्लोकेनान्वयः एतदुक्तं
भवति अआइईउऊइत्यादिषोडशात्तरोवर्गः आदिकः पूर्वस्यांवल्लांकादिकः पंचाक्षरः आग्नेय्यांचादिकोः
दक्षिणस्यां टादिकोनैर्ऋत्यां तादिकः पश्चिमायां पादिकोवायव्यां यादिकउत्तरस्यां शादिकः ईशान्यांवली
अयमर्थः स्वनामाद्यक्षरात्तवर्गाज्ज्ञातव्यास्वस्वस्थानेरहंकार्यइतिभावः यतः स्वस्वस्थानेप्राणिनोबलवंतः इ
तिलोकेप्रसिद्धः किंलक्षणाःवर्गाः स्वस्वपंचमपरस्वेभ्यः पंचमाः परावैरिणोयेषांतेयथा यथाऽवर्गस्यपंच
मस्तवर्गः सोस्यवैरीकवर्गस्यपंचमःपवर्गःसोस्यवैरीएवंसर्वेषांवर्गाणांवैरिणोज्ञातव्याः वैरित्वंहिस्वामिवशे
न तदुक्तंभूपालवल्लभे वर्गेशाःस्युर्दमार्जारसिंहाश्वासर्पमूषकाः इभेणौ पूर्वंतत्तेषांस्ववर्गात्पंचमो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न२ ६२

ओं रिपुः तस्मात्स्ववैरिवर्गस्यादिशि गृहं कार्यमिति भावः अर्थादन्यत्र मध्यमं तत्रापि स्वदिगासन्नं शुभमिति
३९ बुध्वा ज्ञेयं एवं स्ववर्गग्रामवर्गयोर्मित्रारित्वमवलोक्य वासः कर्तव्य इति सिद्धं तत्र राशिघटितवर्गघटित
३९ योः राशिघटितं बलवत् यतउक्तं ज्योतिःसागरे केप्याहुः स्ववर्गाणां स्वस्थाने शुभदं गृहमिति अथ वर्ग
घटितं काकिणीं काम्याह द्विघ्न इति स्ववर्गं ग्रामवर्गं वसति कर्तुर्वर्गश्च द्विघ्नाः द्विगुणिताः यस्याधि
कः सोर्थदो धनदाता स्यात् एवं ग्रामदिङ्नियममुक्त्वेदानीं निर्माणयत्न नगरनाम देवादीनां समासतः देव-
मादौ परीक्षेत गंधवर्णरसस्वैरिति उक्तत्वात्तावत् वर्णपरत्वेन सम्मेवर्णरसगंधान्दृष्टान्तैर्नाह सितार अ
क्तकमिति सितारक्तकपीतकृष्णवसुधा विप्रतः ब्राह्मणानां क्रमात् वर्णानां शुभाः शोभनाः सुः श्वेत आरभ्य
वसुधा एष्वी ब्राह्मणस्य आरक्तवसुधा क्षत्रियस्य पीतवसुधा वैश्यस्य कृष्णवसुधा शूद्रस्य शोभनेति अ-
र्थान्मिश्रजातीनां मिश्राः शोभनाः तथा च वसिष्ठः श्वेता भूमिर्द्विजेन्द्राणां रक्ताभूमिर्महीभुजां विशां
पीता च शूद्राणां कृष्णा त्वेषां च मिश्रितेति एवं वर्णमुक्त्वेदानीं रसमाह स्वादुरिति स्वादुर्मधुरा वसुधा ब्रा
ह्मणानां शोभना कटुर्मरीचरसा क्षत्रियस्य तिक्तनिंबरसा वैश्यस्य कषाया हरीतकीरसा शूद्रस्य शोभ
नेति अर्थान्मिश्राणां मिश्ररसा तथा च नारदः मधुरं कटुकं तिक्तं कषायाश्च रसाः क्रमात् एवं रसान्- ३९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तः

केदानीं गंधानाह स्वतगंधा ब्राह्मणस्य शोणितगंधा क्षत्रियस्य अन्नगंधा वैश्यस्य मदिरागंधा मद्य
गंधा शूद्रस्य मिश्राणां मिश्रगंधा इत्यर्थः सिद्धं तथा चोक्तं कारिकायां घृतासृगन्नमद्यानां गंधाः स्युः क्रमशः
शुभा भवेदिति नानागंधे पुरमगंधानानात्वं तद्विकल्पतो ग्राह्यं तथा च नारदः मध्वे पुष्पलपिशितगं
ध वर्णान् पूर्ववं कमधुरं कटुकं तिक्तकषायम्ररसाः क्रमात् तथा च कारिकायां घृतासृगन्नमद्यानां गं
धाः स्युः क्रमशः शुभा भवेत् मधुरा स्यात् कषायाम्लाकटुकाचात्र सर्वेषु रसा इति एवं पृथ्वीवर्णादीन् अभिधायेदानीं च
वर्णापरत्वेन भूप्लवत्वमाह सौम्यादिष्वत्रप्राग्दिशु दिक्षु प्लवा वा विप्लवत्वं यस्य तत्त्वं तत्र भूतले सत्यस्मि
न् विप्रादिको ब्राह्मणादिकः गृहं विरचयेत् कुर्यात् एतदुक्तं भवति ब्राह्मणः उत्तरप्लवभूतले क्षत्रियः
प्राक्प्लवभूतले वैश्यः पूर्वदक्षिणाप्लवभूतले शूद्रः पश्चिमप्लवभूतले गृहं विरचयेत् एवं वर्णापरत्वेन भूप्ल
वत्वमुक्त्वा ब्राह्मणस्य विशेषमाह अन्यो वाखिलेति अन्यो ब्राह्मणः अखिलसर्वप्लवे गृहं विरचयेत् त
था च स्मृतिः उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणा सर्वत्र च वसेद्धत्र वर्णानुपृष्टमग्रन्थाणामिति अथ
पदान्तरत्वमाह यत्रेति निखिलाः सर्ववर्णाः तत्र गृहं कुर्युः तत्र कुत्र यत्र भूवि अन्तःकरणस्य भ्रमः स्थिरं
स्यात् अयमर्थः यस्यां भूमौ अन्तःकरणप्रसन्नं स्यात्तत्रैव गृहं कर्तव्यमित्यर्थः तथा च वास्तुपुराणे म

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६० ॐ ५

श	अ	क
य	●	च
प	त	ट
वा	प	

नमस्यन्दत्तशोयत्रसंततोषं जायते भवितत्संख्याकार्यं गृहं सर्वैरिति गर्गादिकं मतमिति अथ शल्यं ज्ञानं तदाहैं-
नामं हूतादि सप्तप्रश्नेति सप्तप्रश्नं कृतः अत्र गृहं कर्तव्यमित्यादि गृहप्रश्नकर्तृमुखाच्च यदि प्रथमतः
वर्गादिवर्णो क्रमः स्यात् वर्गानां प्रथमाद्यो दयः स्यात् अकचटतपयशानामन्यतमाद्यो क्रमः स्यात् त
त्र शल्यं तद्दिग्गतं तत्स्ववर्गस्य दिग्गतं बुधः आदिशेत् शल्यमत्रास्तीति कथयेदित्यर्थः एतदुक्तं भवति
गृहसंमितायां भूमिं दक्षिणोत्तरैरेखाभिः संगतयानवधा कृत्वा वर्गाश्च तदेरे अकचटतपयशैः एभिः क्रमे-
णौ सम्पूर्वास्य दिक्षु शल्यमादिशेत् अकारे प्रश्नाद्यं तत्पतिशर्वे स्यां शल्यमादिशेत् ककारे आग्नेयां च
कारे दक्षिणस्यां इत्याद्यष्टसु दिक्षु अष्टभिरक्षरैरादिशेदित्यर्थः तच्चान्ते पर्यायैस्त्रिभिरक्षरैर्मध्यतो-
मध्यकोष्ठमादिशेत् हयर्णानां त्रयाणां अक्षराणामन्यतमे प्रश्नाद्यक्षरे सति मध्ये शल्यमादिशेत् त
१ दुर्वेदनस्थापन थाचोक्तं ज्योतिर्निबंधे स्वतेषु देवतां प्रवेशं यन्नस्थायत्तं गृहीत्वान्ततः शल्याशल्यं सम्यग्विचार्यते-
अकचटतपयशाहपर्यवर्णाः पूर्वादिमध्यान्ताः शल्यकराद्ग्रहतान्येशल्यगृहेनिवसतां नाशः इति एतदे
व स्पष्टं तत्रैवोक्तं स्वेच्छायां यदि प्रश्नाद्यं नरः शल्यं तदा भवेत् सार्द्धहस्तप्रमाणेन तत्र मानुषमस्थिकं त्रै
आग्नेयादिककप्रश्ने शुद्धशल्यं करद्वये राजदंडे भवेत्तत्र प्रवर्तते यामायां दिशि च प्रश्ने कुर्यादाकटिसं- ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्थितं नरपशल्यं गृहे यस्य मरणं चिररोगतः नैरृत्यां यदि दैः प्रदेशे सार्द्धहस्तादधस्तले श्वानास्थि जायते तत्र बालानां
जनयेत् मृतिं ततः प्रश्ने पश्चिमस्यां तु शिशोः शल्यं प्रजायते सार्द्धहस्ते गृहस्वामी न तिष्ठति सदा गृहे वायव्यां
दिशि यः प्रश्ने तुषांगाराश्च तत्र षट्करे कुर्वीत निमित्रानाशं चतुः स्वप्नदर्शनं सदा उदीच्यां दिशि यः प्रश्ने विप्रशल्यं कटे
रथः तत्क्षीणं निर्द्धनत्वाय कुवेरसदृशस्य हि ईशान्यां यदि पुः प्रश्ने गोशल्यं सार्द्धहस्ततः तद्गोधनस्य नाशाय जा
यते गृहमेधिनः हयाषमध्यमकोष्टे वक्षोमात्रे भवेद्यथः त्वकपालमयो भस्म लोलं तत्कुलनाशकृत् एवं श
ल्यमभिधायेदानीं स्थलस्य शुभाशुभज्ञानस्योपायमाह स्वभ्रमिति स्वभ्रं गर्तं हस्तमितं खनेत् गृहास्थि
तस्वभ्रे निशास्ये एवं सखेश्वर्द्धं स्थयी सतजलपूर्णं त्यसेत् तच्चेद्यदि प्रातः सजलं स्यात् तदा तत्स्थलं सत्
शुभं वृद्धिकरं स्यात् यदि अजलं स्यात् तदा मध्यमं यदा स्फाटितं स्यात् तदा असत् नानाविधहानिकरं स्या
दित्यर्थः तथा निशादौ तत्कृत्वा पानीयेन प्रपूरयेत् प्रातर्दृष्टजले वृद्धिः समं पंके व्रणोदरयश्नि एवं स्तभा
ग्रस्थलमभिधायेदानीं भूमिशोधनमाह खात्वेति एवं स्तकप्रकारैः स्थानं खात्वा गृहाधिकारसां तं
जलान्तं यथा भवति तथा खनेत् गृहात् अधिकारगृहाधिकाचासौरसाचगृहाधिकरसातां गृहाधि
करसां रसाः पृथ्वीकल्पितगृहात् किंचिदधिकां भूमिं जलपर्यन्तं खनेदित्यर्थः अधिकं खननं शुद्धस्मभा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ गेभित्तिरचनार्थं वा रत्नयवास्तरणं यावत्तावत्खनेत् पृथ्वीगर्भे मृद्भेदानां स्तराः संति तत्रान्त्यस्तरपर्यंतं ख
४२ नेदित्यर्थः अथवा गुंप्रमितं पुरुषमात्रं खनेत् इदं शुभायेदं ज्ञानवं पुरुषप्रमाणं पंचारत्नयः तथा
च पुरुषलक्षणं पंचारत्निर्दशवितस्तिः विंशतिशतांगुलः पुरुष इति किं कृत्वा नानमस्कृत्य ततस्तदनंत
काकाटी: रं खातं कपिशिरस्तुल्याश्मभिः वानरशिरप्रमाणैः पूरयेत् पूर्णं कुर्यात् तथा च मांडव्यः खनितं प्रस्तार
णं वा पुरुषं तमथापि वा क्षेत्रं संशोध्य वो धृत्वा शल्यं सदनमारभेदिति तथा च मत्स्यपुराणे कपिशी-
र्षप्रमाणैरश्मनावाणैः पूरयेद्दृढां खातां च तत्समं कृत्वा ततः प्राचीं प्रसाधयेदिति खन्यमाने क्षेत्रे यदा
प्यते तस्य फलं कारिकायामुक्तं खन्यमाने यदा क्षेत्रे पाषाणः प्राप्यते यदा धनायुश्चिरतास्य स्यादि-
ष्टकास्तु धनागमः कपालांगारकेशाद्यैर्व्याधिना पीडितो भवेदिति एवं स्थलशुद्धिमभिधायाधुना दिक्सा
धनमाह प्राक्साध्योज्जयनीति उज्जयनीस्थलात् यमदिशि दक्षिणस्यां दिशि त्वाष्ट्रानिल्याभ्यंतरात् प्रा
क्साध्या नवैरित्यध्याहारः त्वाष्ट्रं चित्रा अनिलं स्वाती अनयोरंतरं मध्यं तस्मात्प्राची साध्येत्यर्थः एतदुक्तं भ-
३ वति सम भवे सति रात्रौ प्रत्यङ्मुखोपविश्य पुरुषमात्रोदितां चित्रां नलिकायामवलोकयन् नलिकाग्रनालं वं-
शभूमिपर्यंतमुत्कास्भो चिह्नं कृत्वा तथैवाचलस्तेनैव नेत्रेण स्वातीमवलोकयन् तथैव नलिकाग्रान्तका ४२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शालंबं स्पर्यंतं सूत्रं कृत्वा लंबयाते चिह्नं कृत्वा नेत्रालंबं सूत्रं कृत्वा तथैव चिह्नं कुर्यात् एवं चिह्नद्वयं कृत्वा चित्रास्वा
तीचिह्नयो रज्जुं तन्मितां धृत्वा रज्जुप्रांतौ एकीकृत्य मध्ये चिह्नं कुर्यात् पुनस्तत्र तथैव प्रसार्य मध्ये चिह्ने शंकुं नि
खाय तस्मात्पश्चिमचिह्नशंकुपर्यंतं रज्जुं प्रसारयेत् तत्प्राचीसूत्रं एवमुज्जयिन्या दक्षिणतः प्राचीसाधन
सूत्रं कार्यानंतरं उत्तरतः प्राचीसाधनमाह सौम्यइति अतः उज्जयिन्याः सौम्ये उत्तरे भागे अग्रमुदयात्
कृत्तिकोदयात्प्राचीसाध्या पूर्वं नलिकया युगमात्रोदितां कृत्तिकामालोक्य नलिकामूलाभ्यां लंबौ सूत्रं का
र्यमौ चिह्नद्वयं कृत्वा तयोः परि प्राचीसूत्रं अथोत्तरसाधनमाह उदगिति ध्रुवमुखाद्दृकूत्तरदि
क्साध्या इदं सर्वेषां साधारणं अथ दिङ्मूढत्वे दोषमाह दिङ्मूढके स्यात्तिरिति स्पष्टं तथा चोक्तं देवयजन
दीपिकायां विश्लेषणात् उज्जयिन्याः श्लेषणात् दक्षिणपश्चिमवासिनां प्राचीत्वं कृत्तिकाज्ञेया उत्तरपश्चिमवासिना
मिति तथा च शुल्बसूत्रं कृत्तिकाः श्रवणं पुष्यं चित्रास्वात्योर्यदंतरं एतत्प्राच्यादिशो रूपं युगमात्रोदिते युर
इति युगप्रमाणं षडंगुलीत्यंगुलानि तथा च शुल्बसूत्रे अंगुलेरथसम्मितायाः प्रमाणं तत्राष्टांगुलीति प्रमात
मीषां चतुः प्रमतः षडंगुलीति सर्वां च तस्मान्नो प्राप्यतेति तथा स्फुटकरणे ध्रुवलंबरेखायां रेखा नः सौम्य
यामहरितोस्तः तस्मात् स्पष्टमुच्छ्रयन्तः पश्चिमपूर्वाभिधे विंयादिति वृद्धनारदः प्रासादे सदने लिंगे द्वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ५२ रेवत्यं ते विशेषतः दिक्शूले कुलनाशः स्यात्तस्मात्तं साधयेद्दिशमिति अथ केषु मासेषु गृहं कर्तव्यमित्याह
माघवादिषु मासेषु मृद्वादिभिर्नक्षत्रैर्गृहेरगृहं कुर्यात् माधवो वैशाखः पौषफाल्गुनौ प्रसिद्धौ नभस्या
ख्याः मार्गोमार्गशीर्षः तेष्वित्यर्थः मृदूनि चित्रानुराधारेवतीमृगाः अनिलं स्वाती अर्को हस्तः ईज्यपु
ष्यः अंभपः पूर्वान्तारकाः वसुर्धनिष्ठा ध्रुवाणि रोहिण्युत्तराः तैः अचरभे अचरलग्ने किलक्षणे
शुकेन्द्राष्टमे शोभनानि पापग्रहरहितानि केन्द्राष्टमानि यस्य तत्र स्थानस्मिन्स्थिर नत्तावितिवापाठः
शेषं पूर्ववत् अथोक्तेष्वपि नक्षत्रेषु विशेषमाह नेष्टस्याग्रविधाविति इष्टस्याग्रविधौ सति नो विरच
येत् एतदुक्तं भवति कृत्तिकादीनि सप्त नक्षत्राणि पूर्वं मघादि सप्त दक्षिणे इत्यादि सप्तशलाका
चक्रास्थितनक्षत्राणां मध्ये मृद्वादिलाद्विष्टचंद्रनक्षत्रं यस्मिन्दिग्भागे भवति तद्दिङ्मुखं गृहं सन्मुखस्वंद्रे
ज्ञेयः एवमग्रेष्टे गेवाचंद्रे सति न गृहं कर्तव्यमित्यर्थः तथा च वसिष्ठः चक्रे सप्तशलाकाख्ये कृत्तिका
दीनि विन्यसेत् अग्रे दंतं चंद्रस्यवास्तोः पुरः इष्टे च नाशुभं तथा च ब्रह्मपृष्ठः धनलाभः प्रवासः स्या
दागस्त्योरगभयं क्रमात् दत्ताग्रवामपृष्ठस्थे गृहकर्तुर्निशाकरः इति नारिकिकात्तिथावितिस्पष्टं ना
कीरवारांशयोः अर्कभौमयोर्वारनवांशयोर्नेकुर्यात् उक्तेष्वपि उक्तनक्षत्रेष्वपि कुंभमीनगे विधौ सति ५२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तंभोच्छ्रितिं नाचरेत् अर्थादन्यत्सर्वं समाचरेत् तथा च मांडव्यः पंचके शुचधिसेशु न कुर्यात् स्तंभमस्तु कुर्या
द्देवस्त्रशिलान्यासप्रकारादि समाचरेत् अथ गृहप्रवेशमाह तथादिति अर्कं भूतादि स्तर्यंन दत्त्वादि
तुर्यान् चतुर्थ्यान् पंचदशात् इक्यपरिमितात् तयोर्विंशतिकाष्णात् क्रमेण वेदाग्नि पंचभानि तत्त्वानि गृ
हस्य करणो वचनायां प्रवेशे वर्जितानि स्युः तथा च व्यवहारसारे त्रिवेदाब्धिषि वेदाब्धि त्रित्रिमेषार्कतः शू
न्यी कुर्यात् लक्ष्मीसमृद्धासंस्थैर्यं लक्ष्मीदरिद्रतां धनं व्याधिक्रमात् गृहप्रवेशारंभयोः हर्षइति अथ चतुर्
द्वा द्वारनिर्णयमाह सार्द्धत्रिमितैः प्रोतइति भाद्रपदात् त्रिशुत्रिशुमासे शुभमोवास्तुपुरुषः प्रागादिशीर्षः प्रो
तइति एतदुक्तं भवति भाद्रपदादिमासत्रये पूर्वशीर्षः पूर्वशीर्षः मार्गशीर्षादिमासत्रये उत्तरशीर्षः वास्तुवास्तुपु
द्व रुषः प्रोतइत्यर्थः अथ मस्तकपृष्ठदिशायां मुखं गृह मुखं कार्यं अथ संक्रान्तिपरत्वेन मुखनिर्णयमा
ह गोल्यजेति गोल्यजधटेषर्केसति यमोदङ्मुखं गृहं कार्यं गोर्हषः अलिर्हृश्चिकः अजो मेषः घटस्तुला
एषु राशिषु अर्के सति याम्योदङ्मुखं दक्षिणमुखं उत्तराभिमुखं वा गृहं कार्यमित्यर्थः हृद्घोगेणकुलीरले
यगोश्वोसति पूर्वापरस्यां पूर्वाभिमुखं पश्चिमाभिमुखं वा कार्यमित्यर्थः हृद्घोगः कुंभः एणो मकरः
कुलीरः कर्कटः लेयः सिंहः एतेषु सूर्येसति पूर्वापरस्यां पूर्वाभिमुखं पश्चिमाभिमुखं वा गृहं कार्यं अन्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ
४२
43

ध्येयन्यग्णाप्रिध्येरवौ समनिगृहं न कार्यं अथायपरत्वेन गृहस्वामिनिर्णयं विवक्षुस्तावद्द्यायसाधनमा
ह भुजेति भुजकोटिघातेभहृतशेषमायाः स्युः भुजो गृहस्य दैर्घ्यविस्तारयोरन्यतमस्तन्नामतदन्या
कोटिः तथाचोक्तं लीलावत्यां इष्टो बाहुर्यः स्यात्तत्स्पर्धिन्यां दिशीतरो बाहुः त्र्यस्रे चतुरस्रे वा ला
कोटिः कीर्तितास्तज्ज्ञैः तयोर्घातो गुणनं इभहृतशेषं पूर्वादि यथास्यात्तथा ध्वजादयः आया यथाक्रमं
स्युः पूर्वादिषु ध्वजादयो वलिष्ठा इति भावः एते ध्वजादयः स्वस्वपदे स्वस्वस्थाने ध्वजः पूर्वे धूम आग्ने
यां इत्यादि अयमर्थः मुख्यगृहापेक्षया दिक्षु वक्ष्यमाणगृहेषु धार्या इत्यर्थः अथवा स्वस्वसदृशवा
स्तुषु धार्या इत्यर्थः अथवा स्वस्वसदृशमन्दिरगृहेषु धार्याः अथवा क्रूरकर्मसाधनोद्योवास्तुषु पराक्र
मेणो धार्याः अथवा सदृशवस्तुसत्त्वोपजीविनां गृहेषु धार्याः अथवा स्वानुरूपवास्तुसाध्याहित
वस्तुगृहेषु यथायोगं धार्या इत्यर्थः एतत्स्पष्टमुक्तं वास्तुप्रदीपे खेटकर्पटकोष्ठेषु वृषः सिंहो ग
जः शुभः यदि कूपतडागादौ गजो देयो विचक्षणैः आसने योजयेत्सिंहं शयने चैव कुंजरं वृषं भोजनपा
पात्रे च दद्याच्छत्रादिषु ध्वजं महानसे तथाग्निशालायां गृहे वा तदुपजीविनां धूमं दद्यात्तथा श्वानं यवना
न्त्यजयोर्गृहे खरो वेश्यागृहे योग्यो ध्वांक्षः पतितयतेर्गृहे वृषं सिंहं गजं दद्यात्प्रासादेषु च मंदिरे तथा ४२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शुभ॰२

वश्चिल्पशास्त्रे वस्तुनेधर्मशालायां कुंभे च संतं भजे ध्वजः गोमजेंबुगृहे चैव माधाग्वागृहे शुभौ यंत्रे शास्त्रे र
थेहिंसेभांडागारे शुभो गजः धान्यांबुसत्त्वानुगौ श्वेभशालायां वृषभः नाट्यभागोह्वाह वेश्यागजसिंह वृषाः शु
भाः इत्यादि एवमायस्याथ नमुक्त्वेदानीं तेषां मुखान्याह ध्वजो खिलमुखः सर्वदिग्द्वारः प्राग्याम्यवक्त्रो
गजः सुगमं प्राग्गास्यो वृषभः स्पष्टं यो यदिङ्मुखस्त्र्यायस्तस्मिन्नगृहस्य तद्दैनदिशि मुखं कर्तव्यमिति भावः ८
एवमायपरत्वेन गृहमुखमुक्त्वा प्रसंगेन आयानां शुभत्वमाह ध्वजशस्ताश्च इति इमे चत्वारः प्रशस्ताः सर्वेषां
शुभा इत्यर्थः तथा च गर्गः कीर्तितः शाको वैरं धनं निर्धनता सुखं रोगश्चेति गृहारंभे ध्वजादीनां फलं क्र
मात् अथ षड्गोपि धूमाद्येविशेषमाह धूमो गते इति अग्नेर्गृहे धूमायः प्रशस्तः अंत्यजस्य शुनकः ख
रायस्य यद्दिपालकस्य उष्ट्रः प्रशस्तः अन्ये वृषपारगृहे खरः खरायः प्रशस्तः एवमायपरत्वेन गृह मु
मिमुखमभिधाय धनाराशिपरत्वेनाह प्राहुरिति अंत्यवृश्चिककुलीराणां प्राङ्मुखं गृहं हितं प्राहुः अं
त्यो मीनः वृश्चिकः प्रसिद्धः कुलीरः कर्कटः एषामित्यर्थः अवलाजगमेषाणाकानां यमास्यं दक्षिणामुखं अ
बलाकन्या जगमं मिथुनं णाणो मकरः एषामित्यर्थः आयसिंहधनुषां सोमास्यं आद्यः मेषः सिंहधनु
षीप्रसिद्धे एषां सोमास्यं उत्तरामुखं गृहं हितं एवमाचार्याः प्राहुः एवं चतुर्धा गृहमुखमभिधायेदानीं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ तन्निर्णयमाह अन्येष्टकाष्ठाननमिति गृहस्य स्वपतेर्भूमौ भावकाष्ठानन्तरूपं इष्टकाष्ठाननं इष्टदिक्स्थ-
५५ त्वं कृत्वा तद्गृहं कर्तुः पूर्वगवाक्षवदनं कार्यं कोणस्य त्वास्य तास्यामकर्तुरस्य तास्य गवाक्षाएव वदनानि यस्य ततया
उर्वीति यत्तत्र यस्यामदिक् गवाक्षाः कार्या इत्यर्थः तथाच वास्तुशास्त्रे द्वारं चतुर्विधं प्रोक्तं वास्तुसंक्रान्ति
राशिगं कृत्वा चान्यतमं तत्र गवाक्षाद्यैः पराणि चेति एवं गृहस्य स्वनिर्णयमुक्त्वाधुना कोणादेर्विद्धत्वस्व
दोषं तदपवादं चाह अस्यानननमिति मस्य गृहस्याननं स्वं कोणस्तंभादिभिः विद्धं न स्यात् कोणा-
दिभित्तिकोणः स्तंभः प्रसिद्धः तरुर्वृक्षः अश्मो मयंत्र घटकक्कुलाल चक्रादि अध्वामार्गः कूपः प्रसिद्धः
पंकः कर्दमस्नानादिजनितोतिरं तरस्थायी अमर्त्यो देवः स्थावरएभिर्विद्धं स्वं न स्यादित्यर्थः अस्या
पवादमाह समोच्चेति समोच्चाद्द्विगुणाधिकान्तरभवेधे न दोषः क्वचित्किल समनोगृहस्य प्रोच्चत्वस्या
पेक्षयाद्विगुणाधिकान्तभावे द्विगुणाधिकान्तरजाते वेधे कोणादिवेधे न दोषः अर्थात्स्वतेदोषः किलेत्यागमे
निश्चयेवा तथाच मतान्तरे उक्तं मार्गतरुकोणदूपकोणस्य मम शुभं द्वारं समोच्चायाद्विगुणं त्यक्त्वा भूमिं न तद्दो
षायेति कात्यायनगृहसकारिकायामप्युक्तं विद्धरूपतरुस्तंभयत्तपंके सदेवतैः तद्वारमशुभं प्रोक्तमन्त्यु-
च्चं नीचमेवच अथगृहनत्तत्रानयनं चाह अष्टघ्नइति अष्टघ्नेगृहदैर्घ्यफलेअष्टगुणिते भविहृते सम ५५

विंशतिहृते सति शेषं गृहं तद्गृहं न तत्रं भवेत् अष्टोत्तर्यहृते सति शेषं व्ययो भवेत् एवमायव्ययमभिधाया
धुना तत्फलं विशेषणद्वारेणाह गृहः ममदिति स्वल्पायमल्परिव्ययं गृहं अशुभमत् अशुभं स्यात् स्वल्पायस्यम्भवि
व्ययस्वंतो यस्मिन् तत् तथा अश्यार्थो द्वह्वायः स्वल्पव्ययं शुभं स्यात् नदत्रे ज्ञाते राशिनिर्णयमाह मेषइति अश्विनी
त्रितयं मेषे ज्ञेयं चित्रिपित्रभं मघात्रयं गृहे सिंहे ज्ञेयं मूलत्रयं चापभे धनुषि ज्ञेयं अन्येषु राशिषु द्विद्विभं ज्ञेयं त-
थाच गर्गः अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयं मूलादित्रितयं चापे शेषभेषु द्वयं द्वयमिति अथ गृह
[illegible] तत्स्वामिनोर्वैरादिकमाह ईशोनी इत्यादि नं शास्य योऽन्यई शः स्वामी नी इति गृहं तयो वैरादिकं शास्य वत् विवाहप्र-
करणोक्तवत् ज्ञेयं तत्र विशेषमाह नाड्यन्यथेति नाडी एकनाडी अत्र अन्यथा योज्या विवाहवत् न योज्येत्यर्थः
तत्र एकनाड्येव शस्तेति भावः तथा च बृहद्गर्गः प्रश्नः पण्यांगनानामित्रं देशग्रामं पुरं गृहं एकनाडीस्थितं अभा-
वं विहृद्वेधवर्जितमिति तथा च ज्योतिः सागरे सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि परस्परं मित्रयोश्चए
कनाडी प्रशस्यते इति अथ शालासाधनार्थं गृहद्वारेणात्रमाह दर सं ख्यावाह एकादीति गृहमुखात्म काष्ठा
त् क्रमात् प्रदक्षिणक्रमात् दिक्षु चतुर्दिक्षु एकादिद्विगुणोत्तरा अंकाः स्युः एतदुक्तं भवति द्वारदिशि एकः
१ तस्माद्द्वितीयदिशि द्वौ २ तृतीयदिशि चत्वारः चतुर्थदिशि अष्टौ एवं भवंतीत्यर्थः शालायांकयुतिः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ
४५
४५

गुलादिगांकयोगः कृष्णकपक्षतः सतीश्चवमत्र खंअंगुलादिकानि पूर्णस्तोरदितानि विघ्नमरगृहाणि भवंति ता
नि यथा ध्रुवं च धान्यं च जयं च नंदं खरं च कांतं च मनोरमं च सुवक्त्रसंज्ञं खलडमंगाख्यं क्रूरं विपदं धन
दं क्षयं च आक्रंदसंज्ञं विपुलाह्वयं च स्यात् षोडशानां तद्धिग्नयाभिधानं नामांतरसंख्यामाह अथ षष्ठादि
ति षष्ठं मर्यादीकृत्य त्याषष्ठे तस्मात्प्रथमद्वितीयतृतीयचतुर्थपंचषष्ठानि दश मंत्रयोदशानां मान्य ६
ष्टगृहाणि अशुभानि एवं षोडशगृहाः स्युः गृहाः शुभशिवस्य मन्त्रे वनिकायामनिलपालयाः अथ शाकसाध दलसमरः५
नमाह गेहस्येति गेहस्य फलशुभव्ययः गृहस्तेत्र फलमुक्तः सर्वमानीतो व्ययः गृहभवैर्नामाक्षरैः
संयुतः वह्निभिस्त्रिभिस्तुष्टः प्रोषितः सन् अशुभकारकः इंद्रोयमोराजेति तत्र मातिगंसयांतरेउक्तानि
अथ द्वितीयं शाकनीडं गृहं तत्र शुभदं अर्थात्प्रथमतृतीयं शाकं अशुभदमित्यर्थः अथ गुणविचारणावि
धिमाह यावदिति यावत्पर्यंतं करैर्हस्तैः कृत्वाऽस्मिरगुणं वहुगुणं गृहदिक्षतः करणोस्फुरति तत्तावद्विचार्यं
चेयदि तैः केवलैः करैः वहुगुणा न स्फुरति तदा अंगुलमत्र खं अंगुलादिकं करैः द्विधा अथवा विहायतत्
त्वयात् कुर्यात् अथोपायांतरमाह श्रीगोपीतिरिति श्रीगोपीराजः मेगमेगानाथमेंदेः देवत्तः महा
लगिशलगिदेवत्तः एतत्सर्वेर्ज्योतिविद्भिः आयामविच्छिन्नये यत्र खेष्टा यर्दत्तफलं निवद्धं तदिहा ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मिन् गृहकरणविषयेज्ञात्वाभीष्टफलंसाधयेत् तथाचगोपीराजः विश्वंव्येकायगोभूः १९ इतिभगुजिय
लंगोपिराजोभग्नोघात्सायंरष्टाग्निहग्राहग्रुतमही ८ इतीहकूरप्रकृत्याख्य २२ विश्वे १३ वाणांप सिद्धा २४
ष्टिनागो ८ धृति १९ गिरिश्या ११ आकृती २२ दु १४ तनत्वा ८५ त्यष्टं १० कदमा १ नखे २० ता १२
णां व ४ विकृति २२ दिना १५ [illegible] ० न्कृती २६ धृत्व २८ यामा १० अयमर्थः गोपीराजः विश्वनामानंशिष्यंप्र
त्याहेत्यन्वयः किमाह हेविश्वाव्येकायगोभूः १९ इतिभगुजिभग्नोघात् अहिहकूप्रकृत्यादयः फलंस्यात् विगतः
एकोयस्मात्सव्येकः सचासौआयश्चव्येकायः व्येकायस्यगोभूः स्व अनयोर्हतिर्गुणनं व्येकायगोभूः इतिस्वभंचव्ये
कायगोभूः इतिस्वभंचव्येकायगोभूः इतिभेनयोर्ध्रुवकूयोगाः १।२।३।४।५।६।७।८।९।१०।११।१२।१३।१४।१५।१६।१७।१८
१९।२०।२१।२२।२३।२४।२५।२६।२७।२८।२६।०।४।४०।१९।३।२२।२८।६४।२२।६।१५।३।८८।२४।१०।६।१३।२।४८।२०।७।१३
६०२।८।२६।१९४।२२३।२८४।१३।५६।२८।२४४।८० मित्यर्थः द्वियापूर्णाद्वौपाशौयस्मिन्ननन्तद्वियापूर्णंएवंविधंसूत्रंवि
धायकृत्वानन् एकस्मादंतात् सकाशात् अंकयेत्चिह्नयेत् एतदुक्तंभवति एवंकल्पितस्यक्षेत्रस्यदैर्घ्यमितंसूत्रं
द्विगुणंविधायतदंतयोःपाशौचकृत्वाअंकयेत् एतदुक्तंभवति क्षेत्रदैर्घ्यंचतुर्भिर्भक्तालब्धांशाद्विप्रमाणएक
स्मादंतात् अंध्रित्रितयंमनुक्ताचिह्नयेत् तस्मादेवांताद्विस्तृतिदलेक्षेत्रस्यविस्ताराद्वैमितंअंकयेत् तोअकोक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ यं कोणाभिधो स्तः अंघ्रित्रये कृते कर्णाख्यः विस्तृतिदले कृते कः कोणाख्य एवं सूत्रं मोदनं स्वल्पस्थलसाधन
५९ माह याम्यावृत्ताविति याम्योदीच्य विराम शंकुं निहतो कृत्वा आयं अंककर्णाख्यं आकर्षयेत् एतदुक्तं भवति देवस्य
मध्यभागे साधितदिक्सूत्रे परिशिष्टे देव्यामितं सूत्रं प्रसारयेत् इतरयोः शंकुं निखाय तयोः शंक्वोः मोटितसूत्रांत
याम्योन्निधाय कर्णाख्यं चिह्नं धृत्वा एकस्मादिति आकर्षयेत् यथोभयशंकुगता रज्जुः समानाकृष्टा स्यात्तथा आ
कर्षयेदित्यर्थः कोणशंकुरिति कोणे कोणचिह्ने यत्र कोणचिह्नमागतं तत्र भवि शंकुं निदध्यादित्यध्याहारः इत्य
नेन प्रकारेण शंकुं निखनेत् एतदुक्तं भवति तदेव कर्णचिह्नमन्यस्मादिति स्थामशेषात् सप्तविंशति हस्तेष्वात् ए
कादिषु सप्तविंशतिपर्यंतेषु अद्रिहता अष्टहता हस्तकृत्यादयः फलं स्यादित्यर्थः वानन्तायं फलं रक्षोष्टि हस्तयातु
ते सत्फलं स्यात् रक्ष अष्टि रक्षदृष्टोऽष्टायः तयोर्द्वीहृतिस्तया युतमित्यर्थः इदमपि स्वेष्टाय तत्र फलं भ
वतीति अत्रोक्तन्याय एव व्याख्यानं तथा च मेगनाथदेवज्ञस्य सूत्रं इष्टाभाता इष्टिघ्नात २२ यमायस्ते नो नितेष्ट
कः त्रिहस्तव्योम तानाग्नि २० ऊने चेष्टाय भाभवेत् इति अस्यार्थः इष्टाभात्य इष्टिघाता इतिरष्टभं च अत्यष्टि अन
योर्घातो गुणानं तस्मिन् पृथक् स्थापिते यमायस्ते नो निते ष्टाय स्त्रिहस्तव्योम तानाग्नि २० एतेन लब्धेन आह ता
अते अग्नाग्नितस्ते नैः पृथक् स्थापिते रक्ष भात्य इष्टिघाते इतेसतिरष्टाय भ दत्तं भवेत् आयाश्च भं च आयभेरष्टे ५९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आयमेयस्मिन्तत् तथात्र यदि त्रिभिर्भिः शेषो भागो न गच्छति तदा तत्र तावत् अष्टौ देयाः यावत् त्रिभिर्भागो ग
च्छति तथा च महालगिदेवज्ञस्य सूत्रं व्येके षष्टिहृताद्विबाणाग्निशिनो २५२ त्यक्ता १० श्रुतास्तेपि च व्येकेष्टा
पहृतैकनाग २२८१ सहिताष्टगुणूस्थिता २१८ भिर्हृताः शेषं क्षेत्रफलं भवेदभिमतं स्वेष्टायन तदात्र जं स्याद्दैर्घ्यं त
दभीष्टविस्तृतिरिति स्पष्टार्थोयं श्लोकः इत्यादिविचारेण क्षेत्रफलमवकाशान्तरं यहृदिधृत्वा स्थूलं साधये॰
दित्यर्थः अथ स्थूलसाधनाय सूत्रमोटनमाह द्विघ्नायामयुतिति द्विघ्नायाममितिद्विपार्श्वं विधाय अंक
येदित्यन्वयः द्विघ्नश्चासौ आयामश्च द्विघ्नायामः आयामो दीर्घ्यं तेन मितं द्विगुणितदैर्घ्यसमानमित्यर्थः
द्वियासंद्धौ यापार्श्वौ यस्मिन् तत् द्विपार्श्वं एवं विधं सूत्रं विधाय हत्वा ततत् एकस्मादंतात् सकाशाद् कयेत्
चिहृयेत् एतदुक्तं भवति सर्वकल्पितस्य क्षेत्रस्य दैर्घ्यमितं सूत्रं द्विगुणं विधाय तदंतयोः पार्श्वौ च हत्वा अं
कयेत् त्रयस्त्वे आयामाद्रयश्चैतैः तथा तैर्निर्मितं तस्मिन् एतदुक्तं भवति क्षेत्रे दैर्घ्यं चतुर्भिर्भक्तालब्धं
अंचित्रप्रमाणं कस्मादंतात् अंचित्रितयसूत्राचिहृयेत् तस्मादेव ततत् विस्तृतिदले क्षेत्रस्य विस्ताराद्धें
मितं अंकयेत् तौ अंकौ कर्षकोणाभिधौ स्तः अंचित्रयेक्तनकर्षाख्यः विस्तृतीदलेक्तनोंकः कोणाख्यः ए
वं सूत्रमोटनमुक्त्वा स्थूलसाधनमाह पार्श्वाविति पार्श्वौ क्षेत्रविरामपर्यन्तं निहत्य तौ कृत्वा आयामअंकं कर्षा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ एवंमाकर्षयेत् एतदुक्तं भवति क्षेत्रस्य मध्यभागे साधितदिकसूत्रोपरिशिष्टे देशे मिलत्सूत्रं प्रसार्य तदंतर-
५० योः शंकुं निखाय तयोः शंक्वोः मोदितसूत्रांतयाः शेतानि धायकर्षाख्यं चिह्नं धृत्वा एकस्यां दिशि आकर्षये-
47 त् यथोभयशंकुगतसूत्रसमानाकृत्वा स्यात् तथा आकर्षयेदित्यर्थः कोणशंकुरिति कोणकोणचिह्नेय-
त्र कोणचिह्नं आगतं तत्र भवि शंकुं निदेयेदित्यध्याहारः इत्यमुना प्रकारेण शंकुर्निखेयः एतदुक्तं
भवति तदेव कर्षचिह्नं अन्यस्यां दिशि आकर्षकोणे शंकुर्निखेयः एवं कोणद्वयसाधनमभिधाय अन्य
कोणद्वयसाधनमाह विनियमादिति तयोर्विनिमयाद्विपरीतधारणाद परे कोणशंकू निखेयौ-
एतदुक्तं भवति चरं तो विपरीतो धृत्वा पूर्ववत् कर्षणं कृत्वा कोणयोः शंकू निखेयौ एवं क्षेत्रसाधनमु-
क्त्वा सूत्रन्यासमाह आग्नेयादिदृढं इति आग्नेयादिगतदृढदत्तिणं यथा स्यात् या अष्टं अन्तरितं आ-
सादयेत मध्ये क्षेत्रमध्ये वा सकपाञ्चो सम्यग्दृष्टं प्रागुक्त गुरुपर्षाशिरस्कध्यात्वा तं ध्यातं गुरुहृष्टं तानकं ध्या-
येत् कथंभूतं अष्टापूर्णं अष्टाङ्ग विनीतं पुण्यभागायस्मिन् तसमधानं अयमर्थः क्षेत्रप्रमाणं कलृप्तं वा
त्तं गुरुहृष्टं प्रकल्पयतरोष्टविंशति २८ धा कुर्यात् एवमष्टाविंशांशं प्रकल्प्य तुल्य पुरुषाकाणात् अं-
गेड संमितालवान् सप्तदशभागान् विहाय तत्काम्यग्रस्तदग्रगोनाभिः इतोनाभेः सकाशात् वामेवा ५०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मभागेकरमितंखनेत्तत्रानंतरंत्र्यष्टभिः पूरयेत् तथाचब्रह्मशंभुः सूत्रमितिशिलान्यासंस्तंभस्याग्रेप
ग्णां तथ्याःपूर्वेदत्तिणयोर्मध्येकुर्यादित्याह काश्यपइति नारदः नमस्यादिषुमासेषुत्रिषुत्रिषुयथाक्रमं पूर्वा
दिविग्रागमपार्श्वेषुशायीप्रदत्तिणमिति तथाचशिल्पशास्त्रे वास्तोः शिरसिपुच्छेचयामाकुक्षौचपृष्ठतः ग्रा
पुःकामः खनेच्चैववामकुक्षौखनिःखभावास्तदेवप्रमाणंचकल्पयित्वास्यवामकुक्षौखातंनिधायादौगता
वाणैः पूरयेत् ततइति तथाचलक्षः वामेहस्तांशिरोभागेतथैवसमदशांशकाः मध्येनाभिविजानीयात् त
तःशंकुंप्रतिष्ठयेत् अस्थिरस्यापिगेहस्यवास्तौतद्गुणायेत्क्रवैः दैर्घ्यंवाविस्तृतिंतत्रकुर्यादष्टाभिमितांशका
निति अथशंकुन्यासमाह नाकालेति अत्रकुत्तिस्थलेनानरः शंकुः कालेमुहूर्तेसमयेनिधेयः प्रतिष्ठाप
नीयः नमानमाहाष्टाग्रन्यादइति अगत्यादिशात्तकाष्ठादर्णायरत्नेनमि २४ विंश २ — १८ हकन् १२ संख्यो
गुलकः निधेयः एतदुक्तंभवति विशेषेणसिद्धंसंख्यांगुलस्यतद्विंशोशलोनिधेयः दारुणाविंशांगुलोवैपुंपे
नअ— गुलोषोडशांशांगुलः खड्गेणयस्तद्वक्तसंख्यांगुलोद्वादशांगुलोनिधेयइत्यर्थः किलदारुणः उक्तंतद
जः शास्त्रोक्तहस्तोद्भवः पुनः किंलक्षणः त्रिभागः चतुरस्त्रोशान्तकानस्वकः त्रिभागेषुचतुरस्त्राष्टा
कानस्त्राकाणियस्मिन्नसतथा एतदुक्तंभवति यथाप्रमाणंशंकुंत्रिधाविभज्याग्रायंशंचतुरस्त्रंद्वितीं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ४८ यांशं अष्टास्त्रं तृतीयांशं अनन्तं वर्तुलं कुर्यादिति भावः तथा चोक्तं ग्रंथांतरे स्याद्वर्तविंशाष्टिद्वादशांगुल
कैः क्रमात् विप्रादीनां शंकुमानं वर्णावस्त्राद्यलंकृतं खदिरजं तथा लोमशगायत्रं तच्चंद्रवं रक्तचंदनपाला
शारक्तशालविशालजं नीयकारक्तदंजं वैणवं विल्वं [illegible] दन्तजं शंकुं त्रिधा विभज्याद्यं चतुरस्रं ततः परं अष्टा
स्रं च द्वितीयांशं तृतीयानस्तमवृत्तं एवं लक्षणसंयुक्तं परिकल्प्य शुभे दिने इति अथ रेखाकरणमाह वि
मिति एकः पीठः सगर्भः अपरस्यैव व्याख्यास्तु वर्णादयो ब्राह्मणादयः कादिकं स्पृष्टास्तु त्रितन्द्रस्वादक्षि
ण्यात् तर्जिन्याग्राचरेयुः सूत्रवदिति आग्नेयादिग्रह प्रदक्षिणां कुर्यादित्यर्थः एतदुक्तं भवति ब्राह्मणः कं
निष्ठः स्पृष्ट्वास्तु वर्णेन तर्जिन्या कृत्वा आग्नेयादि प्रदक्षिणां सूत्रानुगतां रेखां कुर्यात् वैश्यः ऊरुयुगलं
स्पृष्ट्वा रेखां कुर्यात् शूद्रः पादयुगलं स्पृष्ट्वा रेखां कुर्यात् तथा च गर्गः कृत्वा सूत्रनिपातं मध्यांगुल्या
ष्टया वा प्रदेशिन्या अंगुष्ठेन वा मणिकनकरजतमुक्ताभिरेखां कुर्यादित्यादि तथा च भृगुः विप्रः शीर्षं तु
पावत्वात् पूर्णस्कन्धं रूपरः यदि स्पृष्ट्वा रेखां सहारंभे कुर्यादग्नेः प्रदक्षिणामिति आग्नेयाग्नेयाः तथा
चोक्तं कारिकायां अंगुष्ठकेन देशिन्या रेखां कुर्वीत सूत्रतः स्वर्णेन मणिनाप्यथ मुक्तादक्षिताला
क्षितैः कुशमेवीन प्रास्त्रेण न लोहेन न भस्मना काष्ठादिभिर्नीयमस्त्वेन वक्रां दोषदर्शनात् प्रास्त्र ४८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

णशास्त्रसूत्रस्थापनादित्यादि स्पष्टमीरितमिति तथाच वृद्धवास्तुपद्धतौ शास्त्रेण शास्त्रसूत्रः स्यात्तथा लोहे
न भस्मनाग्निभयं तस्करभयं तृणेन वलिखिता काष्ठेन राजभयं च चक्राचयादंलिखिता शत्रुभयदा श्ले
ष्मादाविह्नयाच चर्मांगारास्थिकृता चदंतेन च कर्तुरन्यभाया वैरमयसेवा लिखिता प्रदक्षिणासंपदो विनिर्दि
ष्टात् अथ शिलान्यासमाह पितेशिलाश्चपिसूत्रवदाचरेत् आग्नेयादिप्रदक्षिणं स्थापयेत्सुरित्यर्थः
तथाच वराहः आग्नेयदक्षिणपूर्वकोणेकृत्वा प्रजाशिलां न्यसेत् प्रथमं शेषाः प्रदक्षिणेन स्तंभाश्चैव
प्रतिष्ठाप्याइति अथ भित्तिप्रसंगेन द्वारमाह सूर्वादौ त्रिरष३८ र्घ्रौ४ पंचमलवे ५ द्वाः सव्यतो दैर्घ्यके
कामेदं शास्त्रसक्तिताधिव्यलवके सर्वासु दिक्षु दिनं अस्यार्थः दैर्घ्ये अंकोमेन नवभाजिते सति सूर्वादौ दि-
शिक्रमेण सव्यतः वामभागात् त्रिषट्थपंचमलवे द्वाः द्वारं उदितानि मितिरितिशेषः त्रयस्त्रषट्च अर्था
श्च पंच च त्रिषट्र्थपंच एते तेषां संख्यापूरकाः त्रिषड्यार्थपंचमाः तेच ते लवाश्च तेषां समाहारस्तस्मिन् ए
तदुक्तं भवति गृहदैर्घ्यं नवभागं कृत्वा पूर्वस्माद् गृहे क्रियमाणे वामभागात् अंगुष्ठयं तस्मात् तृतीयांशे-
द्वारं कर्तव्यं दक्षिणस्मात् गृहे क्रियमाणे अर्थभागे पंचमभागे कर्तव्य उदङ्मुखे पंचमांशे एवं द्वारं कर्त
व्यं सर्वासु दिक्षु अग्न्यिलवके चतुर्थभागे द्वारं दिता किल तत्क्षणा द्वार्स्यं शास्त्रसक्तिता द्विभागे ध्वातषा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ
५९

चवराहः दैर्घ्यं नवांशाः पदमत्र सत्याद्वारं शुभं प्राक् त्रिचतुर्थभागे चतुर्थषष्ठे दिशि दक्षिणस्यां प-
श्चाच्च तः पंचमकैः स्वतोदगिति तथा च व्यवनः मानाधिको न दिग्भागो द्वारे मानसत्वेव तु यत् इति अथ
निष्पन्नास्तु भित्तिषु स्तंभप्रतिष्ठामाह स्तंभ इति अग्नेर्दिश्याग्नेयां सुसमये पूर्वोक्ते स्तंभः स्थाप्यः त-
त्राप्युक्तं गृहजरत्यनुवर्तते किल दक्षिणः स्तंभः इतितः स्वच्छंदनाद्यर्चितः पुनः किल दक्षिणः शिरश्छत्र भा-
क्शाखिरसि छत्रं भजत इति तथा काकादिपक्षपवेशनभयात् स्तंभोपरि क्रियते तथा च वराहः छत्रस्रगं-
धयुतः कृतधूपविलेपनः समस्थाप्यः स्तंभस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेनेति तथा चोत्पलः स्तं-
भोपरि यदा घूककाकगृध्रादिपक्षिणः काकादयश्च तिष्ठंति तदा कर्तुर्नेशोभनं तस्मात् स्तंभोपरि
छत्रं शाखा वा फलवंती तु वा धारयेदथवा वस्त्रं मलेरत्नादि निहितयेत् गुर्जरदेशे केचित् कालसर्पम-
वलोक्य तत्स्मृत्यदिशि प्रथमं स्तंभप्रतिष्ठां कुर्वंति तदसत् यतस्तदवलोकनं विवाहवेद्यां कोणशृं-
गारार्थं स्तंभयानरोपयंति तद्विषयं तदप्येकदेशीयनव दृष्टं मतं तयथाईशानतः सर्पति कालसर्प-
र्पो विहाय सृष्टिगणायेद्विदिक्षु पश्चाद्वृतिस्तन्नावमध्यशुद्धे त्रिकंत्रिकं गृहषसंक्रमादौ अहेः फणा-
यां मरणं वरस्य मध्ये कुमार्याः स्वजनस्य पुच्छो विधेयमेतत् किलस्मृत्यदेशे विवाहवेद्यां निखनेच्च कीलमि ५९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निगरहस्तंभप्रदिष्टापनंवहुभिर्ग्रंथकारैरागेयामेवाभिहितं तथाचब्रह्मपुंस्तुः सूत्रमितिशिलान्यासस्तं
भस्यारोपणांसदा पूर्वदक्षिणायोर्मध्येकुर्यादित्याहकश्यपः तथाच शार्ङ्गधरे प्रथमादेशुचहर्म्यभुगरहेषन्ये
षु सर्वदाग्नेयांप्रथमंस्तंभंस्थापयेत्तद्विधानतः तथाचवराहमिहराचार्यः दक्षिणपूर्वकोणेकृत्वापूजां
शिलान्यसेत्पूर्वंप्रथमंशेषाःप्रदक्षिणेनस्तंभांश्चैवप्रतिष्ठाप्याःइति कात्यायनगृह्यकारिकायाम
प्युक्तं एकैकस्तुकुर्यात्स्तंभमंत्रैरेतैःशिलातलेस्थित्वयोवसानरत्नैर्निरमामित्यादिभिर्गृहे आग्नेयादिषु
कोणेषु मंत्रैरेतैः शिलान्यसेत् गृह्यहरिहरभाष्येशालायद्विनपथ्येवमलमतिप्रसंगेन उक्तंनह
जरत्नकत्वात् शास्त्रांतरेश्रीपर्णीरोहिणीशालसर्जश्चसरलःशुभाः पनंगलोध्रशालाख्यास्ताला
र्जुनकर्णिकास्तुयाः चंदनाशोकवदरीमधुमास्त्रकदंबकाः शशास्ताश्चशमीनिंबंविल्ववर्जंगृहांतिके गृ
हेकाष्ठंसमस्थंश्रेष्ठमलिंदेविषमंशुभं नारदः स्तोदवरस्तनाख्यानिस्तहिविभातकाः दग्धाकंटकिनाहृ
क्षावटीश्वत्थकपित्थकाः अगस्तिशिग्रुतालाद्यास्तितिडिफाश्चनिंदिताः अन्येचगृहनिर्माणयोज
नीयाःसमाःद्रुमाः तथाचवराहः पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः चैत्यसरित्संग
मसंभवाश्चघटतोयसिकाश्च जानुजातवल्मीकिनिपीडितावज्रमारुतोपहताः स्वपतितनहस्तनि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उ॰ पीडितस्य क्षाणि पुष्टमधुनिलयाः तखो वर्जयितव्याः शुभदाः स्युः क्षीरपयत्रकुसुमफलाः स्वर
५॰ दारचंदनसमामधुमतरवः शुभाद्विजातीनां तत्र स्यारिष्टाश्च खदिरबिल्वहद्विकराः वैश्यानां जीवखा
50 दिरकसिंधूकस्पंदनाश्च शुभफलदाः सिंधूककेसरसर्जार्जुनाम्रशालाश्च शूद्राणां सर्वेषां वा पूज्याः
सर्वे दृष्टाश्चानिंदयेचेति व्यासोपि अन्यवेश्मस्थितं दारु नैवान्यस्मिन्नयोजयेत् न तत्र वसतिः का
यीजीर्णं मासत्रयं बुधैः शार्ङ्गधरः नूतनेन नूतनं काष्ठं नाजीर्णं च शस्यते जीर्णं तन्नूतनं श्रेष्ठं नो
जीर्णं नूतनेन शुभमिति वृक्षच्छेदनप्रार्थनाग्रंथांतरे का यानाह स्तनानि वसंतताानि बलिं गृहीत्वा
विधिवत्प्रयुक्तं अन्यत्र वासं प्रकल्पयंतु क्षमंतु तान्यद्य नमोस्तु तेभ्यः इति अथ यस्तंभप्रसंगेन गृहो
च्चतामाह विस्तारेति विस्तारस्य गृहविस्तारस्य अखिलवः षोडशांशः तेन अन्वितैः ४ युक्तैः कृत
कारैश्च न हस्तैस्तत्तुल्यं गृहोच्चं विदुर्मनयः अत्र अध्याहारः तथा च रत्नकोशे विस्तारषोडशांशः सचतुर्ह
स्तोभवेत् गृहोच्चइति तथा चलल्लः नात्युच्छ्रितं नातिनीचं कुड्योच्छ्रायं यथारुचीति अथ गृहस्य गृ
हान्त कस्य गृहं कस्यादिशि कर्तव्यमित्याह स्नानेति स्नानप्रसिद्धं उषड्रेधाच्यिसृष्टिः पायनं वस्त्रा
णि प्रसिद्धानि स्वजिभोजनं यज्ञावोगवादयः अर्धास्तवर्णादयः अमरादेवाः एषां शाकांसिगृहा ५॰

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

णीतेषांस्थितिः स्थापनं सर्वादिदिशि क्रमेण स्थापयेदित्यध्याहारः तथा च नारदः स्नानागारं दिशि प्रा-
च्यामाग्नेय्यां पचनालयं याम्यायां शयनागारं नैरृत्यां वस्त्रमंदिरं प्रतीच्यां भोजनगृहं वायव्यां पशुमं-
दिरं भांडकोशं तूत्तरस्यामीशान्यां देवमंदिरमिति अथ जलस्थानमाह ईशनैरीशानदिशि ज-
लं कार्यं नान्यत्र तथा च लल्लः प्राच्यादिशि सलिले सततं हानिः शिखिभयं रिपुभयं च स्त्रीकलहः स्त्री-
दौष्ट्यं नैस्वं चिंतात्मजविहानिरिति अथान्यदप्याह परमिति परमन्यत्कं पदार्थं जानवायोर्दिशि
कार्यं अन्यानि माहन्यमति लल्लोक्तत्वात् अथ पाकदक्षिणस्यां दिशि सूत्रकं सूत्रकमेव कार्यं
स्यलसंकोचे सति एतद्यत्प्रोक्तं तत्तद्गृहमध्ये वा स्वस्वस्थाने तारतम्येन योज्यं अथ प्राक्सिस्व-
वोः संकोचे सति परेषां मतमाह अल्पइति परैराचार्यैः प्राक्सिद्धवोः स्वल्पे सति गेहस्य दक्षभागे स्व-
दादिकं निगदितं प्रोक्तैः अल्परक्तवनगृहाणां करणे असामर्थ्ये च रदपिष्टयंत्रं अंबुउदकं उलूखलादिकं
प्रसिद्धं तथा चोक्तं ग्रंथांतरे उलूखलं पिष्टयंत्रं अग्निस्थानं जलाश्रयं वेश्मनो दक्षिणे पार्श्वे पित्र-
णां पादशोधनमिति अथ केषु गृहेषु आयादिकं भाव्यं केषु न भाव्यमित्याह द्वात्रिंशेति द्वात्रिंशेभ्यः
अधिकाः हस्ताः यस्मिन् गृहे प्रमाणं तत् द्वात्रिंशाधिकहस्तं अथ विवदतं चतुर्मुखं तार्णं स्त्रणं गृहं अ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ लिंदादिकं अलिंदपदिशालेतिलोकेप्रसिद्धं आदिपूर्वेनवर्ज्यैद्गृहादिगोहस्य भक्षणं गृहस्य ते एषु आ-
५२ पादिकं तेषु न चिंतनीयं न तो न तेवास्तुपरिग्रहे स्मारिति तथा चिंतामणौ यत्रैदैर्घ्यं गृहादीनां
51 द्वात्रिंशद्धस्ततोधिकं न तत्र चिंतयेद्धीमान् गणनायव्ययादिकाः इति तथा च राजमार्तंडे आयव्य-
योमासशुद्धिं चिंतयेन्न तृणालय इति तथा च वसिष्ठः एकादशायतो हर्म्ये यावत् द्वात्रिंशहस्त-
कं तावदायादिकं चिंत्यं तदूर्ध्वं नैव चिंतयेदिति अथ गृहे विशेषमाह वन्नेमिति आरंभोदितेति-
मासस्तस्मिन्नरात्या आगारं विशेत आरंभाय उदिताः प्रोक्तास्ते च मासा माघस्तेषु फाल्गुनस्त्वरीत्यास्तत्रायुक्त
विधिना प्रविशेत स्वामीत्यर्थः कथं भूतं आगारं श्वेतं कुड्ये यत्र छादितं पुनः किं लक्षणं वप्रपंक-
पाटं वपुः अधीतं कपाटं यत् तथा तत्वपुषमिति लायाति उदूढिते वा तथैव स्थिरं भवति पुनः किं-
लक्षणं अर्चितं तमंतो रणमालाद्यलंकृतं तथा च नारदः सकपाटमन्त्राच्छन्नमदत्तबलिभोजनं
गृहं न प्रविशेदेव विपदामाकरं हि तत् तथा च च्यवनः स्वयमन्यादि ते रोगो पि हि ते चक्रलक्षयः
मानादिभागोद्धारे नीचेमत्वस्तय इति अथ प्रवेशे मासविशेषमाह माघोर्जेश्व केषु मासेषु गृहं वि-
शेन्माघः प्रतिष्ठ ऊर्जः कार्तिकः शुक्रो ज्येष्ठः एषु गृहं प्रविशेदित्यर्थः आरंभोदितमासित्यनेन ५२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्तृणगृहस्य सर्वमासोदितत्वात् प्रवेशोपि सर्वमासेषु विहितः तथा च नारदः प्रवेशो मध्यमो ज्ञेयः सौ
म्यकार्तिकमासयोः माघफाल्गुनवैशाखज्येष्ठमासेषु शुभो भवेदिति तथा च ज्योतिःप्रकाशे गृहारंभो
दितैर्मासैर्धिष्ण्यैर्वारैर्गृहं विशेत् इदानीमपूर्वप्रवेशमाह प्रारंभेति प्रारंभोदितैर्भैर्गृहारंभोदितैर्भैर्गृ
हारंभोदितनक्षत्रैः अपूर्वः प्रवेशः उदितः स्वनीडेति यथाहाह अत्र प्रारंभोदितभैरित्युपलक्षणं ते
न प्रारंभोदितं तिथिभादिकं सर्वं ग्राह्यं अपूर्वो नाम नूतनगृहे प्रथमप्रवेश उच्यते श्रेयोभैर्मैत्रैः ध्रुवनक्षत्रैः
सपूर्वप्रवेश उदितः सपूर्वो नाम यात्रावसाने यः क्रियते तथा च ज्योतिःप्रकाशे अथ यथ अच्युतस
लदक्षैः सहितैः प्रारंभभैः द्वान्द्वः प्रवेशः उदितः द्वान्द्वो नाम अग्न्यादिना दग्धगृहे पुनः कृतेयः
क्रियते तथा च ज्योतिःप्रकाशे अपूर्वप्रवेशो गृहारंभधिष्ण्यैः करोति मध्यमेहीति केचित् सपूर्वे
ष्विते मृदुध्रुवैरेव त्वाष्ट्रानिलाच्युतारंभधिष्ण्यैः अपूर्वसंज्ञं प्रथमं प्रवेशं यात्रावसाने च सपूर्वसंज्ञं
द्वंद्वाह्वयं चाग्निभयादिजातं गृहप्रवेशं त्रिविधं वदंति अथ गृहकृत्य प्रवेशं च सगणतः पश्चिमस्व
स्विगृहो वामो भवति एकादशात्पंच सु गतो ऽर्कः उत्तराभिमुखे गृहे वामो भवति इति श्रीमन्मु
हूर्तमार्तंडटीकायां वास्तुप्रकरणं अथ यात्राप्रकरणं व्याख्यायते तत्रादौ कस्मिन्काले या

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ त्राकार्योरित्याह वारेइति शोभनदशांतर्दशाविदशायदशास्तउपचयावहस्यग्रहस्यवारेगोच
५२ राष्टकवर्गादौ शुभफलदग्रहस्यवारेप्रयाणं इष्टंशुभंजगुराचार्याः केशुकर्णांत्यादितिभद्विके
५२ शुकर्णाः श्रवणाः अंत्यारेवती अदितिभंपुनर्वसू पुष्यांद्विकाः श्रवणाधनिष्ठारेवत्यश्विनीपुनर्वसू
पुष्याणामित्यर्थः तत्रविशेषमाह नोजन्मभइति जन्मभेजन्मनक्षत्रेश्रवणाद्यन्यतमेपिया
तंशुभंनोजगुः अथयेष्वशुभंनोजगुः अथयेषुनक्षत्रेषुअशुभंतान्याह सार्प्येति सार्पम
श्लेषा आर्द्राप्रसिद्धा अग्निः कृत्तिकायमोभरणीअजैकपात्पूर्वाभाद्रपदापितरो मघानिऋतत्वाष्ट्र
त्रयेचित्रात्रयेच एषुनक्षत्रयानंअशुभंजगुः अन्यानितुनक्षत्राणिमध्यमानीत्यर्थः सिद्धं अथयात्राति
थिषुअशुभंतदाह रिक्तेति रिक्ताश्चतुर्थीनवमीचतुर्दश्यः पर्वाणिपूर्णिमामावास्याः षष्ठीअष्टमीप्र
सिद्धा हरिर्द्वादशी सिताख्यशुक्लप्रतिपत्तेषुयानंअसतभंजगुः अर्थादन्यासुतिथिषुशुभं अन्यद
पुमाहजेति जोवधः पुष्कः प्रसिद्धः तयोरुत्क्रमखंयानंउक्तेषुतिथिनक्षत्रादिषुअसतभंतुधस्युक
न्नाखंगमनंनकर्तव्यमित्यर्थः अथसूलमाह प्रागिति प्राक्पूर्वस्यांदिशिज्ञत्यजेदित्यर्थः अवा
क्दक्षिणस्यांदिशिवसुपराष्ठीन धनिष्ठोत्तरादीन पंचनक्षत्राणिजीवोबृहस्पतिवारः एतान् ५२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दक्षिणस्यां दिशि त्यजेत् पश्चात्पश्चिमस्यां दिशि काकासितात्त्यजेत् कः रोहिणी अर्कः आदित्य
वारः सितः शुक्रवारः एतान् पश्चिमस्यां त्यजेदित्यर्थः उदक् उत्तरस्यां दिशि कुजबुधार्यमणः त्यजेत्
कुजो मंगलवारः बुधः प्रसिद्धः अर्यमणो नाम फाल्गुनी एतानुत्तरस्यां त्यजेदित्यर्थः मूलयद॰
स्य प्रत्येकं संबंधः अथ योगिनीमाह त्रिपूणाष्टाविततिमेतान् प्रत्येकपदगतान्नितिपीन् ईशानतः ईशा
न्याः सकाशात् प्रदक्षिणक्रमेण न्यस्तः स्यनेषुः एते के विंशाष्टौ २८ ईशान्यां नवभूमयः प्राच्यां
अग्निगिरिशान् ११ आग्नेयां विश्वे विधौ २३।५६ दक्षिणस्यामर्काव्ययौ २ धनेन्द्रस्यां सप्तदश
क्राः ६।२४ पश्चिमस्यां निधिपर्वताः १५।७ वायव्यां दशादश १०।१२ उत्तरस्यां अत्रांकन्यासमेव व्याख्या
तं अथ यान्यन्नियमाह रौद्रादिषु दिक्षु अग्निभात् कृत्तिकायां सकाशात् सप्तसप्तभगणाः स्यात् एत
दुक्तं भवति सप्तशलाकाचक्रं निष्पाद्य पूर्वगतासु सप्तसु रेखासु ईशान्यतः कृत्तिकादीनि सप्त न
क्षत्राणि न्यसेत् तदुपरस्तात् सप्त दक्षिणगतरेखासु न्यसेत् एवं पश्चिमोत्तररेखासु क्रमेण न्य
सेत् ततो वायव्याग्नेयदिग्गतान्तरेखां कुर्यात् अन्यरेखा याः परिचरन्ति सप्ता निष्पादिते चक्रे प्रयो
जनमाह कार्त्तिकाद्याश्चितरश्मि कोवायुः अग्निः प्रसिद्धः अनयोः काष्ठे दिशौ वायव्याग्नेयो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ तत्रस्थितः परिघेनोल्लंघ्यः अथान्यत्प्रयोजनमाह अयानीति अयाकदाक्षिणस्यांवहणाभेः प्र
५३ तीच्यैः नक्षत्रैः नव्रजेत् प्राच्यैर्नक्षत्रैरुत्तरस्यां नव्रजेदपवादमाह निंद्यानीति निंद्येषु दिक्षुयानिनियानि
53 तैः पूर्वोक्तैः नक्षत्रैर्नव्रजेत् नदाकदा यदि निजापृष्ठांगलब्धिर्भवेत् निजापृष्ठायां निजगमन
दिशायां पृष्ठांगलब्धिः इष्टलग्नलाभः स्यात् इष्टलग्नं वत्स्यमाणेन्तिलक्षणांतयथोक्तगुण
संपन्नं यदि स्यात्तदा गच्छेदित्यर्थः नो चेत् नेत्यर्थः स्विंद्विंकिंकुत्रापिमूलभं हित्वा मूलनक्षत्रं पूर्वोक्तंत्य
क्त्वा मूलनक्षत्रे सति निजापृष्ठांगलब्ध्यावपि नगच्छेदित्यर्थः अथदिक्तिथेष्वपि विशेषमाह अ
श्वीति अश्विनी प्रसिद्धमैत्रमनुराधा रविर्हस्तः पुष्यः प्रसिद्धः एभिस्त्रिभिर्नक्षत्रैः सर्वदि
क्षु व्रजेत् एषु दिक्त्रियमतानास्तीत्यर्थः अथान्यदप्याह मिश्राद्यैरिति दिनादिमलवे त्रिधाभ
क्तस्यदिनस्य आद्ये भागे मिश्राख्यैः साधारणैर्नक्षत्रैः ध्रुवभैश्च न रेयात् न गच्छेत् द्वितीयभागे
तीक्ष्णैः अंतिमभागे तृतीयभागे क्षिप्रैर्नक्षत्रैर्नरेयात् अथरात्रिभागेष्वक्रमशो मृदूग्रचर
भैर्नरेयात् रात्रेः प्रथमभागे मृदुभिः द्वितीयभागेउ— तृतीयभागे चरभैर्नरेयात् अत्रविशे
षमाह अत्यर्केज्यमृगेष्वयं नियमो नः श्रुतिः श्रवणः अर्को हस्तः ईज्यः पुष्यः मृगः प्रसिद्धः ५३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

एभिर्नक्षत्रैः सर्वं मार्गेषु गंतव्यमिति भावः अथाभिजिल्लक्षणं तत्फलं चाह वैश्वेति वैश्वमंतः
एषाढांत्यांशो निमश्रवणः अच्युतः श्रवणस्य आद्यतिथ्यंशः प्रथमपंचदशांशः एतन्मा-
णः अभिजित्स्यात् सोभिजिन्नाम यामिनीदक्षिणादिशं विना सर्वत्र सर्वदिक्षु फलदः दक्षिणापि अभि-
जिन्मुहूर्तोपि यामिनीं विना फलदः यात्काणामभीष्टफलदो भवेदित्यर्थः अथान्यदप्याह
एकार्केंदुयनानुकूलमिति अर्कस्य चंद्रस्य तयोरयनं अर्केंदुयनं एकं च तत् अर्केंदुयनं च तत्
स्यात् तस्मात् अनुकूलं गंतं गमनं अतिशुंहितं स्यात् भेदे सति दिवारात्र्योः क्रमेण शस्तं स्यात् अ-
यमर्थः सूर्यो दिनस्वामी चंद्रो रात्रिस्वामी द्वौ चेदुत्तरायणौ स्यात्तदा अहर्निशं उदग्गमने शस्तौ द्वौ चेद्
दक्षिणायने स्यात्तदा अहर्निशं दक्षिणगमनं प्रशस्तं द्वौ चेद्भिन्नायने भवतः तदा दिवा सूर्यायने दिशं
प्रतिगमनं प्रशस्तं रात्रौ चंद्रायनदिशं प्रतिगमनं प्रशस्तं स्यात् अर्थादन्यथा न प्रशस्तं स्यात् यदा द-
क्षिणदिग्गमनं प्रशस्तं तदा प्रतीचीगमनमपि प्रशस्तं तदा प्राग्गमनमपि प्रशस्तं अत्र प्रतीची उत्तर-
ती संबंधिनी प्राची दक्षिणासंबंधिनी ज्ञेया तस्मात् यदा उदग्गमनं प्रशस्तं तदा प्राग्गमनमपि प्रशस्तं-
तथा चरलग्ने कोष्ठे दिनकरश्चमे मकरादौ चउनराष्टुर्वीं च यायात्कर्कटादौ याम्यां प्रतीचीं वा अ-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ
५४
54

यान्वदय्याह भौमइति भौमशाक्रसर्वोदिष्णं गमनं हितं स्यात् शनिचंद्रयोः अपाकदक्षिणस्याञ्च
गर्वोः बुधगुर्वोः पश्चात् पश्चिमायां भृगवर्कौ हि स्युः करविदिने उदक् उत्तरस्यां गमनं हितं स्यात् अ
थाडलविडलं वाह अर्कभादिति सूर्यनक्षत्रात् युग्मं दिनं नक्षत्रं अंगैः समभिस्तुष्टं पूर्विनं सम
हौवा यदा भवति तदाऽडलं स्यात् अगाभ्यां त्रिषट्संख्याकाभ्यां विडलः स्यात् अडलविडलयो
र्गमनं श्रीदेवलो— देवर्षिवचनेन हितं न स्यात् अथ वारफलदोषापवादमाह आज्यमिति
स्वगमस्नात्स्वयं मीत्मका प्राद्राज्यादीनि प्राशूपप्राशयित्वा सूले वारसूलेयानं प्रयाणां अनर्थं कृतो
भवति अथ दिग्दोहदमाह चूतेति चूतादिकं प्राशूपप्राशादिषु स्नानादिभिर्यानं स्वयानं भवति ह
स्तिः प्रसिद्ध मनोरथः हयो अश्वः नराः शिविकावाहकाः एतदुक्तं भवति चूतं प्राशूप गजराजेन प्रा
गामनात्सिद्धिः तिलान्नं प्राशूपरथेन दक्षिणगमनात्सिद्धिः स्यादित्यर्थः अथाभक्ताभावे निर्णय
माह तयोरिति तयोर्भक्ष्यवाहनयोर्धीनाद्वा यानं स्वयानं भवेत् अथ लग्नशुद्धिसहेतुकामाह
ध्रुवेति अथ हरिजं लग्नं ध्रुवे वत्विक पंचमं तं निष्पादिभ्यो लग्नाधिकं बलिष्ठमित्यर्थः जन्मर्क्षे
ति जन्मर्क्षं जन्मराशिः अस्तमिति गतहस्वराशिः अथ च पंजन्मराशिजन्मलग्नताभ्यामपचयं त्रिष ५४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऽैकादशाभोन्यात् पृष्ठोदयं गोजाश्विकर्कमिथुनाः सम्यगानि शीर्षाख्याः पृष्ठोदयाविमथुनाः कथितास्त एव
पृष्ठोदयलग्नजातकात् ज्ञेयं हन्नतः क्रमः जन्मांगाद्दीपवैविंशांशं गं च तस्तदं च अंगाद्दीजन्मनि अंगाद्दीजन्मां
गाद्दीजन्मलग्नताराशिरीश्वर्थः ते पितृमोज न्मांगाद्दीयोनयोः वैरीतजनिवलत्व द्दीजन्मनि वलहीनेनरहं
तथासांशतं वलत्वदंसर्वयात्रालग्नतागातं त्यजेत् अथ दिक्पतीनाह दिगीशाइति दिशांशर्वादीनां ईशा
स्वामिनः सूर्यशुक्रादित्यादयः क्रमात्स्युः केंद्र चतुष्टये ४।७।१२ दिगीशे सति व्रजेत् गच्छेत् यस्मि
न् केंद्रे ललाटगत्वं भवति तद्दिगमनं निषिद्धं ललाटगलक्षणाचाह दिगपेति दिगपे ललाटगे
सति न प्रविशेत् प्रवासं न कुर्यात् अंगे लग्ने वर्तमानो अर्कजः शनिर्यस्मात्पश्चिमस्यां दिशि ललाटस्थि
तः स्यात् आद्य ११ व्ययस्थोमृगुः ज्वलनदिक् दिशागतः पाललाटस्थितः स्यात् षट्दशगतो ५ विधुश्च
ज्ञोवायोवायव्यां दिशि ललाटस्थितः स्यादिनवक्रीति वक्रीग्रहः केंद्रगतः सन्यातृगमनकर्तुर्नाश
करः स्यात् तदीयदिनमपि वक्रग्रहस्य दिनमपि यातुर्नाशकरः स्यात् केंद्रगतः सन्यातुर्गमनक
र्तुर्नाशकरः स्यात् तदीनमपि यातुर्नाशकरः स्यात् अंगस्थनद्गोपि कोलग्नस्थनद्गोपि नाशकरः ८
स्यात् जनतस्तन्नु भयादिः तत्र — भं च तत्रभेजन्नषिन नभे जन्नभेजन्मराशी ते यास्तयोतथा नत्वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ मिनीविन्यर्थः तयोः अरीवैरीसन्नवर्गोविमन् ग्रहोपि अंगगोलग्नगः पातनीशकरः स्यात् ॥ ॥
५५ अथसूर्यादीनांजन्मनक्षत्राण्याह द्वीशेति अर्कोन्नसूर्यान्नग्रहाणांद्वीशादीनिजन्मर्क्षाणिजन्मन
क्षत्राणिस्युः द्वीशंविशाखासूर्यस्य अतिकृत्तिकाचंद्रस्यश्रेष्ठ पूर्वाषाढाभौमस्यअगजःश्रवणोबुध
स्यभाग्यंपूर्वाफाल्गुनीगुरोः गुरुः पुष्यः शुक्रस्यपौष्णंरेवतीशनेः याम्यंभरणी राहोः सार्पमाश्ले
षाकेतोः यदीयभंजन्मनक्षत्रंहतंत्रिविधास्यादसौगतहोलग्नस्थितोहानिकृत्स्यात् वैशिरिनिस्त
यीनहितीयोराशिः तस्योमयुतः सन्नंगगोलग्नगोशोभनः स्यात् जनत्विजन्मकालेसद्भिर्ग्रहे
ईत्वायेराशयः तेतन्वगताः अतिशोभनाःस्युः जन्मान्तोजन्मस्थंड्डः तस्मादयचयातित्रिषडेकादशा
नितेषुस्थिताग्रहास्तेतन्वगताअतिशोभनाः ततोरपिजन्मलग्नादपुपचयस्थालग्नगताअति
शोभनाःस्युः स्वोच्चर्त्तमित्रर्त्तगाः पापाअपितन्वगताः अतिशोभनाःस्युः जन्मेश्वरोजन्मलग्न
जन्मराशीनस्वामिनोकेंद्रगोअतिशोभनोस्यात्तोस्वारान्यहि स्ववैरिवारेशुभः शुभग्रहहतनोलग्ने
वर्तमानोफदोभवतिमित्राहिपापतनोवृत्तामानोर्थदःस्यात् तथाचच्यवनः रत्नकावर्हकाश्चेवयेस्यु
र्जन्मनिनायकाः तान्यायानपिनिःफंकोयात्रालग्नेनियोजयेदित्यादि अथयात्रालग्नेदृष्टानिष्टाम्र ५५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्लोकेनैकेनाह आर्यार्येति अर्यार्यमन्यगताः खलाः आश्लेषा २१ रि ६ भाः अन्यानि २।३।५।७।८।१०।११।
।१२ तत्रगताः खलाः पापग्रहाः खेदप्रवेशे तनजः पुनिलग्नांत्य १२ षष्ठा ६ ष्टम ८ गोत्रस्थं इन्दुदीप्तेंदुदीप्ताचं
द्रः दीप्तप्रदेशे चंद्रः अपरंत्रकोष्ठगतः ७।४।१२।१५ अस्तितृक्कः ७ ३ ज्योगुरुमैनौ ८ नष्टजोस्तमिता
बुधोव्ययः १२ गः ग्रहान्वितः प्रावृषीयेनपिग्रहेणग्रहाभ्यामग्रहैर्वा युक्तस्थं द्वमाः एतेषु प्रत्येकं यात्रामेहावि
घ्नदास्तुः नानाप्रकारेणमरभंगादीश्च ददतीत्यर्थः अन्यस्थानगताः उक्तेभ्योन्यस्थानगताः संतस्तदा
जायार्थस्वखदास्युः तदाकदाचेच्यदिशुरोक्तं त्याज्यं तस्मात् अथप्रतिशुधस्यकापवादमाह स्वग्रामेति
स्वग्रामः प्रसिद्धः एकपुरं प्रसिद्धं आत्मसमस्वगृहं चत्वारिस्यालिंदसमप्रवेशः चत्वारिआस्यानिमुखानि
अलिंदानि यस्य तत् चतुरास्यालिंदं तच्च तत्सम चतस्मिन प्रवेशः उद्वाहो विवाहः तेषु वधूप्रवेशः नृपभी
राजभयात् दुर्भिक्षपीडा प्रसिद्धाताः तीर्थयात्रामितिदेशयोः तीर्थगमनं स्वामिनिदेशः स्वामस्याज्ञानयोः भृगु
वसिष्ठाङ्गिरः काश्यपयो भृग्वादिगोत्रसमूहे भाभारद्वाजवात्स्ययोगोत्रयोः एतेष्वेकेऽशुभितनोन्त्वं स्तु
क्रतुधस्तत्रवेयानंगमनंहि तकरंस्यात् अत्रवधूप्रवेशे प्रतिशुक्रदोषोनोक्तः तत्तु भर्त्रासहागमनविषयं
भर्त्राविनागमनविषयं भर्त्राविनागमने दोषोदृश्यते नवोढायास्तुवधूत्वयिति तथाचभीमपराक्रमे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ स्वामिनाला यमानायांप्रतिशुक्रोनविद्यतइति तथाचमतांतरे नवोढायास्तुवंध्यात्वंयदुक्तंसतत्स्वेभृगौत
५९ दत्रविज्ञेयंकेवलंबुद्धिगागमे तथाचलल्लः स्वभवनगुरुप्रवेशेदेशानांविग्रहेतयोयाहे नववध्वा
56 गृहगमनेप्रतिशुक्रविचारणांनास्तीतिवसिष्ठः काश्यपेषुविशिष्टेषुभृगावत्रौगिरसेषुच भारद्वाजे
षुवात्स्येषुप्रतिशुक्रोनविद्यतइति अथात्वंचापवादमाह चंद्रेति चंद्रेरूपभमेषगेमतिसितोधःस्या
त् रूपभेरेवतीमेषयोमेषराशिः तत्रचंद्रगतेशुक्रस्यसन्मुखंगमनंसत् शुभंस्यात् तथाचगर्गःयो
स्तादिवह्निभाद्यं — यावत्तिष्ठतिचंद्रमास्तावदंधोभवेच्छुक्रः प्रवेशेनिर्गमेशुभइति तथाचावश्यकप्रहति
माह परपूर्वयोरितिपरपूर्वयोपश्चिमपूर्वयोः सितिसितविपर्यासात् आवश्यककृत्येसतियानंस्यात्
एतदुक्तंभवतिशुक्रेपूर्वकपालेगतेसतिपश्चिमां गच्छेत्पश्चिमकपालेगतिपूर्वांगच्छेत् तथाच
ज्योतिःप्रकाशे अस्तंगतेकेषुयावत्कपालस्वास्थ्यगुर्भवेत् तावत्तादिशिदिशंगच्छेत्सतीचीप्रत्यक्
स्थितयेति अथप्रयाणविधिमाह राजेति राजात्रिदिवसैकाविषटकोशकान्व्रजेत् एतदुक्तंभवति
प्रथमदिनेकोशंचद्वितीयदिनेचतुःकोशान्तत्तीयेषट्कोशानगच्छेत् अर्थात्परतोयथेष्टंगच्छेत्
कथंभूतोराजापितवह्निभस्मरसहृतवह्निरग्निः भस्मराशाप्रणाश्यहृदोवाथवाःतर्पितावह्निभस्महृदो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

येनमतत्वा अथ विषये दिनरात्रिविशेषनिर्णयमाह कृत्यं वेश्मभवति वेश्मभवं गृहभवं यत्किंचित्कृत्यं तद्दिवे
वाविहितं उक्तं नरात्रौ कश्चिद्दिवासहृत्ताभावे सति रात्रौ प्रवेशो विहितः नान्यत् तथाच वसिष्ठः दिवा प्रवेशः
शुभदः सर्वत्र यो रात्रौ भिः हृद्योतिशोभास्करेन्दोः बलेन मत्स्यध्वजवासरस्य रात्रिर्दिनाहर्यतिथेश्च रात्राविति अ
थ कलशवास्तुशुद्धिमाह सूर्यर्क्षाददिति सूर्यर्क्षादिभयं चक्रं नक्षत्रपंचकं तथा सूर्यर्क्षादिमस्त्रमिताश्चतु
र्दशमिताश्चतुर्दशमिताननक्षत्रादष्टनक्षत्राष्टकप्रवेशे नसत् नशुभं स्यात् अन्यानि शुभानीत्यर्थः त्रिंहस्र
यष्टर्वीक्तानां नक्षत्राणां शुभाशुभत्वं ज्ञातव्यं अथ प्रवेशे लग्नमाह लग्न इति उपचयस्थिरे लग्ने जन्म
दोजन्मलग्नाभ्यां उपचयावह स्थिरे लग्ने वेश्मप्रवेशः शुभः स्यात् केरविमसैखेः सूर्यायैः शारंभवत स्थितेः
गृहारंभार्थमुक्तास्तद्वत्संस्थितैरित्यर्थः कामिनसूर्यैर्वामगते सति पुनः केः सष्टवदनभेः यदि रक्षखेगरहं न
दिक्स्रवैः प्रवेशोदिननक्षत्रैरित्यर्थः अथ वामसूर्यलक्षणमाह रंध्रइति रंध्रेशुद्धिभवेभ्यः लग्नादिस्रष्ट
मपंचमद्वितीयैकादशेभ्यः सकाशात् आस्तंगतः आपंचमगतः सूर्यक्रमात् शर्वेषामपायरेहस्येश
वेदक्षिणपश्चिमानराभिमुखे गृहेस्तुनियतं निश्चितं आत्मनः वामो भवति एतदुक्तं भवति अष्टमात्
चस्रगतोवर्तमानोर्कः पूर्वाभिमुखे गृहे वामो भवति एकादशात्पंचमस्थं पंचमात्पंचद्वादशस्थं दक्षिणाभिमुखे गृहे वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ५२ मोऽभवतिद्वितीयात्रायंभावः समिद्घृततिलादिनावह्निंतर्पयित्वादक्षिणादानादिभिर्दैवज्ञांस्तर्पयित्वा
वस्त्रालंकारणादिभिः सुहृदः छत्रादींस्तर्पयित्वाव्रजेदितिभावः किंकुर्वन्स्नेहान्नद्वृतिंत्यजन्स्नेहेनअन्वह
तिष्ठनगेहारामतंयद्भावः यात्रार्थंबहिर्गत्वापुत्रादिभिःस्नेहवशान्नदवलोकनार्थंगृहंनगच्छेदिति कथं
भूतः राजात्वमः बुभुक्षितोनगच्छेदिति अतःकिलक्षणाःकार्यमतःकार्यावधकंदितानकरणः तथाचरत्ना
ता वल्यां क्षणिकेनात्मरथभवनात्प्रधावनात् ग्राम्ययानात् गृहद्गुरुगृहाद्वापियायात्कुतार्गिकार्यः प्राप्यगृह
विपूर्णंद्विजान्नमतमिति तथाचबृहस्पतिः देवतांपूजयित्वातुविदुषःपूज्यपूजितः प्रदक्षिणमिमानंकु
त्वातिष्ठत्प्रायेडमायति तथाचज्योतिःप्रकाशेहंसतोव्यसनगमांविप्रानित्यमाप्रतिरथादिकंशुचिः शुक्ला
वरोष्णीषोनत्वेष्टंसमनाव्रजेदिति तथाचकश्यपः यात्रासमयेहवातपरागोग्रहःसर्वैषमोगोगृहहिरण्य
दैः संपूज्यश्रद्धयादेवतामितिबृहद्यात्रायां स्नातोभक्तोनलिमसर्वसर्वालंकारभूषितः शुक्लांबरधरःश्री
मानध्वजःस्वस्वमेधइति भूपालवल्लभोब्राह्मणान्नावमन्येतनोपयेन्नातिजागतां यात्रांकृत्वागृहंनैव
सिद्धिकामोविशेद्गृहमिति लल्लः यात्रायांप्रस्थितोयःस्त्रीब्राह्मणान्नवमन्यते तदंतंजीवितंतस्यनासोप्र
तिनिवर्ततइतिबृहद्यात्रायांयस्त्रसंप्रस्थितोयात्रांसभार्यांनाभिनिंदति भार्यांवानाभिनिंदेतचास्यप्रति ५२
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निवर्तनमिति तथा च रत्नावल्यां क्रोशं वा यदि वाप्यर्द्धं प्रथमेऽहनि प्रयास्यते द्वितीये योजनं गत्वा निवसेत् मही
पतिः तृतीये योजनं सार्द्धं वसेदाक्रम्य दूरतः ततः परं यथेष्टं तु यायात् मार्गे महीश्वरः अथ यात्रिकस्य नियमाना
ह क्रोधेति क्रोधप्रसिद्धः क्षौरं प्रसिद्धं रतिर्मैथुनं श्रमः क्लेशः आमिषं मांसं गुडं प्रसूतं मरणं अश्रु अश्रुमो
क्षणं दुग्धं प्रसिद्धं आसवं मद्यं क्षारं क्षारधान्यं तांबूलादि अभ्यंगस्तैलाभ्यंगः भयशंका रिपुभयमित्यर्थः असि
तांबराणि अशुभवस्त्राणि रक्तकुसुमादीनि वमिर्वमनं तैलं प्रसिद्धं कटु मरीच्यादिश्चैतेन द्रुमनेउसेतत्य
जेत् अथ उक्तेषु किं किं कति दिनं त्यजेदित्याह दशेति क्षीरं क्षौरं तिक्तमाक्षिकं ५ समाहं त्यजेत् रा
गं यावद्दायं त्यजेत् आर्त्तवं वीजहानपर्यंतं त्यजेत् सितान्यतिलकं भैन व्यतिरिक्तं तैलकं कुसुमादिकं तद्दिने
त्यजेत् प्रस्थानेपि श्वेतेन त्यजेत् प्रस्थानकं नाम स्वमुहूर्त्तसमये किंचिदभीष्टवस्तुचालनं तदुक्तं रत्नमालायां
छत्रायुधाद्यमन स्वमभीष्टं प्रवालयेद्वै जयकं जयार्थी एतत्कार्यवशात् क्रियते संप्रस्थाने संपूर्णफलं
नास्ति तथा च रत्नकोशे कार्यवशात्स्वयमगमने स्वभर्तृके कचिदाचार्याः छत्रायुधाद्यभीष्टं वैजयिकं निर्गमं
कुर्युरिति तथा च गार्गः स्वशरीरेण यः कश्चिन्निर्गच्छेद्धयान्वितः तस्य यात्राफलं सर्वं संपूर्णं परिसिध्यति
तथा च चलनावधिं ग्रंथांतरात् गृहाद्गृहांतरं गर्ग आह सीमांतरं भृगुः प्रारहेयानं भरद्वाजे वसिष्ठेन ग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ गृहीतिविति एवं शयने कृतेपि स्त्रयमन्यस्मिन्दिने गच्छेत् तथा च ज्योतिःप्रकाशे प्रस्थाने यदि कृते तेन यात्रा महादो
५८ षान्विते दिने गर्भयोगं विना कालहृष्ट्यादौ चासनं तत्रैति एवंविधे प्रस्थानेपि क्रोधं क्षौरादीन्वर्जयेदित्यर्थः ग
58 र्गः क्रोधं क्षौरं रतिं वान्तिं तैलाभ्यंगाश्रुमोक्षणं मूत्रं मांसं गुडं तैलं पानमेव परित्यजेदिति रत्नकोशे कालीयकं
हिंगुलकः कुंकुमं रक्तं चंदनं पीतरक्तं च वसनं यात्रेच्छानितन्त्रणात् वृहद्यात्रायां कटुतैलं गुडं क्षार
पक्वमांसमाशनं तथा भक्ता यो याति मोहेन व्याधितः सन्निवर्तितः शतिलल्लः प्रमत्तो व्याधितो भीतोशान्तः
क्रुद्धो वुभुक्षितः प्रस्थानं न प्रपद्येत स्त्रीविवेषस्तथैव च रत्नावल्यां स्वकीयां परकीयां वा स्त्रियं पुरुष
मेव वा वाताडपित्वा तु यो गच्छेत् तदंतं तस्य जीवितमिति भृगुः त्रिरात्रं वर्जयेत्क्षीरं पंचाहं रुरुकमेव च न
त्वहस्यावशेषाभिसमाहं मैथुनं त्यजेत् इति यात्रायां गमनलक्षणांगं गर्गोक्तं तेयं मुहूर्त्तं समये ग्रामेहृस
मैचारांछ्रिणाद्व्रजेत् देवत्रामान्यविप्रांश्च गुरोगैः स्वजनैर्हतः सर्वंदक्षिणात्मुहूर्त्यपादयात्रां नराधिपः द्वा
त्रिंशन्तं पदं गत्वा यानमारोहेत् समं व्रजेदिति इदानीं शकुनमाह वस्त्रालंकरणानीति वस्त्राणि श्वेतवस्त्रा
णि अन्यापशकुनयोर्मध्ये पाहतानि स्ववर्णनिर्मितानि पूर्णकलशं प्रसिद्धं तोयं ध्वनिः छत्रवान्नवर्द्धमा ५८
नः पुरुषः पुंषप्रसिद्धः आदर्शो मकुरः नृपो राजन्यः अश्व प्रसिद्धः दंती हस्ती सुरभीर्गौः स्त्री सोभाग्यवती

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पुष्पाणि श्वेतानि धान्यान्यक्षतानि कुसुमानि च यच्चाप्यन्यत् नामधेयपठितानि आदिशब्देन सुवर्णादि धानवः दोला॰
प्र॰ दीपः प्र॰ विधूमवह्निः धूमरहितोऽग्निः सुरभिद्रव्याणि सुगंधिद्रव्याणि कर्पूरचंदनादीनि शुभ्रो वृषः श्वेत
वृषभः वेश्या च॰ वितानं वस्त्रनिर्मितं प्रसिद्धं चामरं च॰ कुमारी च॰ मीना मत्स्याः जलादुद्धृताः गोरोचना च॰ अ॰
घसंकोचेत्याह यद्यपीति यद्यप्येतानि तानि तोषकरणानि स्वातंत्र्येण ततः करणेन स्थितानि तानि तोषकरणानि ततो
षजनकं न तु किं वहुनोक्तेन एवं संकोचेनोक्ते दानीये शुभं तोषाभावः पूर्वाचार्यैः प्राकृतमध्ये पठितान्याह को
हृद्दंतं गोमयं कोः पृथिव्या उद्धृतं गोमयं स्वच्छपृथिव्याः उद्धृतं मृत्तिका अंभोघटान्वितः सहचरः उदका
र्थं कुंभस्तु कोजनः सन्नूसहचरः सहचरोऽसहचर जलार्थं रिक्तकुंभस्तु पथिकेन सह व्रजेत् तिवर्तते यथा
पूर्वीकृतार्थः पथिकस्य येनानुकूलत्वात् धौतांवरो मोत्रकः धौतवस्त्ररजकः दूर्वा च॰ दर्भाश्च॰ दूर्वादर्भास्तृणा॰
वपि शुभौ अपप्राकृतनामधेयत्वेन गणं पठितं तदेतन्नातिरूपः प्र॰ पलमासमसृक्तं ओदनं पूर्वं रोदनरहितं
पूर्वं सिद्धार्थगौरसर्षपाः दुग्धादि दुग्धदध्याज्यं नवयपत्स्वातंत्र्येण तानि तोषकरणानीत्यनेन दुग्धं पठनमि
त्यदोषः एवमेवान्यत्र विचारणीयं तथा च वसंतः दध्याज्यदूर्वाच्छतपर्णकुंभः सिद्धान्नसिद्धार्थकचंदनानि
आदर्शशंखामिषमत्स्यमीनगोरोचनागोमयमुद्धृतं कोरिति भारद्वाजः राजविप्रेषु दृष्टे पुष्पासु सत्रास्त्री

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ कुमारिकायुतिर्भूयो नरो स्त्री वा गजवाजी वृषः सितः रत्नाधुतान्यवर्णा गौः सवत्सा च विशेषतः उद्धृतं गोमयं
५९ मीनं मृत्तिका चोद्धृता तथा रजको यो नवस्तस्य वेणुपात्रे वैचिकध्वनिः जयमंगलशब्दाश्च पूर्णांतिपात्रः प्रदीपि
59 का प्रदीयो वा प्रज्वलद्वह्निः पूर्णकुंभो न्यपासवं मद्यं मांसं च रुधिरमत्ताणि विविधानि च रत्नवो मधु ताडुलं
वस्त्रालंकरणानि वारो प्यंतायं भारो सुवर्णाद्रिव्यं दर्पणमत्तानानविताननंतो मरपत्रं हवी वर्द्धयितध्वजं दो
ला चाहृतनोवृद्धः शत्रयो त्वार्षे शुकस्याचिः दैवतः स्वशरृदेवस्थितोत्साहकराणि च दृष्टैव तानि नरो या
यात्सर्वार्थान् लभतेत्तसः कुर्वन्निति एतत्स्वनं तत्तरोत्कंसत शुभं दक्षिणानः दक्षिणी भागे कुर्वं
न्सतत् इतरत्त्वशुभं वदमाणं वामभागे कुर्वन्व्रजेत् अथशुभमाहमस्मेति मसम्प्र मस्रि इयतंप्रः वि
टविष्ठात्नपंथा न्यादीनांतकुफलाः अपूर्माप्यावणाः लवणां समृद्धिकं उपानहोप्रः तृणाप्रः अयस्त्वलोहृका
रकः पिन्याकं मर्दितनिलाः औषधं प्रसिद्धं कृष्णधान्यं माषादि गुडं प्रः तैलं प्रः अयः लोहं कचाकेशाः मर्दमः
पंकः कार्यासः प्रः अहृणाशुष्काणि जपादीनि चर्म प्रः हृदनं हृदनस्रवर्णानकंशः सधूमानलः सधूमाग्निः मत्तउन्म
त्तः वांतः वमितः बुभुक्षितोरंकः अंतकः प्राणिहिंसकः खलोदुर्जनः मैरीमदिनः जटीजटिलः व्याधितोरो
गी २ खंजः पादेन खंजः व्यंगोंगहीनः दिगंवरनग्नः यतिः संन्यासी अरिर्वैरी काषायी गैरिकरंजितवस्त्रः म ५९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कालकोथकृकणः चौरः प्रसिद्धः अथ कृकसैलाभ्यकः मालाविलोमलितपतितो जातिस्वभावः गुर्विणी सगा
भीयाघूणीयाणोवंधनार्थं याप्यवान् अर्गली अर्गलावान् वंधानिरयन्न कुसहेघः कुम्भोनद्धान अहिः सर्पः
मेको मद्रुकः पूरटप्र जाहको गात्रसंकोचीमंडली चक्रुधैस्त्र नश्यतिहलाशुधः लोके पोलेतिप्रसिद्धिः अन्यत्र मर्त्यो
रः महिषीप्र खरोष्ट्र महिषाद्रुदः रिक्तोद्वटः प्र क्लिकादनं प्राणिशिरोंगकंपः प्राणिनां गोस्वादीनां शिरे
सटनं अरा सादनं वापदवीवंधो मार्गवंधः उर्णानाभादिभि मार्गो विधीयते उर्वीकृकृत्तिनवावस्रवणं अथाहवः सं
ग्रामः विडाल महिषादीनां यातः पतनं वस्त्रादीनां स्खल स्खलनं यानमश्वादिनस्य पलायनं सकलहः स
नाकलहः घंटः नघंसकः गोदकांतं प्र ज्वलदेश मज्वलद्रुहं स्यद्रूगं तं रत्येते अथ पशकुनाः प्रतिवंधकाः कार्य
प्रतिवंधकाः छिक्कादिका अपशकुनाः स्युदाः स्युः नपोक्तमतांतरे तृणानैलारिकायां समस्तवूमितमौषधां
सा स्वङ्गुरुपंकाहिमनंवानंवभूत्सितमित्यादि अथ शकुनानरमाहुसंगेति संगोभ्रमरः अलिर्द्विरेफ्त्रिकः उ
पुष्प पतञ्चकः शाहुं कुर्वाणोराजस्तकाः नखिनः स्वानादयः स्वामञ्जिकाचिटिकादयः एतेवा मतः मनो
भीष्टदाः स्युः काली महिषा कुक्कुटः प्रसिद्धः शिखंडी मयूरः वी — प्र नकुलो बभ्रुः सिंहः प्र अजो मेषः एते
भारद्वाजादयः दृष्टायाताः सन्तः इष्टफलाः स्युः अथ यमर्थं रासभादयो गार्दभध्वनिर्वामपृष्ठेपि अर्थदः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उ॰ ८॰ ६०

अभीष्टार्थदः अथयेषयेषुकृत्येषुविपरीतशकुनाः शुभास्तानाह नष्टुतारेति नष्टुतारे नष्टुतरणां भयंन्न
पादीनां प्रवेशेग्रामादिप्रवेशः समरः संग्रामः हृतः प्र॰ नष्टेद्रव्याणां नष्टवस्तुनः अवलोकनंव्याधौ रोगोपचारे
एषुविलोमशकुनाविपरीतशकुनाश्शुभदाः स्युः अथसर्थागमनेयेऽ पशकुनास्तेनत्युत्तरादिषुशुभदाः स्यु
रित्यर्थः तथाचश्यामायानाड्यामरेश्वरीतायांविलोमशकुनः शुभदाः स्युः तथाचवसंतः भवेदिड्यांपरिश्र
णितायांसर्वोपिवामः शकुनश्शुभः स्यात् स्यात्पिंगलायांपरिश्रणितायांसर्वोपसव्यशकुनः प्रशस्तः संगेरणोक्
र्मणिचप्रवेशेशुक्रग्रहेनष्टविलोकनेचव्याधौसरितरणेवनादिकेषुशस्तः प्रयाणादिविपरीतभावः अन्यच्चनष्टुतारे
भयेषुदेप्रवेशेनष्टवीक्षणेशकुनाव्यस्तगाः शस्तायान्तुलोकेप्रयाणवाशरति अथप्रथमेअपशकुनेसतिक
र्तव्यमाह आयेप्रथमेऽङः शकुनेजातेसतिविहत्यविवर्तनंकृत्वातत्रस्वचौदेशेउपविश्यसुचिः प्रदालितपाणिपा
दः आचांतः कृताचमनः अस्त्रनप्राणानअष्टवारप्राणायामंकृत्वाऽस्मात्गच्छेत चेयदितऽङः शकुनः स्यात्तदा
विहत्यसुविरात्परांतोऽष्टिवारंषोडशवारंअस्त्रनियमयेत् अथपुरेतृतीयेऽङः शकुनेजातेसतिसुवर्णीदत्वाऽस्मात् एतदा
वयूपकगामनंविषयं तथाचज्योतिर्निबंधेविरुद्धशकुनेपूर्वंप्राणायामाष्टकंचरेत् द्वितीयेद्विगुणंकृत्वातृतीयेन
व्रजेत्क्वचिदिति तथाचज्योतिर्निबंधो विरुद्धशकुलेपूर्वंप्राणायामाष्टकंचरेत् द्वितीयेद्विगुणंकृत्वातृतीये ८॰

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नव्रजेत्स्यादिति तथा च वसंतराजः जाते विरुद्धेऽप्यशकुने ध्वनीनेव्याहृत्य हत्वा करपादयोश्च स्वाचम्य चत्री
रुतरोरधस्तात्तिष्ठन्नयष्ठेक्षकुकुनां तरणीति सद्गुतेकांचनदत्वातिः प्रांकस्व स्वस्वव्रजेदिति इति श्रीमुहूर्तमा
र्तंडटीकायां यात्राप्रकरणं अथ मिश्रप्रकरणं विवदुत्स्तानइाज्ञाभिषेकं हतार्हं नाह जन्मांगेति जन्मां
गादष्टमादिभिर्विशिष्टैस्तथाम्नुहादिभिः स्थिरर्क्षे त्वनतो व्याराहूमपत्तिथितिः प्रोक्ताः स्यादित्यध्याहारः अंगं चमूर्त
चअंगार्देजन्मतिअंगात्तैजन्मांगार्देजन्मलग्नतजन्मराशितेच दष्टमाच जन्मांगर्देदष्टमावर्तमानानातासांऽष्टमाः जन्मां
गाद्दशष्टमाः तेच मृत्युयं अकुजन्मम सम्येटाश्च ते यथा तैर्विशिष्टैः स्थानादिबलसंपन्नैः मृदुक्षिप्रध्रुवभैः स्पष्टं
स्थिरर्क्षेन्त्वनतोस्थिराचासौ हृधिश्च स्थिरर्क्षैः स्थिरोपचयासौ त्वतन्न स्थिरर्क्षे त्वनत्वस्थिरोपचयन्तलग्नेव्या
राहूभौमरहितदिने स्यात्तिथितिः राजप्रतिष्ठाशुभदास्यादित्यर्थः लग्नबलं प्रागवत् अथ स्वइमित्याद्यकलोक
नीयं अथ देवस्थापनमतनार्हं नाहमाघायेथितिं श्रमधुशुचेत्ररहिते अमासेत्रमाबादियंचस्त्वयाणाहूभौमरहि
तदिने पूर्वाह्णके त्रः सस्वर्दर्तिप्रमृदुध्रुवर्दचरभैः स्वत्वांयस्य देवस्य प्रतिष्ठा क्रियते तस्य नक्षत्रे शोभं स्पष्टं स
र्वामरस्थापनमित्यर्थः लग्नबलं प्रागवत् अथ वस्त्रपरीधानं तस्यत्वाल नेउतरादिभक्तितफलेर्हं तार्हं नाह
धार्यमिति वस्त्रधंतिष्टाश्वदितिः पुनर्वसुः उत्तपंचकंहस्तपंचकं गुरुः पुष्यः यौसंरेवतीअश्विनोअश्विनी ध्रुवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ८२ णि पूर्वोक्तानि एतैर्नक्षत्रैः तत्रापि बुधगुरुशुक्रवारे श्रेष्ठं वस्त्रं धार्यं नान्यत्रेत्याह तदुक्तं रवौ जीर्णं विधौ क्लिन्नं ज-
लार्द्रं स्वेदजं कुजे बुधे धनं गुरौ ज्ञानं शुक्रे सौख्यं शनौ मलिनमिति लग्नबलं प्राग्वत् अथ क्षालनमाह रजः-
61 स्विन्नवस्त्रधारणोक्त नक्षत्रादौ स्वाल्पं प्रक्षालनीयं कथम्भूते तैलेन बुधरहिते उक्तं च वस्त्रहेमाद्यलंकारणो-
के शुभादिभिः एवमेव श्रेष्ठं तत्कर्मोक्तं तथापि क्षालने बुधवर्जनार्थं क्षालने रह क्षाल्यमित्युक्तं बुधनिषेध
श्रवणात् उक्तं च भानौ सोमसुते श्राद्धे षष्ठ्यामावास्ययोस्तथा वस्त्राणां क्षालनं चैव दहत्यासप्तमं कुलं अ-
थोन्दुरादिभक्षितफलमाह आखुभक्षितमिति आखुः उंदरस्तेन श्रेष्ठं वस्त्रं मध्यत्रिभागे भक्षितं शुभतत् दुष्टफलं
स्यात् एतदुक्तं भवति वस्त्रं त्रिगुणं कृत्वा यदि भक्षितभागं मध्यत्रिभागे पतति तत् दुष्टमित्यर्थः आखुरित्यु-
पलक्षणं तेनाग्निदग्धं वा वादिभिर्दितं मस्यादिलिप्तं ज्ञेयं तथा चोक्तं वृत्त-प्राते दग्धं वा स्फुटितं च गोमय
मषीपंकैर्विलिप्तं तथा दष्टं मूषकपूर्वकैरशुभदं मध्यत्रिभागे शुभकमिति अथ स्त्रियः रक्तवस्त्रधारणं भूष-
णाधारणं अत्र रक्तग्रहणं कुत्र प्रशस्तं तदुत्तरार्द्धेनाह स्त्रीहेति स्त्री इह उक्तवस्त्रधारणादौ अरक्तं श्रेष्ठं भूषा-
स्वर्णभूषणं दध्यात् धारयेत् कथम्भूते ऽहहरति ध्रुवाश्विनियोगे ध्रुवनक्षत्रेषु नववस्त्रभूषणरहिते इत्यर्थः यथो-
क्तं स्त्रिया रक्तवस्त्रभूषणधारणे दोषो हि प्रोच्यते तथा चोक्तं पुष्यादित्यध्रुवैर्धिष्ण्यैः स्वर्णं रक्तांबरादिकं नवं न भू- ८२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घणां धार्यं भार्यादपि नराणुशोभो इति लग्नबलं प्राग्वत् अथ कुम्भादीनां प्राशस्त्यमाह कुम्भार्काविति कुम्भार्कौ भौ
मरूर्यौ स्वर्णाहरणयोवस्त्रनोर्हितौ अनयोः आरकवस्त्रमुवर्णं च धारयेदित्यर्थः तथैवमिनमेनेव स्नुनिरोप्य
मुक्ताफलादिके अन्नस्वर्णोहितः सोमवारेमेतमस्तु धार्यमिति भावः तत्रयेतत्सर्वं धार्यमिति पूर्वोक्तं अथ त
राणां भूषणधारणे हेतुचरणेनाह वस्त्रोकेविति वस्त्रोके भादौ वस्त्रादितीत्यके स्थिरलग्नेतः नरस्य अल
कृतिरलंकरणं हितायस्मात् किंलग्नेप्यनिलभके दास्ये अनिलभकुम्भानि युग्मं स्वातीविशाखेति दास्य स्म-
श्विनी विगतानि अनिलभद्रदास्राणि यस्मात् तथा तस्मिन्स्वातिविशाखाश्विनीरहित इत्यर्थः लग्नबलं
प्राग्वत् अथ द्वितीयचरणेन विप्रोषमाह विप्राज्ञेति ब्राह्मणस्ताउन्मवैवाविवाहादिकः लब्धिर्लाभः आप्त
सत्यत्रतकेपि भादौ धारणं वस्त्रादिधारणा इष्टकृत्स्यात् तथा चोक्तं व्यासेन लब्धं राजप्रसादेन विप्रादेशा-
त्करग्रहे प्रीत्या मंत्रोक्त्येव वस्त्रं धार्यं नियेपि भादिक इति अथोत्तरार्धेन पण्यानां क्रयविक्रयमाह मैत्रेति-
मैत्रमनूराधा पौषंस्वगामं घटपरहस्नोघटः कुंभः तथास्मान्यरमत्यन्तमंतर्हतेनहस्तां चरुधिराजन्मन्यायः-
चयलग्नं तस्मिन्कुंभव्यतिरिक्ते पदपलग्नेपण्यानां शृङ्गीफलावज्जैरादीनां क्रयविक्रयोतन्नविस्तारय.
कुर्वित्यर्थः कस्यां सत्यां स्वस्त्रहोमत्यां स्वधनभावः तस्य शुद्धिः पापरहितं तस्यां सत्यां शोषं प्राग्वत् तथा चोक्तं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative
